चौखम्बा-संस्कृत-ग्रन्थमाला ।
(ग्रन्थसंख्या २४)

ब्रह्मसूत्रवृत्तिः ।

मरीचिका

श्रीव्रजनाथभट्टकृता

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदाय विदुषा
श्रीरत्नगोपालभट्टेन संशोधिता ।

काश्याम् ।
विद्याविलास—नाम्नि यन्त्रालये, हरिदासगुप्तेन
मुद्रयित्वा प्रकाशितम् ।

सन् १९०५
वैक्रमसम्वत् १९६२

शुभम्

श्रीकृष्णाय नमः ।

ब्रह्मसूत्रवृत्तिः

मरीचिका

श्रीव्रजनाथभट्टकृता

नत्वा श्रीवल्लभाचार्यपादपद्मयुगं सदा ॥
तदीयभाष्यमार्गेण व्याससूत्रार्थ ईर्यते ॥ १ ॥

अथ वेदान्तानां विचार आरम्भणीयो न वेति विशये साङ्ग-वेदाध्ययनादेवार्थनिश्चयेन विचारे विशेषाभावाद् वेदान्तवाक्यार्थ-ज्ञानादेव ब्रह्मज्ञानस्यापि सम्भवाद् विरुद्धवाक्यानामपि सर्वभवन-समर्थे ब्रह्मणि विरोधाभावेन निर्धारसम्भवादनारम्भणीय एव विचार इति प्राप्ते, उच्यते । सन्देहवारणार्थं विचार अवश्यकः । अत एव भगवान् व्यासस्तत्कर्तव्यत्वं प्रतिजानीते ।

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

अथशब्दोऽधिकारार्थः । जिज्ञासापदं विचारार्थकम् । यस्मात् कर्मादिभ्यो ब्रह्मज्ञानमेव पुरुषार्थसाधकम् अतस्तज्ज्ञानाय विचारोऽधिक्रियत इति सूत्रार्थः । विचारस्य वेदान्तविषयकत्वात् त्रैवर्णिक एवाधिकारी । ब्रह्मण इति शेषषष्ठीसमासाद् ब्रह्मसम्बन्धि सर्वं विचार्यमिति सिद्धम् ॥ १ ॥

तद्ब्रह्म जगत्कर्तृ, आहोस्विदकर्तृ इति सदेहे फलवाक्ये सत्यं ज्ञानमित्येवोक्तत्वात्, तस्माद्वा एतस्मादात्मन , यतो वा इमानि भूतानीत्यादिवाक्येष्वपवादार्थमारोपेणापि कर्तृत्वकथनसम्भवादकर्तृ इति प्राप्ते उच्यते ।

जन्माद्यस्य यतः शास्त्रयोनित्वात् ॥ २ ॥

जन्म आद्यस्य आकाशस्य यतः, ब्रह्मणो विचार्यत्वात्सद् ब्रह्मोत्पद्यते । तस्माद्वा इति श्रुतिसिद्धमाकाशस्य प्रथमकार्यत्वम् । एतेन यतो वा इमानीत्यादिश्रुत्युक्ताः सर्व एव सृष्टिप्रकाराः सूचिताः । कुतः शास्त्रयोनित्वात् । शास्त्रोक्तकारणत्वादित्यर्थः । वेदरूपशास्त्रस्य परमाप्तत्वेन अणुमात्रमप्यन्यथाकथनासम्भवात् कर्तृत्वादिधर्माणां ब्रह्मणि विरोधाभावेन तत्कथनस्यापवादार्थत्वेन वक्तुमयुक्तत्वात् सर्वज्ञं सर्वशक्तिमत् सर्वकर्तृ ब्रह्मेति सिद्धम् ॥ २ ॥

तद् ब्रह्म समवायिकारणं निमित्तं चेति संशये, यतो वा इमानीत्यत्र पञ्चमीश्रवणात् समवायित्वस्य क्वाप्यश्रवणान्निमित्तमेवेति प्राप्ते, उच्यते ।

तत्तु समन्वयात् ॥ ३ ॥

तुशब्दः पूर्वपक्षं व्यावर्तयति । तद् ब्रह्मैव समवायिकारणं, *कुतः समन्वयात्, अस्तिभातिप्रियत्वेन* सत्सचिदानन्दरूपेण सम्यगनुवृत्तत्वात् ।अतः, स आत्मानं स्वयमकुरुतेतिश्रुतेर्ब्रह्मण एव समवायित्वम् । निमित्तत्वन्तु सर्ववादिसम्मतमस्त्येव । एवं ब्रह्मजिज्ञासां प्रथमसूत्रेण प्रतिज्ञाय किंलक्षणकं ब्रह्मेत्याकाङ्क्षायां जन्मादिसूत्रद्वयेन वेदप्रमाणकं जगत्कर्तृ समवायि चेत्युक्तम् । एवं त्रिसूत्र्या जिज्ञासालक्षणविचारस्य कर्तव्यता सिद्धा ॥ ३ ॥

तत्र ब्रह्मणि चतुर्धा विचारः । स्वरूपसाधनफलप्रतिपादकवेदान्तवाक्यैस्त्रिविधैर्मतान्तरनिराकरणेन च । तत्र स्वरूपविचारानन्तरं मतान्तरनिराकरणं विना साधनफलयोर्निरूपयितुमशक्यत्वात् क्रमेणैतच्चतुष्टयमध्यायचतुष्टयेन निरूप्यते । अतः प्रथमेऽध्याये स्वरूपवाक्यानां विचारः । तानि पुनः सन्दिग्धासन्दिग्धभेदाद् द्विविधानि । तत्र निःसन्दिग्धानामविचार्यत्वात् सन्दिग्धानां कार्यप्रतिपादकान्तर्यामिप्रतिपादकोपास्यस्वरूपप्रतिपादकप्रकीर्णकभेदेन चतुर्विधत्वात् प्रत्येकं क्रमेण चरणचतुष्टयेन प्रतिपाद्यन्ते । तत्र प्रथमपादस्य कार्यप्रतिपादकवाक्यनिर्णायकत्वात् सच्चिदानन्दरूपेणाऽऽकाशवायुतेजोवाच्यानि पदार्थवाच्यान्यपि निर्णीयन्ते । अन्यत्रान्यवाचकान्यपि वेदान्तेषु भगवद्वाचकानीति । तत्र लक्षणविचार एव सद्रूपाणां वाचकता-

या निर्णीतत्वाश्चिद्रूपस्य ज्ञानप्रधानस्य निर्णयार्थं ज्ञानस्य सप्तद्वारत्वात् सप्तभिः सूत्रैरीक्षत्यधिकरणमारभ्यते । तत्र ब्रह्मणः स्वप्रकाशत्वेन सर्वप्रमाणाविषयत्वाद्, यतो वाच इति श्रुतेश्च विचारः कर्तुं न शक्यते, उत विरोधपरिहारेण कर्तुं शक्यत इति संशये ब्रह्मणः सर्वव्यवहारातीतत्वाद्विचारानर्हतेत्याशङ्क्याह ।

ईक्षतेर्नाशब्दम् ॥ ४ ॥

न विद्यते शब्दो यत्रेत्यशब्दं सर्ववेदान्ताद्यप्रतिपाद्यं ब्रह्म न भवति । कुतः? ईक्षतेः । तदैक्षतेत्यादिश्रुतिषु ब्रह्मण ईक्षाप्रतिपादनात् । एवञ्च सर्वव्यवहारातीतोऽपि लोकसृष्टिद्वारा व्यवहार्यो भविष्यामीतीच्छयेक्षणाद् विचारविषय इति सर्वं सुस्थम ॥ ४ ॥

ननु यतो वा इमानि, निष्कलं निष्क्रियमित्यादिश्रुतेर्ब्रह्मणः कर्तृत्वमकर्तृत्वं च प्रतीयते । ततो विरुद्धसर्वधर्माश्रयत्वकल्पनापेक्षया-लौकिककर्तृत्वादेर्बाध उचितः । ईक्षत्यादिकं तु प्रकृतिगुणसम्बन्धाद्भविष्यतीत्याशङ्क्य परिहरति ।

गौणश्चेन्नात्मशब्दात् ॥ ५ ॥

ईक्षत्यादियुक्तः परमात्मा गौणः प्रकृतिगुणसत्त्वसम्बन्धवानितिचेन्न, कुतः आत्मशब्दात् । आत्मा वा इदमेक एवेत्युपक्रम्य, स ऐक्षतेत्युक्तम् । आत्मशब्दः पुनः सर्वेषु वेदान्तेषु निर्गुणपरब्रह्मवाचकत्वेनैव सिद्धः । तद्वाच्यस्यैव जगत्कर्तृत्वमत्रोच्यते । अन्यतरबाधपक्षस्तु न युक्तः । तथा सति सगुणस्य कर्तृत्वापत्तौ ब्रह्मणः स्वातन्त्र्यं भज्येत । अतः स्वतःप्रमाणमूलश्रुतिबलात् सर्वभवनसामर्थ्यं विरुद्धसर्वधर्माश्रयत्वं च ब्रह्मणि मन्तव्यम् ॥ ५ ॥

नन्वात्मशब्दोऽपि यज्ञदत्तो ममात्मेतिवदुपचारादस्त्वित्याशङ्क्य परिहरति ।

तन्निष्ठस्य मोक्षोपदेशात् ॥ ६ ॥

तदात्मानं स्वयमकुरुतेत्युपक्रम्य, यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवतीति । लौकिकधर्मरहिते ब्रह्मणि जगत्कर्तरि परिनिष्ठितो मु-

को भवतीत्यर्थः । यदि जगत्कर्ता गौणः स्यात्तन्निष्ठस्य संसार एव स्यान्न मोक्षः ॥ ६ ॥

हेत्वन्तरमाह ।

हेयत्वावचनाच्च ॥ ७ ॥

यदि जगत्कर्ता सगुणः स्यात् तदा वेदान्तेषु साधनोपदेशप्रसङ्गे हेयत्वेन पशुपुत्रादिवदुपदिष्टः स्यान्नत्वेवम् । अत ईक्षत्यादयो न सगुणधर्माः । पूर्वोक्तानामीक्षतिहेतुसाधकत्वबोधनार्थं चकारः ॥७॥

सृष्टिवाक्यानामीक्षतिहेतूनां भगवत्परत्वमुक्त्वा प्रलयवाक्यानां तत्परत्वमाह ।

स्वाप्ययात् ॥ ८ ॥

ब्रह्मणो न व्यवहारातीतत्वं, कुतः ? यत्रैतत्पुरुषः स्वपितीति श्रुत्या स्वस्मिन् ब्रह्मणि जीवस्याप्ययात् लयप्रतिपादनादित्यर्थः ॥८॥

सुषुप्तिवाक्यानां ब्रह्मपरत्वमुपपाद्य मुक्तिवाक्यानामाह ।

गतिसामान्यात् ॥ ९ ॥

गतौ मोक्षे सामान्यात् । समानस्य भावः सामान्यम् । यथा सर्वासामपां समुद्र एकायनमित्यादिश्रुत्या सर्वस्य शुद्धब्रह्मसाम्यप्रतिपादनादित्यर्थः ॥ ९ ॥

किञ्च ।

श्रुतत्वाच्च ॥ १० ॥

पूर्णमद इति, सर्वे वेदा यत्पदमामनन्तीति च श्रुत्या निःसन्दिग्धं ब्रह्मणः सर्वकार्यत्वं प्रतिपादितमतो ब्रह्मणः सर्वत्र प्रतिपाद्यमानत्वाच्छब्दस्य ब्रह्मानयकाद् इति सिद्धम् । अधिकरणपूर्णत्वबोधकश्चकारः ॥ १० ॥

एवं चिद्रूपस्य कारणत्वनिरूपणेन तत्प्रतिपादकश्रुतीनां ब्रह्मपरत्वं निरूप्य, आनन्दरूपस्य कारणत्वनिरूपणेन तत्प्रतिपादकवाक्यानां ब्रह्मपरत्वं निरूप्यते, आनन्दमयाद्यष्टभिः सूत्रैः । षडिन्द्रियपञ्चरूपद्वयानन्दभेदेन आनन्दस्याष्टविधत्वात् । तत्र तैत्तिरीयशाखा-

र्यां ब्रह्मभृगुप्रपाठकद्वये श्रुतस्य मयट्प्रत्ययान्तस्यानन्दमयपदस्याब्रह्मवाचकत्वे सम्पूर्णप्रपाठकस्य ब्रह्मपरत्वं न स्यादिति तन्निराकरणार्थमधिकरणारम्भः । तत्राब्रह्मान्नमयादितुल्यवचनात् प्रियमेव शिर इत्यादिना सुखवाचकशब्दानामेवोक्तत्वादब्रह्मपरत्वमुत आनन्दस्य जगत्कारणत्वेन ब्रह्मत्वप्रतिपादनार्थत्वात् फलत्वेनोपपादनार्थत्वात् प्रपाठकस्य तस्याब्रह्मत्वे प्रपाठकवैयर्थ्यापत्तेरानन्दमयपदस्य ब्रह्मपरत्वमेवेति संशये, अन्नमयादिषु विकारार्थकमयट्प्रत्ययदर्शनात् तत्प्रायपाठादानन्दमयस्यापि न ब्रह्मपरत्वमिति प्राप्ते, उच्यते ।

आनन्दमयोऽभ्यासात् ॥ ११ ॥

आनन्दमयशब्दवाच्यः परमात्मा, नान्यः । कुतः अभ्यासात् । अभ्यसनं पुनः पुनः कीर्तनं तस्मात् । यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्दयातीत्यादिष्वभ्यर्हितत्वेन फलत्वसूचकेनाभ्यासेन आनन्दमयस्य ब्रह्मत्वं सूच्यते ॥ ११ ॥

ननु लोके मयटो विकारार्थकत्वदर्शनादानन्दमयपदस्य न ब्रह्मपरत्वमित्याशङ्क्य परिहरति ।

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १२ ॥

विकारवाची शब्दो मयट्प्रत्ययो यस्मिंस्तद्विकारशब्दम आनन्दमयपदं तस्माद् ब्रह्मवाचकं तन्न भवति, ब्रह्मणोऽविकारात्मकत्वादितिचेन्नात्र विकारे मयट्, किन्तु प्राचुर्यमतति प्राप्नोतीति प्राचुर्यात् । विकारार्थकमयटो, द्व्यच्छन्दसीतिनियमेन वेदे द्व्यज्व्यतिरिक्तस्थले विधानाभावात्तत्प्रकृतवचनेऽत्र मयडित्यर्थः । प्राचुर्येण प्रस्तुतं वचनं तत्प्रकृतवचनं तस्मिन् मयडित्युक्त्याऽऽनन्दस्यात्र, को ह्येवान्यादित्यादिना स्तुतत्वेन तदर्थकोऽत्र मयडितिभावः ॥ १२ ॥

शब्दबलविचारेण मयटो विकारार्थकत्वं निवार्यार्थबलविचारेणापि तदर्थकत्वं निराकरोति ।

तद्धेतुव्यपदेशाच्च ॥ १३ ॥

एष ह्येवानन्दयातीति श्रुत्वा तस्यानन्दमयस्यान्यानन्दं प्रति हेतुत्वेन व्यपदेशादित्यर्थः । एतस्यापि विकृतत्वेऽस्यापि सत्कारणत्वा-

द्न्यनिषेधपूर्वकमेतस्यैव कारणत्वप्रतिपादकं वाक्यं व्यर्थं स्यादिति भावः । अतो नाऽऽनन्दमयशब्दो विकारार्थकः ॥ १३ ॥

नन्वन्नमयादिवदुपासनापरत्वेनापि श्रुत्युपपत्तेःपक्षपुच्छादित्वेन मोदप्रमोदादीनामुक्तत्वाच्च ब्रह्मत्वेन सामान्यतः साधितमप्यावश्यकोपपत्त्यभावाच्च ब्रह्मपरत्वमित्याशङ्क्याह ।

मान्त्रवर्णिकमेव च गीयते ॥ १४ ॥

सत्यं ज्ञानमित्यारभ्य ब्रह्मणा विपश्चितेत्यन्तो मन्त्रः । मन्त्रेणाभिधया मुख्यया वृत्त्या, प्रतिपाद्यं मान्त्रवर्णिकम् । तत्र, सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्यनेन ब्रह्मणा सह नानाविधकामायतनात्मकसायुज्यरूपफलस्यैव मुख्यतया कथनात् तस्य ब्रह्मण एव आनन्दमयत्वेन सर्वकर्तृत्वेन सर्वान्तरत्वेन परमफलत्वेन सर्वस्मिन् प्रपाठके उपपादनं गम्यते । अत आवश्यकोपपत्तिसद्भावादानन्दमयः परमात्मैवेति सिद्धम् । चकारो विधिमुखविचारेणाधिकरणसम्पूर्णत्वबोधकः ॥ १४ ॥

निषेधमुखेनेदमेव पुनश्चतुःसूत्र्या विचार्यते दार्ढ्याय ।

ननु ब्रह्मणा सह फलभोक्तृत्वाज्जीव एवानन्दमयोऽस्त्वित्याशङ्क्य परिहरति ।

नेतरोऽनुपपत्तेः ॥ १५ ॥

इतरो जीव आनन्दमयो न भवतीत्यर्थः । कुतः ? अनुपपत्तेः आनन्दमयस्य जगत्कर्तृत्वेनाप्रोक्तेस्तस्य च जगद्व्यापारवर्जमित्यनेन जीवे निषिध्यमानत्वाच्चानन्दमयो जीवः ॥ १५ ॥

अत्रैव हेत्वन्तरमाह ।

भेदव्यपदेशाच्च ॥ १६ ॥

रस ए ह्येवायं लब्ध्वानन्दी भवतीति, एषह्येवानन्दयातीति जीवानन्दयोर्भेदेन व्यपदेशाच्च नानन्दमयो जीवः ॥ १६ ॥

नन्वानन्दमयस्य जगत्कारणत्वेन निरूपणान्मतान्तरे प्रकृतेरपि जगत्कारणत्वोक्तेः प्रकृतिरेवानन्दमयशब्दार्थो भवत्वित्याशङ्क्य परिहरति ।

कामाच्च नानुमानापेक्षा ॥ १७ ॥

आनन्दमयनिरूपणानन्तरं, सोऽकामयतेतिश्रुतत्वाज्जडायाः प्रकृतेः कामनासम्भवात्, चकारात् स तपोऽतप्यतेतिश्रुत्युक्ततपसोऽप्यसम्भवात् प्रकृतेरपेक्षा नास्तीत्यर्थः ॥ १७ ॥

हेत्वन्तरमाह ।

अस्मिन्नस्य च तद्योगं शास्ति ॥ १८ ॥

अस्मिन्नानन्दमयेऽस्य जीवस्य च आनन्दमयमात्मानमुपसंक्रामतीति श्रुत्या तेन रूपेण योगं शास्ति फलत्वेन कथयति । नहि जीवस्य, जडापत्तिर्युक्ता । अत आनन्दमयशब्दवाच्यो न जीवो, नापि जडः, किन्तु ब्रह्मैवेति सिद्धम् ॥ १८॥

अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादि श्रूयते । तत्र त्रेधा संशयः सम्भवति । किमधिष्ठातृदेवताशरीरमाहोस्विद् ब्रह्मणः शरीरमुत परब्रह्मैवेति । तत्र हिरण्मयशब्दस्य सुवर्णविकारवाचित्वात् । केशनखादीनां शरीरधर्माणां प्रतीयमानत्वाद् दृश्यत इति चाक्षुषत्वोक्तेरिन्द्रियवत्त्वश्रवणाच्च सूर्यमण्डलस्थोऽधिकारी जीव एव कश्चिदुपासनार्थमत्रोक्त इति ज्ञायते । अथोच्यते, सर्वेभ्यः पाप्मभ्य उदित इत्यपहतपाप्मत्वादिश्रवणान्न जीव इति तर्हि ब्रह्मण एव कार्यविशेषार्थं परिगृहीतो देहोऽस्त्वेतद्वाक्यप्रतिपाद्य इति प्राप्ते, उच्यते ।

अन्तस्तद्धर्मोपदेशात् ॥ १९ ॥

अन्तर्दृश्यमानः परमात्मैव । कुतः? तद्धर्मोपदेशात् । अपहतपाप्मत्वरूपब्रह्मणोऽसाधारणधर्मोपदेशात् । वेदान्तेषु तत्तत्प्रकरणे एकोऽप्यसाधारणो ब्रह्मधर्मो विद्यमानः शिष्टान् साधारणत्वेन सन्दिग्धान् धर्मांस्तद्धर्मत्वेनैव निश्चिनोतीति मर्यादा । ब्रह्मणः शरीरमिति पक्षस्त्वसङ्गतः । सर्वकरणे स्वतः समर्थस्य ब्रह्मणः का वानुपपत्तिर्येन स्वस्यापि शरीरं कल्पयेत् । आनन्दस्वरूपमेव लीलार्थं शरीरधर्मयुक्तं भासते । इच्छया तच्चाक्षुषमपि भवति । हि-

रणमयशब्दस्यानन्दवाचकत्वान्मयटः प्राचुर्यार्थकत्वात् । परब्रह्मैवात्र प्रतिपाद्यम् ॥ १९ ॥

हेत्वन्तरमाह ।

भेदव्यपदेशाच्चान्यः ॥ २० ॥

अन्तर्यामिब्राह्मणे य आदित्ये तिष्ठन्नादित्यादन्तर इत्यादिश्रुत्या आधिदैविकस्य सूर्यमण्डलतदभिमानिभ्यां भेदेन निर्देशात् सूर्यमण्डलस्थः परमात्मैवास्मिन् वाक्ये प्रतिपाद्य इति सिद्धम् ॥ २० ॥

अस्य लोकस्य का गतिरित्याकाश इति होवाचेत्यादि श्रूयते । तत्रास्य प्रकरणस्य सन्दिग्धत्वाद् भूताऽऽकाशः प्रतिपाद्यते, ब्रह्म वेति संशये, आकाशशब्दस्य भूताकाशे निरूढत्वात् स एव प्रतिपाद्य इति प्राप्ते, उच्यते ।

आकाशस्तल्लिङ्गात् ॥ २१ ॥

आकाशशब्दवाच्यः परमात्मैव, कुतः? तल्लिङ्गात् सर्वगतित्वादिब्रह्मलिङ्गानामस्मिन् प्रकरणे प्रतिपादनात् सर्वजगत्कारणत्वादिधर्माणां भूताऽऽकाशेऽसम्भवाद् रूढिं बाधित्वा लिङ्गवशादाकाशशब्दस्य ब्रह्मपरत्वं, ब्रह्मणः सर्वशब्दवाच्यत्वान्न लक्षणा । तस्माद्त्राकाशशब्दो ब्रह्मपर इति सिद्धम् ॥ २१ ॥

प्रस्तोतर्या देवता प्रस्तावमन्वायत्तेत्युपक्रम्य श्रूयते, कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि, भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते इत्यादि । तत्रासन्यः प्राणो ब्रह्मवेति विशये मुख्यप्राणेऽपि स्वापादौ सर्वभूतसंवेशनस्य, यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येतीत्यादिश्रुत्योपपादनात् । यथा प्राणविद्यायां न ब्रह्मपरत्वमेवमस्यापि वाक्यस्येति विशेषशङ्काकाङ्क्षायां पूर्वोक्तन्यायमतिदिशति ।

अत एव प्राणः ॥ २२ ॥

अस्मिन्नपि प्रकरणे भूयसां ब्रह्मलिङ्गानां श्रवणात् प्राणशब्दवाच्यं ब्रह्मेति सिद्धम् ॥ २२ ॥

अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु

सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु, इदं तावद्यदिदमस्मिन्नन्तःपुरुषे ज्योतिरिति श्रूयते। तत्र ज्योतिःशब्दवाच्यं प्राकृतं ज्योतिर्ब्रह्मवेति संशये, अत्रासाधारणब्रह्मधर्मोऽभावात् प्राकृतं ज्योतिरेव वाच्यमिति प्राप्ते, उच्यते।

ज्योतिश्चरणाभिधानात् ॥ २३ ॥

अत्र ज्योतिःशब्दवाच्यं ब्रह्मैव, कुतः? चतुष्पाद्ब्रह्मनिरूपणे ज्योतिषश्चतुर्थचरणत्वेनाभिधानात्। अतः पादानां ब्रह्मधर्मत्वाज्ज्योतिषो ब्रह्मत्वम् ॥ २३ ॥

ननु नात्र चतुष्पाद् ब्रह्म निरूप्यते। किन्तु गायत्री वा इदं सर्वमित्युपक्रमाद्गायत्रीछन्दः। ब्रह्मशब्दोऽपि तस्यैव प्रकृतत्वात्तत्परएवेति छन्दस एव पादाभिधानान्नात्र ब्रह्मधर्माः पादा इत्याशङ्क्य समाधत्ते।

छन्दोऽभिधानान्नेति चेन्न तथाचेतोऽर्पणनिगदात्तथा हि दर्शनम् ॥ २४ ॥

नैव दोषः। तथाचेतोऽर्पणनिगदात्। गायत्री वा इदं सर्वं यदिदं किञ्चेति गायत्रीद्वारा ब्रह्मणि चेतसोऽर्पणं निगद्यते। वर्णसमाम्नायरूपगायत्र्याः सर्वत्वमुपचारं विना न सम्भवतीति तद्द्वारा तत्प्रतिपाद्यब्रह्मणि बुद्धिप्रवेशार्थं तथा निरूपणम्। कस्मादेवं प्रतिपाद्यत इत्याशङ्क्याह। तथा हि दर्शनम्। तथा तेनैव प्रकारेण दर्शनं ज्ञानं भवति। स्थूला बुद्धिर्नाहत्यैव ब्रह्मणि प्रविशेदिति, हि युक्तम्। लोके दृष्टं सूचीसूत्रादौ, अतो यन्न प्रविशति, तदुपायेन प्रवेश्यत इति ॥ २४ ॥

किञ्च।

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २५ ॥

भूतादयो भूतपृथिवीशरीरहृदयानि चत्वारि पादा व्यपदिश्यन्ते। नह्येतानि गायत्र्याः पादा भवितुमर्हन्ति। ब्रह्मणस्तूपपद्यन्ते। यावद् ब्रह्मपरत्वेन मुख्यमुपपद्यते, न तावद्गौणं कल्पनीयमिति।

गायत्रीशब्दस्यार्थाः पादा न भवन्तीति चकारार्थः । अतः पादानां ब्रह्मधर्मत्वम् ॥ २५ ॥

ननु त्रिपादस्यामृतं दिवीति सप्तम्याऽऽधारत्वं प्रतिपाद्यते । अतः परो दिवो ज्योतिर्दीप्यत इत्यत्र पञ्चम्याऽनाधारत्वं प्रतिपाद्यत इत्युपदेशभेदात् पूर्वोक्तपरामर्शाभावान्न ज्योतिषो ब्रह्मत्वमित्याशङ्क्य परिहरति :

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ २६ ॥

नैष दोषः । उभयस्मिन्नप्यविरोधात्।मञ्चे दिव्येश्येनोक्तम्, अस्मिन् वाक्ये सर्वत्रोच्यते । सर्वत्र विद्यमानस्य दिवि विद्यमानत्वं, न विरुद्ध्यते । अतः परमित्यत्राऽतः शब्देन न तत्राविद्यमानत्वं, किन्तु ततोऽप्यन्यत्र सत्त्वं बोध्यते । तस्मात् सप्तमीपञ्चमीनिर्देशौ न विरुद्धौ॥२६॥

कौषीतकिब्राह्मणोपनिषदि इन्द्रप्रतर्दनसंवादे इन्द्रेण प्रतर्दनाय वरदाने, मामेव विजानीहितदेवाहं मनुष्याय हिततमं मन्य इत्युपक्रम्य त्वाष्ट्रवधादिनाऽऽत्मानं प्रशस्य स्वोपासनायाः पापाभावं फलत्वेन प्रतिपाद्य, कस्त्वमिति विवक्षायां, प्राणो वा अहमस्मि प्रज्ञात्मानं मामायुरमृतमित्युपास्स्वेत्युक्त्वाऽऽयुषः प्राणत्वमुपपाद्य; अमृतत्व च प्राणस्योपपाद्य, प्राणेन ह्येवामुष्मिंल्लोकेऽमृतमाप्नोतीति फलं प्रतिपादितम् । तत्र प्राण आसन्यो ब्रह्म वेति संशये, अत्र साधकासाधारणधर्मस्याभावाद् बाधकानां च विद्यमानत्वात् प्राणशब्दवाच्य आसन्य एवेति प्राप्ते, उच्यते ।

प्राणस्तथानुगमात् ॥ २७ ॥

प्राणशब्दवाच्यः परमात्मैव, कुतः ? तथानुगमात् । अस्मिन् वाक्ये पौर्वापर्येणालोच्यमाने पदार्थानां समन्वयो ब्रह्मप्रतिपादनपर उपलभ्यते । उपक्रमे वरं वृणीष्वेतीन्द्रेणोक्तः प्रतर्दनः, त्वमेव मे वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति परमपुरुषार्थं वरं वृतवान् । तस्मै हिततमत्वेनोपदिश्यमानः प्राणः कथं परमात्मा न स्यात् । न हि तदन्यद्धिततममस्ति । क्षीयन्ते चास्य कर्माणीतिश्रुतेः पापाभावोऽपि ब्रह्मज्ञान एव । प्रज्ञात्मत्वं च तस्यैव सम्भवति । उपसंहारेऽप्यानन्दोऽजरोऽमृत इति, एष लोकाधिपतिरित्यादि तस्यैवो-

पपद्यते । अतः सर्वत्रानुगमात् प्राणः परमात्मा ॥ २७ ॥

शङ्कते ।

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॥ २८ ॥

यदुक्तं, प्राणो ब्रह्म । तन्न, कुतः ? वक्तुरात्मोपदेशात् । वक्ताहीन्द्र आत्मानमुपदिशति । मामेव विजानीहीत्युपक्रम्य, प्राणो वा अहमस्मि प्रज्ञात्मानं मामायुरमृतमित्युपास्स्वेति । स एष प्राणो वक्तुरात्मत्वेनोपदिश्यमानः कथं ब्रह्म स्यात् । एवञ्च वाचो धेनुत्वोपासनवदिन्द्रस्य प्राणत्वेनोपासना बोध्यते । अन्ये ब्रह्मधर्माः प्राणस्तावका इति नेदं ब्रह्मोपाख्यानमिति चेन्न । अध्यात्मसम्बन्धभूमा ह्यस्मिन् । अस्मिन् प्रकरणे आत्मानमधिकृत्य यः सम्बन्ध आत्मनो धर्मास्तेषां बाहुल्यं प्रतीयते, एष लोकपाल इत्यादिना । यावत्प्रकरणस्य ब्रह्मपरत्वं सिद्ध्यति तावदन्यपरत्वं न युक्तमिति हिशब्दार्थः ॥ २८ ॥

नन्वेवं, मामेव विजानीहीत्याद्यात्मोपदेशः कथं सङ्गच्छत इत्याशङ्क्याह ।

शास्त्रदृष्ट्यातूपदेशो वामदेववत् ॥ २९ ॥

व्यवहारदृष्ट्योपदेशो भवेदेवायं दोषः । अत्रतु, अहं ब्रह्मेति-शास्त्रीयदर्शनेनोपदेशः । ननु तत्त्वमसि, अयमात्मा ब्रह्मेत्यादिवाक्येभ्यः स्वात्मनि ब्रह्मत्वेन दर्शनं शास्त्रदृष्टिर्नत्वन्यात्मन्यन्यस्य, तथाच प्रतर्दनस्येन्द्रात्मनि ब्रह्मत्वदर्शनं न शास्त्रदृष्टिरित्याशङ्क्याह । वामदेववत् । तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति, य एव प्रत्यबुध्यत स सर्वं भवतीत्यादिश्रुत्या वामदेवस्य यथा ज्ञानावेशात्सर्वधर्मस्फूर्तिरेवमत्रापि ब्रह्मावेशादुपदेश इति ॥ २९ ॥

ननु प्रकरणेऽस्मिन् यद्यपि भूयांसो ब्रह्मधर्माः श्रूयन्ते, तथापि, न वाचं विजिज्ञासीत वक्तारं विद्यादित्यादिजीवधर्माः । यथाऽथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति शरीरधारणात्मकमुख्यप्राणधर्मश्च प्रतीयते । अतः कथमेकान्ततोऽस्य ब्रह्मप्रकरणत्वमित्याशङ्क्य परिहरति ।

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३० ॥

न, कुतः? उपासात्रैविध्यात्। एतत्प्रकरणोक्तधर्माणां जीवधर्मत्वे मुख्यप्राणधर्मत्वे च स्वीक्रियमाणे ब्रह्मजीवमुख्यप्राणानां स्वातन्त्र्येणोपासनं त्रिविधं स्यात्। तद् वाक्यभेदप्रसङ्गान्न युक्तम्। तर्हि प्रकरणोक्तानां तद्धर्माणां का गतिरित्याशङ्क्याह। आश्रितत्वादिह तद्योगात्। जीवधर्माणां ब्रह्मणि विरोधो न, जीवस्य ब्रह्माधारत्वात् तद्धर्माणामपि ब्रह्माश्रितत्वात्। इहेत्युभयत्र सम्बद्धम्। मुख्यप्राणस्य तु ब्रह्मणि योगात् तद्धर्माणामपि तद्योगात्। अतः प्रकरणोक्तसर्वधर्माणां ब्रह्मणि सम्भवात् प्राणशब्दवाच्यं ब्रह्मेति सिद्धम्। 'अत एव प्राण,' इत्यत्र प्राणशब्दमात्रे सन्देहः। अत्रार्थेऽपि सन्देहः। बाधकधर्मा अपि वर्तन्त इति तन्निर्णयार्थं पृथगधिकरणमुक्तम् ॥ ३० ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां
प्रथमाध्यायस्य प्रथमः पादः ।

प्रथमाध्यायस्य द्वितीयः पादः ।

प्रथमे पादे कार्यप्रतिपादकानि वाक्यानि ब्रह्मपरत्वेन निर्णीय द्वितीयेऽन्तर्यामिप्रतिपादकानां तत्परत्वेन निर्णय उच्यते । तत्राथ खलु क्रतुमयः पुरुष इत्यादश्य, स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्यादि श्रूयते । तत्राग्रे सत्यसङ्कल्पादिधर्मकथनात् किं विज्ञानमयो जीवो ब्रह्मत्वेनोपास्य, उत ब्रह्मैवान्तर्यामिरूपमिति संशये, सर्वं खल्विदं ब्रह्मेति पूर्ववाक्ये जडस्य जगतो ब्रह्मत्वेनोपासनस्योक्त्वा जीवस्यापि तत्त्वेनोपासनं युक्तं, नतु मध्ये ब्रह्मनिरूपणस्य प्रसक्तिरिति जीवस्यैव ब्रह्मत्वेनोपासनोक्ताऽस्मिन् वाक्य इति प्राप्ते, उच्यते ।

सर्वत्रप्रसिद्धोपदेशात् ॥ १ ॥

अथ खल्वित्यादि ब्रह्मवाक्यमेव । कुतः, ? सर्वत्र वेदान्तेषु प्रसिद्धस्य ब्रह्मण एवोपदेशदर्शनात् । एवञ्च, क्रतुं कुर्वीतेत्युपदेशो नोपासना । परम, अशान्तस्य, निखिलजगतो ब्रह्मत्वेनोपासनेन शुद्धान्तःकरणस्य मननात्मकब्रह्मोपदेश एव युक्तो, नतु जीवोपासना । अतोऽत्रानन्दात्मकप्राणशरीरादिरूपोऽन्तर्यामी निरूप्यते, न जीवः॥१॥

ननु क्रतुमयः पुरुष इत्यादिना यथाकामं लोकान्तरीयदेहकथनात्तद्धर्मस्योपासना युक्ता, न ब्रह्मज्ञानस्येदृशं फलं युक्तमित्याशङ्क्य समाधत्ते ।

विवक्षितगुणोपपत्तेश्च ॥ २ ॥

विवक्षितो गुणो लोकान्तरे तादृशफलप्राप्तिः । सा प्रकृतेऽपि भगवत्स्वरूपलाभादुपपद्यत इति तद्धर्ममपि नान्यापेक्षा ॥ २ ॥

नन्विदं नैकान्ततो ब्रह्मवाक्यत्वसाधकम्, उपपत्तेर्जीवेऽपि सम्भयादित्याशङ्क्याह ।

अनुपपत्तेस्तु न शारीरः ॥ ३ ॥

जीवस्य तिरोहितानन्दत्वेन निराकारत्वादानन्दात्मकप्राणशरी-

रादिरूपस्यानुपपत्तेर्नायं वाक्यार्थ ॥ ३ ॥

ननु प्राप्तव्यफलरूपानन्दात्मकप्राणशरीरादेर्जीवेऽप्युपपत्तेर्नो क्तदोष इत्याशङ्क्य परिहरति ।

कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

एतमित प्रेत्याभिसम्भवितास्मीति फलवाक्ये, एत प्राणशरीरादिरूप कर्मत्वेन प्राप्तव्यत्वेन शारीर जीव च कर्तृत्वेन व्यपदिशति। अधिकरणसमाप्तिसूचकश्चकार ॥ ४ ॥

यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वैवमयमन्तरात्मन् पुरुषो हिरण्मय इति श्रूयते । तत्रोपक्रमबलीयस्त्वे जीवो वाक्यार्थ । उपसहारबलीयस्त्वे ब्रह्म वेति सशये, तत्र यत्रैकस्यान्यपरत्वेनैकार्थवाचकत्व भवति तस्य बलवत्त्वमिति पूर्वतन्त्रे व्युत्पादितत्वाच्चतुर्विधभूतनिरूपणार्थं जीवस्याराग्रमात्रस्यान्तर्हृदये प्रतिपादकत्वेन वाऽन्यार्थोपपत्तर्जीवस्यैव फलदशाया हिरण्मयत्वाज्जीव एव वाक्यार्थो, न ब्रह्मेति प्राप्त, उच्यते ।

शब्दविशेषात् ॥ ५ ॥

हिरण्मय पुरुष परमात्मैव, न जीव । फलदशायामपि नियमतस्ताहशमूर्तिश्रवणे प्रमाणाभावात् । अत शब्देनैव विशेषसोक्तत्वाद् ब्रह्मैव वाक्यार्थ ॥ ५ ॥

ननु हृदयायतन वाज्जीवस्य स एवात्र युक्तो वाक्यार्थ इत्याशङ्क्याह ।

स्मृतेश्च ॥ ६ ॥

ईश्वर सर्वभूताना हृद्देशेऽर्जुन तिष्ठतीत्यादिप्रमाणान्तरात् परमात्मैव वाक्यार्थ ॥ ६ ॥

उपक्रमप्राबल्याभिप्रायेणाशङ्क्य समाधत्ते ।

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

नन्वर्भकमोकोऽल्पं हृदयात्मकं स्थानं यस्य तत्त्वाद् व्रीह्यादितुल्यत्वव्यपदेशाच्च जीवो वाक्यार्थो, न परमात्मा व्यापकत्वादिति चेद्, नाल्पस्थानकथनं दूषणमावहति । निचाय्यत्वाद् हृदये ज्ञातुं शक्यत्वाद् व्रीह्यादितुल्यत्वव्यपदेशोऽपि न दोषाय । एवं व्योमवच्च एवं व्रीह्यादितुल्यत्वेन यत्प्रतिपादनं तद्व्योमवद्, व्योमेव चतुर्विधभूतान्तरत्वज्ञापनार्थम् ॥ ७ ॥

ननु हृदयदेशे नित्यभगवत्स्थितिश्चेत्तदा जीववत्तस्यापि सुखदुःखभोगापत्तिरित्याशङ्क्य परिहरति ।

सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥

न, कुतः ? वैशेष्यात् सर्वरूपत्वानन्दमयत्वसर्वकर्तृत्वादिर्विशेषस्तद्भावो वैशेष्यं तस्मात् । अतो हृदयस्थित्यविशेषेऽपि जीवस्यैव भोगो न ब्रह्मणः ॥ ८ ॥

यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनम् इत्यादिकठवल्लीषु पठ्यते । अत्र ब्रह्मक्षत्रयोरोदनत्वकथनात् कश्चिद्भोक्तोच्यते । स जीवो ब्रह्म वेति संशये, ब्रह्मक्षत्रभोजनस्यानुचितत्वाल्लौकिकभोक्तृत्वकथनात्, क इत्था वेद यत्र स इत्यनेन स्थानाज्ञानकथनाच्च जीव एव कश्चिदुपासनाविशेषलब्धसामर्थ्यो भोक्ता भविष्यति, न ब्रह्म, उक्तधर्मासम्भवादिति प्राप्ते, उच्यते ।

अत्ता चराचरग्रहणात् ॥ ९ ॥

अत्ता भगवानेव । कुतः ? चराचरग्रहणात् । चरः सर्वप्राणिमारणार्थं परिभ्रमन् मृत्युः, अचरं केनाप्यचाल्यं ब्रह्मक्षत्रं रूपं तयोरत्तृत्वस्य जीवेऽसम्भवात् परमात्मैवात्ता । ब्रह्मक्षत्रयोर्मुक्तिदानेन स्वस्मिन् प्रवेशस्य भोजनपदार्थत्वात्, सर्वत्र विद्यमानस्यापि गूढत्वेन स्थानाज्ञानस्य युक्तत्वाद्, बोधनार्थं लौकिकवत्कथनस्य युक्तत्वाद् ब्रह्मैव वाक्यार्थः ॥ ९ ॥

ननु जीवपरत्वेन सामञ्जस्येन वाक्यार्थोपपत्तौ किमिति ब्रह्मपरत्वं कल्प्यत इत्याशङ्क्याह ।

प्रकरणाच्च ॥ १० ॥

अस्मिन् प्रकरणे, आसीनो दूरं व्रजतीत्यादिना ब्रह्मण एव माहात्म्यं प्रतिपाद्यते । अतः प्रकरणानुरोधाद् ब्रह्मैव वाक्यार्थं इति सिद्धम् ॥ १० ॥

ऋतं पिबन्तावित्यादि तस्यैवाग्रे श्रूयते । तत्रास्य वाक्यस्योत्तरांशत्वे जीवपरत्वं, पूर्वांशत्वे ब्रह्मपरत्वमिति । किमत्र जीवद्वयं निरूप्यते, उत जीवब्रह्मणी वेति विशये ब्रह्मप्रकरणस्य सामान्यत्वेन, यस्तु विज्ञानवानित्यादिनाऽग्रे विद्वदविद्वतोर्जीवयोर्वक्ष्यमाणत्वात् प्रथममन्त्रेऽपि तयोर्निर्देश उचित । अतो बद्धमुक्तजीवपरत्वेन वाक्यार्थोपपत्तेर्जीवप्रकरणपाठाज्जीव एव वाक्यार्थ इति प्राप्त, उच्यते ।

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥

गुहा हृदयाकाशस्तत्र प्रविष्टौ जीवपरमात्मानावेव प्रतिपाद्यौ, न जीवौ, कुत ? तद्दर्शनात् तयोर्जीवब्रह्मणोर्दर्शनात् प्रतिपादितत्वात् । प्रश्न, योऽयं प्रेत इत्यादिना जीव पृष्ट । अन्यत्र धर्मादित्यादिना ब्रह्म पृष्टम् । तत्र ब्रह्म निरूप्य जीवनिरूपणे तस्य फलं निरूपयन् मध्ये तुल्यतयोभयो स्वरूपं कथयति फलभोगयोग्यत्वात् । अतो ब्रह्मपरमेव वाक्यम् ॥ ११ ॥

विशेषणाच्च ॥ १२ ॥

गुहां प्रविष्टावित्यादिविशेषणाना जीवब्रह्मपरत्वेनैव सामञ्जस्यात्प्रकाराद्यात्मानं रथिनं विद्धीत्याद्युत्तरग्रन्थपर्यालोचनादपीदं ब्रह्मवाक्यमेवेति सिद्धम् ॥ १२ ॥

य एषोऽक्षिणि पुरुषो दृश्यत इत्यादि श्रूयते । अत्र प्रतिबिम्बपुरुषस्य ब्रह्मत्वेनोपासनपरमिदं वाक्यं, ब्रह्मपरं वेति विशये ब्रह्मप्रकरणस्य समाप्तत्वाद् दृश्यत इति वचनाच्च प्रतिबिम्बस्य ब्रह्मत्वेनोपासनपरमेवेदं वाक्यं, न ब्रह्मपरमिति प्राप्त, उच्यते ।

अन्तर उपपत्तेः ॥ १३ ॥

अन्तर अक्षिणि दृश्य येनात परमात्मैव । कुत ? उपपत्तेः सर्वत्र ब्रह्मदृश्यत्वाद्यानस्यात्मैव वास्तवार्थस्य ब्रह्मदर्शनस्योपपत्ते । अत प्रतिबिम्बपुरुषस्यामाभावाच्च ब्रह्मैव वाक्यार्थं ॥ १३ ॥

स्थानादिव्यपदेशाच्च १४ ॥

अक्षिणि पुरुषो दृश्यत इत्यारभ्य, एतं संयद्वाम इत्याचक्षत इत्यादिना कर्मफललयस्थानत्वकर्मफलदातृत्वसर्वलोकभानादिधर्माणां व्यपदेशात् तेषामन्यत्रासम्भवाद् ब्रह्मैव वाक्यार्थः ॥ १४ ॥

ननूपासनापरमेवेदं वाक्यमस्तु, किमत्याग्रहेण ब्रह्मपरत्वोपपादनेनेत्याशङ्क्याह ।

सुखविशिष्टाभिधानादेव च ॥ १५ ॥

एतदमृतमभयमेतद्ब्रह्मेत्यनेनाऽमृतशब्देनानन्दमयत्वप्रतिपादनाद् ब्रह्मपरमेवेदं वाक्यम् । एषा मुख्योपपत्तिरितिसूचनार्थमेवकारः ॥१५॥

स्वरूपतो ब्रह्मपरत्वं प्रतिपाद्य फलतोऽपि तत्परत्वमाह ।

श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १६ ॥

अथ यदु चैवास्मिन् शव्यं कर्म कुर्वन्तीत्यादिना ब्रह्मविदो देवयानाऽऽख्या या गतिरुक्ता सैवाक्षिपुरुषविदोऽभिधीयते । श्रुता उपनिषद्विद्या येन तस्य गतेरभिधानादित्यर्थः । अतो ब्रह्मपरमेवेदं वाक्यम् ॥ १६ ॥

ननु तद्धर्मवत्त्वेनोपासनोपपत्तेर्गौणवृत्त्या पूर्वोक्ता उपपत्तयोऽक्षिपुरुषपरत्वेनापि सङ्गच्छन्त इत्याशङ्क्य परिहरति ।

अनवस्थितेरसम्भवाच्च नेतरः ॥ १७ ॥

इतरोऽक्षिपुरुषो नात्र वाक्यार्थः । कुतः? अनवस्थितेः अस्थिरत्वात् । अक्षिपुरुषस्यान्यसांमुख्य एव सम्भवादुपासनाकाले एकान्ते तस्याभावादस्थिरत्वम् । किञ्चोपासनं हि मनसा भवति । तत्र चाक्षिपुरुषस्यासम्भव एव । अतः सर्वत्र सदा विद्यमानत्वाद्भगवानेव वाक्यार्थ इति सिद्धम् ॥ १७ ॥

य इमं च लोकं परं च लोकं सर्वाणि च भूतान्यन्तरो यमयतीत्युपक्रम्य, यः पृथिव्यां तिष्ठन्नित्यादि श्रूयते । तत्राधिदैवमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मं चावस्थितो यमयिताऽन्तर्यामीति निरूप्यते । तत्राधिदैवाद्याधारधर्माणां षण्णामेकस्मिन्नुपादानादर्शना-

दिषु सर्वेष्वेक एवान्तर्यामी, उताधिदैवादिनामभेदाद्भिन्न इति विशये, देवादिकमधिकृत्य ये वर्तन्तेऽभिमानेन तेषामेव तत्तच्छब्दवाच्यत्वात् तत्तत्संज्ञानां ब्रह्मविषयकत्वासम्भवादन्तर्यामिब्राह्मणे तत्तदभिमानिदेवतोपासनापरं, न तु ब्रह्मपरमिति प्राप्तेऽभिधीयते ।

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥

अधिदैवादिष्वन्तर्यामी भगवानेव, नान्यः । कुतः ? तद्धर्मव्यपदेशात् । तेषां तदभिमानिनां देवानां ये धर्मास्तत्तदधिष्ठातृत्वादयस्तेषां ब्रह्मणि व्यपदेशात् । तेषां तत्सामर्थ्यं भगवत एवातस्तैर्धर्मैर्भगवानेव व्यपदिश्यते । अत इदं ब्रह्मवाक्यमेव ॥ १८ ॥

ननु वेदान्तेष्वन्तर्यामिणोऽप्रसिद्धत्वात् तस्य च कापिले प्रसिद्धत्वादन्तर्यामिनिरूपणे कपिलमतस्य श्रौतत्वापत्तिरित्याशङ्क्याह ।

न च स्मार्तमतद्धर्माभिलापात् ॥ १९ ॥

स्मार्तं सांख्यस्मृतिसिद्धमन्तर्यामिरूपमत्र नोच्यते । कुतः ? अतद्धर्माभिलापात् सत्त्वरजस्तमोरूपतद्धर्माणामनभिलापात्, पृथिवीशरीरादीनां तद्विरुद्धधर्माणामभिलापाच्च ब्रह्मैव वाक्यार्थं ॥ १९ ॥

ननु देवशरीराद्यधिष्ठातृत्वाज्जीव एव वाक्यार्थोऽस्त्वित्याशङ्क्याह ।

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ २० ॥

शारीरो जीवः, नेत्यनुवर्तते, न वाक्यार्थो भवितुमर्हति । यतो यो विज्ञाने तिष्ठन्निति काण्वाः, य आत्मनि तिष्ठन्निति माध्यन्दिना एनं जीवमन्तर्यामिभेदेनाधीयते । अतोऽन्तर्यामिब्राह्मणे ब्रह्मैवार्थो नान्य इति सिद्धम् ॥ २० ॥

अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमित्यादि मुण्डके श्रूयते । तत्र साङ्ख्याभिमतप्रकृतिसर्वधर्माणां श्रवणात् कापिलमतविषया, उत ब्रह्मविषयेति संशये, अत्र भूतयोनित्वकथनादग्रे, दिव्यो ह्यमूर्तः पुरुष इत्याद्युक्त्वा, एतस्माज्जायते प्राण इत्यादिना सृष्टिकर्तृत्वं पुरुषस्योक्तम् । एवं सति प्रकृतिपुरुषयोः सृष्टिकर्तृत्वोक्त्या सांख्यविषयेति प्राप्ते, उच्यते ।

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥

अदृश्यत्वादिगुणकः परमात्मैव । कुतः ? तथाऽक्षरात्सम्भवतीह विश्वमिति जगत्कर्तृत्वरूपब्रह्मधर्मोक्तेः । न हि वेदान्तेषु ब्रह्मादपिऽतिरिक्तस्य जगत्कर्तृत्वं क्वचि श्रुतमस्ति । अत इयं ब्रह्मविद्यैव ॥२१॥

ननु प्रकृतिपुरुषसम्बन्धिसृष्टिप्रतिपादकत्वेनैव वाक्यार्थोपपत्तौ किमिति ब्रह्मपरत्वं कल्प्यत इत्याशङ्क्याह ।

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ २२ ॥

इतरौ प्रकृतिपुरुषौ नात्र वाक्यार्थभूतौ । कुतः? विशेषणभेदव्यपदेशाभ्यां विशेषणभेदो व्यपदेशश्च ताभ्याम् । न ह्यदृश्यत्वसर्वज्ञत्वपुरुषत्वादीनि विशेषणानि प्रकृतेर्भवन्ति । न हि, दिव्यो ह्यमूर्त इत्यत्रोक्तानि विशेषणानि साङ्ख्याभिमतपुरुषस्य भवन्ति । ब्रह्मविद्यैवैषेति, सर्वत्र ब्रह्मविद्यामित्याद्युक्तेश्च व्यपदेशभेदः । अतो ब्रह्मपरत्वमेव युक्तम् ॥ २२ ॥

रूपोपन्यासाच्च ॥ २३ ॥

अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यावित्यादिरूपोपन्यासस्य प्रकृतिपुरुषयोरसम्भवाज्जगदात्मकस्य ब्रह्मण एव सम्भवाद् ब्रह्मैव वाक्यार्थ इति सिद्धम् ॥ २३ ॥

ब्रह्मणः साकारत्वमुपपादयितुमधिकरणारम्भः ।

तत्र को न आत्मा, किं ब्रह्मेत्युपक्रम्य, तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा इत्याद्याम्नायते । तत्र वैश्वानरशब्दात् संवत्सरो वा अग्निर्वैश्वानर इति, संवत्सरो वै प्रजापतिरिति च श्रुतेर्हिरण्यगर्भोपासनपरमिदं वाक्यं, किं चोपक्रमे ब्रह्मात्मपदश्रवणात्तदेकवाक्यत्वेन ब्रह्मपरमिति संशये, हिरण्यगर्भस्य समष्ट्यभिमानित्वेन लोकावयवत्वोपपत्तेस्तदुपासकस्याद्यभोजनात्मकफलस्यापि सम्भवाद् वेदगर्भत्वेनाग्नित्रयात्मकत्वस्यापि युक्तत्वाद्धिरण्यगर्भोपासनपरमिति प्राप्ते, उच्यते ।

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥

वैश्वानरपदवाच्य परमात्मैव । कुतः ? येऽस्मिन् वाक्ये हिरण्यगर्भसाधारणशब्दाः श्रुतास्तेभ्योऽपि प्रादेशमात्रस्यैव द्युमूर्धत्वादिरूपे विशेषाम्नानाद् विरुद्धसर्वधर्माश्रयत्वं सर्वभवनसमर्थपरमात्मन एव, नान्यस्य सम्भवति । अतो वैश्वानरशब्दो ब्रह्मपरः ॥ २४ ॥

एतद्वाक्यस्य ब्रह्मपरत्वे प्रमाणान्तरमुपन्यस्यति ।

स्मर्यमाणमनुमानं स्यादिति ॥ २५ ॥

केचित् स्वदेहे हृदयावकाशे, इति स्मर्यमाणं रूपं ज्ञापकं स्यात् । प्रादेशमात्रवैश्वानरस्य ब्रह्मत्वे श्रुतिस्थ 'श्रुतस्य मननात्मकस्मरणासम्भवात् । यदि प्रादेशमात्रवैश्वानरस्य ब्रह्मत्वं न स्यात्, तर्हि तस्य स्मरणं नोपपद्येतेति हेतोः प्रादेशमात्रवैश्वानरप्रतिपादकवाक्यस्य ब्रह्मपरत्वम् ॥ २५ ॥

ननु स्मरणेनैवार्थनिर्णये, स्मृतावपि 'अहं वैश्वानरो भूत्वा' इत्युक्तत्वाद्, अग्निर्वैश्वानर इति श्रौतशब्दादुपासनार्थं तस्यैव त्रेताग्निकल्पनात्, पुरुषेऽन्तः प्रतिष्ठितं वेदेत्यन्तःप्रतिष्ठानाच्च जाठरोऽग्निरेव वैश्वानरो, न ब्रह्म, विरुद्धधर्मदर्शनादित्याशङ्का परिहरति ।

शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न, तथा दृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते ॥ २६ ॥

न, कुतः ? तथा दृष्ट्युपदेशात् । ब्रह्मणः सर्वभोक्तृत्वबोधनार्थं तथा दृष्टिर्जाठरत्वेन दृष्टिरुपदिश्यते । ब्रह्मणः सर्वरूपत्वसम्भवात् । नन्वेवं स्मृत्यनुरोधाज्जाठर एव वाक्यार्थोऽस्त्वित्याशङ्क्याह । असम्भवात् । तत्र द्युमूर्धत्वादिधर्माणामसम्भवात् । उपासनार्थं तत्कल्पनं भविष्यतीत्याशङ्क्याह । पुरुषमपि चैनमधीयते वाजसनेयिनः, स एषोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेदेत्यादि । अतः पुरुषत्वं पुरुषविधत्वं वा न जाठरस्य सम्भवतीति परमात्मैव वैश्वानरः ॥ २६ ॥

ननु वैश्वानरो न उत्पत्त्यादिमन्त्रैर्देवताया महाभूताग्नेर्वा वैश्वानरपदार्थत्वमस्तीत्याशङ्का परिहरति ।

अत एव न देवता भूतं च ॥ २७ ॥

अत एव पुरुषविधत्वासम्भवादेव देवता भूतं च न वैश्वानरपदवाच्यमित्यर्थः । उपनिषद्वाक्यानां ब्रह्मपरत्वे सम्भवत्यन्यकल्पना न युक्तेति मुख्योपपत्तिः । अतो वैश्वानरो भगवानेवेति सिद्धम् ॥२७॥

अतः परं ब्रह्मणः प्रादेशमात्रत्वं स्वाभाविकं, कृत्रिमं चेति परिमाणं विचार्यते । अस्मिन् सिद्धे पूर्वोक्तविचारः सङ्गतो भवेदिति । तत्रास्मिन् विषये प्रकारभेदेन चत्वार ऋषयो वेदार्थचिन्तकाः । तौल्येन शब्दार्थबलविचारको जैमिनिः । शब्दोपसर्जनेनार्थविचारक आश्मरथ्यः । केवलार्थबलविचारको बादरिः । केवलशब्दबलविचारका आचार्याः । तत्राचार्यो विचाराविचारयोर्दोषं पश्यन् विचारमपि वदंस्तेषामवधबुद्धिव्यापनाय नामान्याह । तत्र जैमिनिमतमुपन्यस्यति ।

साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥

साक्षादपि व्यापकस्य प्रादेशमात्रत्वे कल्पनां विनापि स्वरूपेणैवाविरोधं मन्यते जैमिनिः । साकारमेव व्यापकं सर्वतःपाणिपादान्तं ब्रह्म । अतः साकारमनन्तमूर्ति च । अतः प्रादेशमात्रत्वं स्वाभाविकमिति जैमिनेर्मतम् ॥ २८ ॥

अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥

अभिव्यक्तेर्हेतोः साकारं ब्रह्म, वस्तुतो निराकारत्वेऽपि मायापगमने तावति देशे साकारमिव सच्चिदानन्दं रूपं भातीत्याश्मरथ्यो मन्यते ॥ २९ ॥

अनुस्मृतेर्बादरिः ॥ ३० ॥

यथाद्धिया त उरुगाय विभावयन्तीति वाक्यानुरोधेनानुस्मृतेर्हेतोर्ब्रह्मणः साकारत्वं, वस्तुतो निराकारमेव । अत साकाराणामतात्त्विकत्वं मन्यते बादरिः ॥ ३० ॥

सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ३१ ॥

जैमिनिमते ब्रह्मणः साकारत्वश्रवणात् तदेकदेशी नियतसाकारं मन्यमानो नियमेन प्रादेशमात्रं ब्रह्मस्वरूपं जानाति । तन्निराकरणाय जैमिनिः, सम्पत्तेरिति सम्पद्विषये प्रादेशमात्रत्वं, न नियत-

मिति वदति । ननु प्रादेशमात्रत्वस्य कथं सम्पत्तिकृतत्वमित्याशङ्क्याह । तथा हि दर्शयति। वाजसनेयिब्राह्मणे, तथा तु व एतान् वक्ष्यामि यथा प्रादेशमात्रमेवाभिसम्पादयिष्यामीति श्रुतिः प्रादेशमात्रत्वं संपत्तिकृतमिति दर्शयति । एवञ्च सम्पत्तेरेव प्रादेशमात्रत्वं, ननु प्रादेशमात्र एव वैश्वानर इत्येकदेशिनं परिहरति जैमिनिः ॥ ३१ ॥

मुख्यमाचार्यमतमाह ।

आमनन्ति चैनमस्मिन् ॥ ३२ ॥

एनं वैश्वानरमस्मिन् मूर्द्धचिबुकान्तराले जाबालाः समामनन्ति, एषोऽनन्तोऽव्यक्त आत्मा योऽविमुक्ते प्रतिष्ठित इति, सोऽविमुक्तः कस्मिन् प्रतिष्ठित इत्यादिना, भ्रुवोः प्राणस्य च यः सन्धिः स एष द्यौर्लोकस्य परस्य च सन्धिर्भवतीति । अतोऽनन्त एव व्यापक एव प्रादेशमात्रः । अनवगाह्यमाहात्म्ये भगवति विरुद्धसर्वधर्माश्रये, न विरोधसम्भावनापि । अतो ब्रह्मस्वरूपविचारे प्रमाणमेवानुसर्तव्यं, न युक्तिः । युक्तिबलेन ब्रह्मस्वरूपविचारका भ्रान्ता एव । तस्य युक्त्यगोचरत्वात् । अतः प्रादेशमात्र एव व्यापक इति वैश्वानरपदवाच्यः परमात्मैवेति सिद्धम् ॥ ३२ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां प्रथमाध्यायस्य
द्वितीयः पादः ॥ २ ॥

प्रथमाध्यायस्य तृतीयः पादः ।

द्वितीयपादे ब्रह्मण आधेयत्वं प्रतिपाद्यास्मिन् पादे आधारत्वं प्रतिपाद्यते, सर्वं ब्रह्मेति बोधनाय । यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मन इत्यादि श्रूयते । तत्र द्युपृथिव्यादीनामाधारं ब्रह्म? उत पदार्थान्तरम्? इति संशये, द्युभ्वादीनां, सूत्रे मणिगणा इव प्रोतानां भारत्वेन परमात्मनस्तद्धारकत्वासंभवाद्, अमृतस्यैष सेतुरित्युक्त्या सेतोर्गतिसाधनत्वेन ब्रह्मणः फलत्वेन तदसंभवात् स्मृतिप्रतिपाद्या प्रकृतिरेवैतद्वाक्यार्थो युक्त इति प्राप्ते, उच्यते ।

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

यस्मिन् द्यौरितिवाक्योक्तानां द्युभ्वादीनामायतनं ब्रह्मैव, कुतः स्वशब्दाद् आत्मशब्दादित्यर्थः । तथाच सर्वेषामात्मत्वेन जगदाधारत्वेन भारासंभवात् तज्ज्ञानेनाऽमृतप्राप्तिरुपचारेण सेतुत्वस्यापि संभवाद् ब्रह्मैवात्र वाक्यार्थो, नान्य इति भावः ॥ १ ॥

नन्वस्मिन् प्रकरणे एकविज्ञानेन सर्वविज्ञानमुपक्रम्यान्यवाग्विमोककथनमनुपपन्नमित्याशङ्क्याह ।

मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥

मुक्तानां देहाद्यध्यासत्यागेन जीवन्मुक्तानामुपसृप्यं ब्रह्मास्मिन् प्रकरणे व्यपदिश्यते । तदन्यवाग्विमोकं विना सर्वाध्यासराहित्यं न भवतीति तत्कथनमित्यर्थः । तत्रापि विकारस्य वाचारम्भणमात्रत्वादन्यवाग्विमोक एव, नतु प्रपञ्चस्य । तस्य ब्रह्मरूपत्वादिति भावः ॥ २ ॥

नन्वस्मिन् प्रकरणे, अरा इव ब्रह्मपुरे मनोमय इत्यादिना जडधर्माणां जडदृष्टान्तानां च निरूपणात् सांख्यनिरूपितप्रकृतिपुरुषानुमापकमेवैतत् प्रकरणमित्याशङ्क्याह ।

नानुमानमतच्छब्दात् ॥ ३ ॥

इदं प्रकरणं सांख्यमतानुमापकं नास्ति । कुतः ? अतच्छब्दात्। निःसन्दिग्धतया कोऽपि तन्मतज्ञापकः शब्दो नास्ति । आत्मसर्वज्ञानन्दरूपादयस्तु ब्रह्मवाद्ज्ञापका बहवः शब्दाः सन्ति । तद्वशात् सन्दिग्धानामपि ब्रह्मपरत्वेनैव निर्णय उचितः । अतो द्युभ्वाद्यायतनं ब्रह्मैव, न प्रधानम् ॥ ३ ॥

ननु मनोमयः प्राणशरीरनेतेति निःसन्दिग्धजीवप्रतिपादकवचनाज्जीवधर्मा जडधर्माश्च, तथा सर्वज्ञत्वादयोऽपि योगप्रभावाज्जीवविशेषधर्मा इति जडजीवविशिष्टः सांख्यवादोऽत्र प्रतिपाद्य इत्याशङ्क्याह ।

प्राणभृच्च ॥ ४ ॥

न अतच्छब्दादित्यनुवर्तते । प्राणभृज्जीवोऽपि न वाक्यार्थः । तत्प्रतिपादकशब्दाभावात् । न हि सांख्यमते आनन्दाऽमृतरूपो जीवो भवितुमर्हति ॥ ४ ॥

भेदव्यपदेशात् ॥ ५ ॥

तमेवैकं जानथेति कर्मकर्तृभावेन भेदेन व्यपदेशान्न जीवो वाक्यार्थः ॥ ५ ॥

हेत्वन्तरमाह ।

प्रकरणात् ॥ ६ ॥

ब्रह्म देवानामित्यारम्भे, स ब्रह्मविद्यामिति च तेषामेवैतां ब्रह्मविद्यामित्यन्ते च ब्रह्मविद्याया एव निरूपणेन ब्रह्मप्रकरणाद् ब्रह्मैवात्र प्रतिपाद्यमित्यर्थः । ब्रह्मैवेदममृतं पुरस्तादित्यादौ तु विस्पष्टं ब्रह्मैव प्रतिपाद्यते ॥ ६ ॥

अथापि संशये निश्चितं विशेषहेतुमाह ।

स्थित्यदनाभ्यां च ॥ ७ ॥

द्वा सुपर्णेति वाक्ये, अनश्नन्नन्यो अभिचाकशीतीत्यनेन परमात्मनः स्थितिमात्रं, जीवस्य च कर्मफलोपभोगो निरूप्यते । अतः स्थित्यदनाभ्यां जीवपरमात्मानौ परामृष्टौ सांख्यप्रतिपाद्यवैलक्षण्यमत्र गमयतः । अतो विशेषोपपत्तेः सत्त्वात् सर्वेदनयोऽत्र ब्रह्मप्रतिपादव-

साधका दृष्टा इति सुष्वाप्यायतनं ब्रह्मैवेति सिद्धम् ॥ ७ ॥

छान्दोग्ये, यो वै भूमा तत्सुखमिति सुखलक्षणमुक्त्वा भूमलक्षणं वदति, यत्र नान्यत् पश्यति नान्यद्विजानाति स भूमेति । तत्र भूमशब्देनात्र बाहुल्यमुच्यते ? ब्रह्म वेति संशयेऽस्मिन् प्रपाठके ततस्त ऊर्ध्वं वक्ष्यामीति सनत्कुमारेण नारदं प्रत्युत्तरोत्तरं बाहुल्यकथनस्य प्रतिज्ञातत्वात् सुखपर्यन्तमुत्तरोत्तरं भूयस्त्वमुक्त्वाऽग्रे सुखस्य फलत्वात् सुषुप्तावेव तस्याभिव्यक्तेः सुषुप्तिरेव, यो वै भूमेति वाक्ये भूमत्वेनोच्यते । सुखाभिव्यञ्जकत्वेन सुखापेक्षयापि तस्या अन्तरङ्गत्वादतो न ब्रह्मवाक्यमिदमिति प्राप्ते, उच्यते ।

भूमा सम्प्रसादादध्युपदेशात् ॥ ८ ॥

अत्र भूमा भगवानेव । कुतः? संप्रसादादध्युपदेशात् । संप्रसादः सुषुप्तिः, तस्मादधि आधिक्येनोपदेशात् । यत्र नान्यत् पश्यतीत्यादिधर्माणां सुषुप्तिसाम्येऽपि, स एवाधस्तादित्यादिना सर्वरूपत्वादयोऽधिका धर्मा उच्यन्ते । न हि ते सुषुप्तौ सम्भवन्ति । एवं सत्यप्रत्यात्मशब्दस्यापि सामञ्जस्यम् । प्रकरणस्यान्यपरत्वे तत्र लक्षणा स्यात् । लोके बाहुल्यवाचकत्वेन भावशब्दत्वेऽपि भूमशब्दस्य, भगवतः सर्वरूपत्वादत्र भगवद्वाचकत्वे न दोषः । अतोऽत्र भूमा भगवानेव ॥ ८ ॥

धर्मोपपत्तेश्च ॥ ९ ॥

अस्मिन् प्रकरणे, नान्यत् पश्यतीत्यादिनाऽन्यादर्शनादयो गुणा उक्ताः । ते भगवत्येवोपपद्यन्ते, नान्यत्र । चकारात्, स वा एष एवं पश्यन्नित्यारभ्य सहस्राणि च विंशतिरित्यन्तेनोक्तं फलमपि तस्य भगवद्विद एवोपपद्यते । तस्माद् भूमशब्दं ब्रह्मैवेति सिद्धम् ॥ ९ ॥

गार्गिब्राह्मणे, कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति, स होवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वित्यादि पठ्यते । तत्राक्षरशब्देन पदार्थान्तरमत्रोच्यते ? ब्रह्म वेति संशये, अचेतनसाधारणस्य, ओतप्रोतत्वकथनेन, वर्णतुल्यत्वस्य च प्रतीतेराकाशवद्ब्रह्मपरत्वमेवोचितम् । अत्र विरुद्धधर्माणामाशङ्का नि-

राकरणाददृश्यत्वाद्यधिकरणेन गतार्थत्वं न शङ्क्यम् । तत्र सन्दिग्धधर्माणामेव ब्रह्मधर्मत्वेनोपपादनात् । अतो भूतसूक्ष्मं वा, प्रकृतिर्वात्र प्रतिपाद्यते । किञ्चात्र प्रापञ्चिकसकलधर्मराहित्यं ब्रह्मधर्मोऽक्षर उच्यते । तदुपासनार्थं भविष्यति । अतोऽक्षरशब्देनान्यदेव ब्रह्मधर्मयुक्तत्वेनोपास्यमत्रोच्यत इति प्राप्ते, उच्यते ।

अक्षरमम्बरान्तधृतेः ॥ १० ॥

अक्षरशब्दवाच्यमत्र परमात्मैव । कुतः ? अम्बरान्तानां पृथिव्यादीनां धारकत्वेनोक्तेः । न हि ब्रह्मातिरिक्ते सर्वधारकत्वं सम्भवति । अक्षरपदोक्तिः परोक्षेण ब्रह्मनिरूपणार्था । अन्यपरत्वसन्देहवारणाय ब्रह्मधर्मकथनम् । अतोऽक्षरपदवाच्यं ब्रह्मैव ॥ १० ॥

ननु यस्मिन् द्यौः पृथिवी चेति वाक्ये, असाधारणब्रह्मधर्मान्तरदर्शनाद् विधारणं च ब्रह्मधर्म इत्युक्तम् । ननु सर्वत्र तस्य ब्रह्मधर्मत्वे प्रमाणमस्तीत्याशङ्क्याह ।

सा च प्रशासनात् ॥ ११ ॥

सा च अम्बरान्तधृतिरस्मिन्नपि वाक्ये ब्रह्मधर्म एव । कुतः ? प्रशासनात् । एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत इतिश्रुत्युक्तप्रशासनाद्धेतोर्विधृतिर्ब्रह्मधर्म एव । अप्रतिहताज्ञाशक्त्यात्मकप्रशासनस्य ब्रह्मधर्मत्वात् ॥ ११ ॥

ननूपासनार्थं ब्रह्मधर्मनिरूपणमित्याशङ्क्याह ।

अन्यभावव्यावृत्तेश्च ॥ १२ ॥

अन्यस्य भावोऽन्यभावः । अब्रह्मधर्म इति यावत् । तस्यात्र व्यावृत्तिः क्रियते । नात्र तादृशो धर्म उक्तोऽस्ति, योऽब्रह्मण्युपासनार्थं भवेत् । यो वा एतदक्षरमविदित्वा गार्गीत्यादिनाऽस्मिन् प्रकरणे शुद्धब्रह्मप्रतिपादनमेव, न तूपासनाप्रतिपादनमिति चकारेण सूच्यते । अतोऽक्षरशब्दवाच्यं ब्रह्मैवेति सिद्धम् ॥ १२ ॥

प्रश्नोपनिषदि पञ्चमप्रश्ने, एतद्वै सत्यकामः परं चापरं ब्रह्म यदोङ्कार इत्यादिनैकद्विमात्रोपासनया फलविशेषं निरूप्य अर्धचतुर्थमात्रोपासनया परं पुरुषमभिध्यायीतेत्युक्त्वाऽग्रे परात्परं

पुरिशयं पुरुषमीक्षत इति फलमुक्तम्। तत्र पुरुषमभिध्यायीतेत्यत्र ध्यानविषयो विराट् पुरुषो ब्रह्म वा, परमात्मैव वेति संशये पूर्वमोङ्कारोपासनाकथनेनात्राप्यमुख्यप्रवाहपतितत्वाद् विराट् पुरुष उपासनाविषयः। अथवाग्रे परात्परमिति कथनात् सर्वेभ्यः परो ब्रह्म परपुरुष एवात्रोपास्योऽस्त्विति प्राप्ते, उच्यते।

ईक्षतिकर्मव्यपदेशात् सः ॥ १३ ॥

सः, अभिध्यानविषयः परपुरुषः परमात्मैव। कुतः? ईक्षतेः कर्मत्वेन व्यपदेशात्। जीवघनात् केवलजीवाधारभूताद् ब्रह्मलोकात् परुरुपपुरुषदर्शनमीक्षत्यर्थः। तत्कर्म ब्रह्मैव भवितुमर्हति। तदेव ध्यानकर्मत्वेनाप्युच्यते। उभयोरेकत्वात्। ध्यानफलं परपुरुषदर्शनं ब्रह्मसाक्षात्कार ईक्षतिनोच्यते। न तदन्यध्यानफलं भवितुमर्हति। अतो ध्यानविषयः परमात्मैवेति सिद्धम् ॥ १३ ॥

अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वा व विजिज्ञासितव्यमित्यादि छन्दोग्ये श्रूयते। तत्र दहराकाशो जीवो? ब्रह्म वेति संशयः। तत्र स्पष्टार्थाग्रिमप्रजापतिप्रकरणे अमृताभयरूपत्वेन जीवस्यैव निरूपणादेतत्प्रकरणस्यापि तेनैकार्थत्वस्योचितत्वादत्रापि दहरपदार्थो जीवो भवितुमर्हति, न ब्रह्म। प्रजापतिप्रकरणाद्र्थान्तरप्रसक्तेरिति प्राप्ते, उच्यते।

दहर उत्तरेभ्यः ॥ १४ ॥

दहरः परमात्मा, न जीवः। कुतः? उत्तरेभ्यः, उत्तरसूत्रेषु वक्ष्यमाणहेतुभ्यः। तेषामपि ब्रह्मपरत्वस्य साधनीयत्वात् सामान्यरूपेण कथनम्। अतोऽग्रिमप्रकरणस्यापि ब्रह्मपरत्वेनैव निर्णयादिदं प्रकरणद्वयं ब्रह्मपरं, न तु जीवस्य ब्रह्मत्वेन निरूपणपरम्। तस्माद् ब्रह्मैव दहरपदवाच्यम् ॥ १४ ॥

उत्तरहेतुषु हेतुद्वयमाह।

गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च ॥ १५ ॥

गतिः शब्दश्च ताभ्याम्। गतिर्ब्रह्मलोकगतिः, एवमेवेमाः

सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्तीति, एष आत्माऽपहतपाप्मा सत्यकामः सत्यसङ्कल्प इति केवलब्रह्मवाचकाः शब्दाश्च । ताभ्यामत्र दहरशब्दवाच्यं ब्रह्मैव । नन्वहरहर्गमनं जीवस्यैव स्वप्नमायामनोरथादिषु युक्तम् । तथा अपहतपाप्मादयो जीवस्य ब्रह्मरूपत्वाज्जीवपरा एव शब्दा युक्ता इत्याशङ्क्याह । तथाहि दृष्टम् । गतिशब्दौ ब्रह्मण्येव युक्तौ, न जीवे । गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्तीति कथनाद् ब्रह्मविषयिण्येवात्र जीवानां गतिः प्रतिपाद्यते, न स्वप्नमायामनोरथादिगमनम् । सुषुप्तौ सुखमहमस्वाप्सं, न किञ्चिदवेदिषमित्यनुभवात् । जीवानां मायावेष्टनेन दोषयुक्तत्वाद- पहतपाप्मत्वासम्भवश्च । जीवस्य ब्रह्मरूपत्वमपि न । अंशो नाना- व्यपदेशादित्यनेन भगवदंशत्वेनैव वक्ष्यमाणत्वात् । अतो गतिशब्दौ ब्रह्मविषयौ युक्तौ, न जीवपरौ । तथा लिङ्गं च वर्तते गतिशब्दयोर्ब्रह्मपरत्वनिरूपणे । अत्र गतिविषयस्य ब्रह्मलोकशब्देन नित्यत्वनिरूपणान्मनोरथादिकल्पितलोकानां, यथैवेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति श्रुत्या क्षयिष्णुत्वकथनाद् ब्रह्मविषयिण्येवात्र गतिः प्रतिपाद्यते । अपहतपाप्मब्रह्मलोकादयः शब्दा ब्रह्मपरा एव युक्ता, न जीवपराः । एतं ब्रह्मलोकं न विन्दन्तीति कथनात् । जीवस्य स्वाज्ञानासम्भवात् । अतो लिङ्गादपि गतिशब्दयोर्ब्रह्मपरत्वं युक्तम् । चकारात्, तमेव विदित्वेति श्रुत्या ब्रह्मणो ज्ञानं मोक्षाय, नत्वात्मनो ब्रह्मत्वेन ज्ञानमित्युक्तम् । अतो दहरशब्दवाच्यं ब्रह्मैव ॥ १५ ॥

हेत्वन्तरमाह ।

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १६ ॥

अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदायेति श्रुत्युक्तविधारणं ब्रह्मण एव सम्भवति, नान्यस्य । चकारात्त सेतुत्वमपि तस्यैव । ननु परिदृश्यमानस्य जगतो महत्त्वादतिसूक्ष्मत्वादाकाशस्य तद्धारणासम्भवाद् वासनारूपेण जगतो विद्यमानत्वाद्रूपं गौणं धारणं वाच्यम् । तच्च जीव एव सम्भवतीति, न धारणात्मकहेतोर्ब्रह्मत्वसाधकत्वमित्याशङ्क्याह । अस्य धारणात्मकस्य महिम्नोऽस्मिन् ब्रह्मण्येवोपलब्धेः । यदत्र गौणं धारणमुच्यते, तर्हि तस्य संसारिध-

मैमहिमा न स्यात्। विरुद्धधर्माश्रयत्वं तु ब्रह्मण्यनेकप्रमाणसिद्धत्वाद् भूषणतामावहति। अत एतादृशमहिम्नो जीवेऽसम्भवाद् दहरः परमात्मैव ॥ १६ ॥

प्रसिद्धेश्च ॥ १७ ॥

एतत्प्रकरणोक्तानामाकाशशब्दवाच्यत्वापहतपाप्मत्वादिनिखिलधर्माणां ब्रह्मण्येव प्रसिद्धेर्ब्रह्मैव दहरपदवाच्यं, न जीवः। विधिमुखेनाधिकरणसमाप्तिसूचकश्चकारः ॥ १७ ॥

इतरनिषेधद्वारा पुनर्विचारयति। ननु ब्रह्मस्वरूपं जीवस्वरूपं च श्रुत्येकसमधिगम्यमिति, यथा ब्रह्मणोऽसाधारणधर्मदर्शनादिदं प्रकरणं ब्रह्मण इति निर्णीयते, तथात्र जीवस्यासाधारणधर्मदर्शनात् तस्यैवेदं प्रकरणमिति निश्चिते, यावान् वाऽयमाकाशस्तावानेषोऽन्तर्हृदयमाकाश इत्याकाशतुल्यत्वादयो धर्मा जीवस्यैव भविष्यन्तीति नास्मिन् प्रकरणे ब्रह्मप्रतिपादनमिति सूत्रार्द्धेनाशङ्क्य समाधत्ते।

इतरपरामर्शात् स इति चेन्नासम्भवात् ॥ १८ ॥

इतरो जीवः, तस्य परामर्शाद् उपक्रमोपसंहारमध्येषु, अथ य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरूपं सम्पद्य स्वेन रूपेणाभिनिष्पद्यत इत्यादिष्वभिनिष्पत्तिकथनेन जीवस्यैव परामर्शात् स जीव एवात्र प्रतिपाद्यत इति चेन्न। जीवे जगदाधारत्वादिधर्माणामसम्भवात्। जीवपरामर्शस्त्वन्यार्थ इत्यग्रे वक्ष्यति। अतो दहरशब्दवाच्यो न जीवः ॥ १८ ॥

उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १९ ॥

उत्तरात् प्राजापत्यप्रकरणात्। तत्र मनोरूपदिव्यचक्षुषि प्रतीयमानो जीव एवाऽमृतोऽभयरूप उक्तः। तस्यैव जाग्रत्स्वप्नसुषुप्तिसाक्षित्वमुक्त्वा सर्वत्र तस्याऽमृतरूपत्वं निरूपितमिति जीवेऽपि तादृशधर्मसम्भवादुत्तरप्रकरणानुरोधादत्रापि जीवो वाक्यार्थ इत्याशङ्क्याह। आविर्भूतस्वरूपस्तु। तुशब्देन पक्षं व्यावर्तयति। जीवे तादृशधर्मवत्त्वं न दूष्यते, किन्त्वाधिकं किञ्चिदुच्यत इति नकारप्रयोगाऽभावः। जीवे यदा भगवदाविर्भावो भवति तदा ते धर्मा आविर्भव-

न्ति, नतु सहजासो जीवे वर्तन्ते । अत उपदेशावसरे भगवदाविर्भावेन सर्वत्र भगवन्तं पश्यन् प्रजापतिरिन्द्रात्मन्यपि तथैवोक्तवान् । एवमन्यत्रापि जीवे भगवद्धर्मकथनं भगवदावेशप्रयुक्तमिति बोध्यम्। अतो न जीवो दहरः ॥ १९ ॥

ननु तर्ह्यादिमध्यावसानेषु जीवपरामर्शस्य किं प्रयोजनमित्याशङ्क्याह ।

अन्यार्थश्च परामर्शः ॥ २० ॥

अन्य एवार्थः प्रयोजनं यस्य परामर्शस्य स तथा । एवं च स्वस्य ब्रह्मज्ञानेन ब्रह्मधर्मवत्त्वं भवतीति ज्ञाने सति ब्रह्मज्ञानार्थं प्रयत्नो भवति, तेन ब्रह्मात्मकत्वं फलं च भवतीति बोधनार्थं जीवपरामर्श इत्यर्थः । चकारादेतादृशप्रयत्ने भगवदाविर्भावो भवतीति सूचितम् । अतो जीवपरामर्शदर्शनाज्जीवप्रतिपादनमत्रेति न भ्रमितव्यम् ॥ २० ॥

ननु परामर्शवशेन प्रकरणोक्तधर्माणां जीव उपपत्त्या च न प्रकरणस्य जीवपरत्वं कल्प्यते, किन्तु प्रकरणोक्तधर्माणां ब्रह्मण्यनुपपत्त्या जीवपरत्वकल्पनमिति सूत्रेणाशङ्क्य समाधत्ते ।

अल्पश्रुतेरिति चेत्तदुक्तम् ॥ २१ ॥

अल्पे पुण्डरीके अवस्थानश्रुतेर्ब्रह्मणो व्यापकत्वेन तत्रासम्भवाज्जीवस्य त्वाराग्रमात्रत्वेन तत्र सामञ्जस्याज्जीवोऽत्र निरूप्य इति चेत्। इदं तु पूर्वमुक्तं, निचाय्यत्वादेवं व्योमवच्चेत्यत्र । हृदयकमले ब्रह्मणो निचाय्यत्वाद् द्रष्टुं शक्यत्वात् तदायतनत्वेन निरूप्यते इति तदर्थः । विरुद्धधर्माश्रयत्वं तु भूषणमेव । अतो दहरशब्दवाच्यो भगवानेवेति सिद्धम् ॥ २१ ॥

दहराकाशेऽग्निवायुसूर्यादीनां वर्तमानत्वं दहरस्वरूपनिरूपणं उक्तमिति, तद्विरुद्धवाक्यमाशङ्क्य परिहरति । न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः, तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रूयते । तत्र यद्यप्यत्र ब्रह्मप्रकरणादिदं वाक्यं ब्रह्मपरमिति भाति, तथापि दहरनिरूपणे सूर्यादीनां तत्र विद्यमानत्वमुक्तम् । तत्रैव चेत्तेषामभानं स्यात् तदा कुत्र भास-

न्त इति नास्मिन् वाक्ये ब्रह्मनिरूपणं, किन्तु सत्यलोकस्थितस्तेजोविशेषः कश्चिदत्र निरूप्योऽस्ति यत्र सूर्यादीनामभानमिति प्राप्ते, उच्यते।

अनुकृतेस्तस्य च ॥ २२ ॥

तमेव भान्तमनुभाति सर्वमित्यनेन सूर्यादिभानस्य भगवदनुकृतिनिरूपणार्थत्वादस्मिन् वाक्ये ब्रह्मैव प्रतिपाद्यं, नार्थान्तरम्। न तत्र सूर्यो भातीत्यादिना तेषां स्वतो भानं निषिध्यते। किञ्च, तस्य भासा सर्वमिदं विभातीत्यनेन सूर्यादीनां स्वतो भानं नास्तीत्युच्यते। सर्वोऽपि पदार्थो भगवद्भासनमनुकरोति सूर्यं रश्मय इवेति। अत इदं ब्रह्मवाक्यमेव ॥ २२ ॥

उक्तेऽर्थे संमतिमाह।

अपि स्मर्यते ॥ २३ ॥

न तद्भासयते सूर्य इति, यदादित्यगतं तेजो जगद्भासयतेऽखिलम्, यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति च गीतायां स्मर्यते। अपीति समुच्चयः। अतः सर्वावभासको भगवानेव, तमेव सर्वमनुकरोतीति निरूपणादिदं वाक्यं ब्रह्मपरमेवेति सिद्धम् ॥ २३ ॥

पुनर्वाक्यान्तरमाशङ्क्य परिहरति। अङ्गुष्ठमात्रः पुरुषो मध्ये आत्मनि तिष्ठति, ईशानो भूतभव्यस्येति, अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमक इति च श्रूयते। तत्र यावान् वा अयमाकाश इति दहरपदवाच्यब्रह्मणो व्यापकत्वश्रवणादत्र चाङ्गुष्ठमात्रश्रवणेन विरोधाल्लोकान्तरगमनयोग्यदेहयुक्त उपासनार्थमीशानत्वादिधर्मवान् जीव एवात्र प्रतिपाद्यो, न भगवानिति प्राप्ते, उच्यते।

शब्दादेव प्रमितः ॥ २४ ॥

अत्रेशान इति शब्दादेवाङ्गुष्ठप्रमितो भगवानेवोच्यते। यथा दहरवाक्ये सूक्ष्मस्यैव व्यापकत्वमुक्तं, तथाऽत्राङ्गुष्ठमात्रस्यैवेशानत्वमुक्तम्। नहीश्वरादन्यो भवितुमर्हति। अतोऽङ्गुष्ठमात्रो भगवानिति सिद्धम् ॥ २४ ॥

ननु श्रुतौ भगवतो माहात्म्यार्थं विरुद्धधर्माश्रयत्वमनेकरूपत्वं चोच्यते । तत्र प्रादेशमात्रत्वं ध्यानार्थमुक्तम् । अङ्गुष्ठमात्रत्वस्य तु प्रयोजनं न पश्याम इत्याशङ्क्याह ।

हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ २५ ॥

निष्प्रयोजनत्वव्यावर्तकस्तुः । प्रयोजनमाह । *हृदि अङ्गुष्ठ*मात्रं निरूप्यते । तत्र हेतुः । अपेक्षया, । ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठतीति स्मृत्युक्तनियमनात्मकेश्वरकार्यापेक्षया । ननु प्रादेशादिमात्रेणैव नियमनं भविष्यतीत्याशङ्क्याह । मनुष्याधिकारत्वात् । मनुष्याधिकारेणैव मृत्यूपाख्यानप्रवृत्तेर्मनुष्यहृदयास्याङ्गुष्ठमात्रत्वात् तत्परिमाणमेवोक्तम् । अतोऽङ्गुष्ठमात्रोऽत्र परमात्मैवोच्यत इति सिद्धम् ॥ २५ ॥

ननु मनुष्यहृदयापेक्षया ब्रह्मणोऽङ्गुष्ठमात्रोक्तेर्ब्रह्मविद्यायां मनुष्याणामेवाधिकारो, न देवादीनामित्याशङ्कायामाचार्यः स्वमतेन समाधत्ते ।

तदुपर्यपि बादरायणः सम्भवात् ॥ २६ ॥

तेषां मनुष्याणामुपरि विद्यमानानां साध्यादीनामपि ब्रह्मविद्यायामधिकारं बादरायणो मन्यते । कुतः ? तेषां सातिशयधर्मज्ञानजनितविशिष्टजन्मवत्त्वेन तादृशाधिकारस्य सम्भवात् । अत्र जैमिनिप्रभृतीनां विप्रतिपत्तेः स्वनामग्रहणम् । धर्मयुक्तत्रैवर्णिकेभ्यो हीनानां तु वेदाध्ययनाभावादेवानधिकारः सिद्धः । तदुपरितनानां तु, यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणामिति श्रुत्वा ब्रह्मज्ञानेन मोक्षश्रवणात् तेषामधिकारः सिद्धः ॥२६॥

ननु देवादीनामुत्तरकाण्डोक्तज्ञानाधिकारे स्वीक्रियमाणे पूर्वकाण्डोक्तवेदाध्ययनोपनयनयज्ञादिष्वप्यधिकारो वक्तव्यः । स तु तेषां *ब्राह्मण्याभावाद्* द्रव्याभावाद् देवतान्तराभावाच्च न सम्भवति । तदभावेऽपि यागादौ क्रियमाणे वेदविरोध इति सूत्रार्द्धेनाशङ्क्य परिहरति ।

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥२७॥

नैवं वक्तुं शक्यते । श्रुतौ, साध्या वै देवाः सत्रमायन्नित्यादिनाऽनेकानां प्रतिपत्तिः कर्मणि प्रवृत्तिः, तस्या दर्शनात् । एकशतं वर्षाणि प्रजापताविन्द्रो ब्रह्मचर्यमुवासेति श्रुत्या ज्ञानेऽपि प्रवृत्तिदर्शनादुपरितनानामपि ज्ञानकर्माधिकारः सिद्धः ॥ २७ ॥

ननु देवादीनां कर्मकरणे विरोधाभावेऽपि शब्दे वैदिके विरोधो भविष्यति । वेदार्थज्ञानानन्तरं हि कर्मकरणं सम्भवति । तत्र साध्यादीनां कर्मकरणं वेद एवोच्यते, तज्ज्ञात्वा साध्यादीनां कर्मकरणं विरुद्धम् । साध्यान्तरकल्पने त्वनवस्था स्यात् । सोऽग्निष्टोमेन यसुनयाजयदित्यत्रोत्पन्नानां वसूनां वृत्तान्तकथने तु नित्यानित्यसंयोगविरोधाद् वेदस्याप्यनित्यत्वं स्यादित्याशङ्क्य परिहरति ।

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ॥ २८ ॥

न, शब्दोक्तानां साध्यादिपदार्थानाम् अतः शब्दादेव प्रभवात् प्रकाशनात् । लौकिकघटादिपदार्थेभ्यो भगवदवयवभूताः सच्चिदानन्दात्मका वैदिका घटादयः पदार्था भिन्ना एवाङ्गीकर्तव्याः । तत्प्रतिपादकत्वाद् वेदस्य न नित्यानित्यसंयोगः । तत्र प्रमाणमाह । प्रत्यक्षानुमानाभ्याम् । इदानीमेव प्रत्यक्षं यजमानो यजमानकल्पम् ऋत्विजोऽपि स्वकृत्यं वेदादेव जानन्ति । जमदग्नीनां पञ्चावत्तमित्यत्र तु स्वस्मिञ्जामदग्न्यत्वमनुमाय पुरोडाशादिषु पञ्चावत्तत्वं कुर्वन्ति । यजमानत्वं प्रत्यक्षगम्यं, जामदग्न्यत्वमनुमानगम्यम् । अतो वेदबोधितभगवदवयवात्मकयजमानादीनां तत्तत्संस्कारैः स्वस्मिन्नावेशात् तत्तत्कार्यकरणं युज्यते । अतोऽलौकिकपदार्थप्रतिपादकत्वाद् वैदिकशब्दे न विरोध इति सिद्धम् ॥ २८ ॥

विशेषोपपत्ति पूर्वोक्तस्योपष्टम्भिकामाह ।

अत एव च नित्यत्वम् ॥ २९ ॥

अत आधिदैविकपदार्थप्रतिपादकत्वादेव वेदस्य लौकिकप्रपञ्चवैलक्षण्येन नित्यत्वं ज्ञेयम् । चकाराच्छन्दब्रह्मवेदपुरुषादिशब्दवाच्यत्वं च ज्ञेयम् । अत आधिदैविकपदार्थनिरूपकत्वाद् वेदस्य नित्यत्वं सिद्धम् ॥ २९ ॥

ननु वेदवाच्यानामाधिदैविकघटादीनामतीन्द्रियत्वेन व्यवहारविषयत्वाभावाद् वैदिकपदार्थेषु शक्तिग्रहार्थं लौकिकपदार्थोऽपेक्षित । लौकिकप्रपञ्चस्य वैदिकप्रपञ्चानुकारित्वात् । तथा सति लौकिकप्रपञ्चस्य सृष्टिप्रलयसत्त्वात् तथैव नित्यानित्यसयोगदोषप्राप्तिरित्याशङ्क्याह ।

समाननामरूपत्वादावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥ ३० ॥

यद्यपि लौकिकप्रपञ्चस्यापि ब्रह्मात्मकत्वात् तस्याप्याविर्भावतिरोभावावेव, नाशोत्पत्तिप्रतीतिर्भ्रान्तेस्तथापि लौकिकप्रतीत्यनुसारेणावृत्तावप्युत्पत्तिप्रलयसत्त्वेऽपि समाननामरूपत्वात् प्रलये ब्रह्मणि लीनस्य घटादिपदार्थस्य सृष्टिकाले तथैव नामरूपविशिष्टस्योद्गमाद् भेदकान्तराभावाज्जलप्रवाहवन्नित्यत्वेन प्रतीतेर्न नित्यानित्यसयोगात्मको विरोध । कुत ? दर्शनात् । वेदपितृमातृस्त्रीशरीरगङ्गादिषु तद्देवेदमितिव्यवहारदर्शनात्, सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदित्यादिश्रुतिदर्शनाच्च । प्रजा सृज यथापूर्वं याश्च मय्यनुशेरते इत्यादिस्मृतेश्च । ऋषीणा पूर्वचरितस्मरणात्मकसर्वस्मृतेश्च । अतो न शब्द कोऽपि विरोध ॥ ३० ॥

अर्थबलविचारण पूर्वपक्षमाह ।

मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॥ ३१ ॥

ननु, असौ वा आदित्यो देवमधित्यादिनोक्तमधुविद्यायां सूर्यस्य देवमधुत्वनोपासनोक्तस्तदुपासनायां सूर्यस्य कर्तृत्वासम्भवादेव देवतान्तरोपासनास्वपि तत्तद्देवानां कर्तृत्वासम्भवात् सर्वत्र ज्ञान कर्मणि च देवानामनधिकार इति जैमिनिराचार्यो मन्यते ॥३१॥

ज्योतिषि भावाच्च ॥ ३२ ॥

ज्योतिश्चक्रे नक्षत्रादिरूपेण भोगकरणदर्शनाद्, अग्नि पुच्छस्य प्रथमं काण्डमित्यादिश्रुतेश्च तेषां प्राणिभ्यांगां सर्वोपास्यानां ज्ञानकर्मणोरुपयोगाभावादनधिकारो देवानामिति प्राप्त ॥ ३२ ॥

बादरायण स्वमतेन सिद्धान्तमाह ।

भावं तु बादरायणोऽस्ति हि ॥ ३३ ॥

पूर्वपक्षव्यावर्तनार्थं तुः । भावं देवानां ज्ञानकर्माधिकारसद्भावं बादरायण आचार्यो मन्यते । किमलौकिकज्ञानेनाधिकारं मनुते ? । तर्ह्यलौकिकज्ञानं जैमिनेरप्यस्तीति तुल्यबलत्वाद् विकल्पापत्तिरित्याशङ्क्याह । अस्ति हि । देवा वै सत्रमासतेत्यादिभिः, तद्यो देवानां प्रत्यबुध्यत स एव तदभवदित्यादिभिश्च श्रुतिभिर्देवानामपि ज्ञानकर्माधिकारोऽस्ति । हि युक्तोऽयमर्थः । यत्र मध्वादिविद्यासु सूर्यादिदेवानामुपास्यत्वं दृश्यते, ते देवा भगवदवयवभूता आधिदैविका भिन्ना एवातस्तेषामुपासनमाधिभौतिकानामेतत्सूर्यादीनां युक्तमेवेतिभावः । नच पूर्वकल्पीया वस्वादय एतत्कल्पीयवस्वादीनामुपास्या इति वाच्यम् । तेषामनित्यत्वेनानुपास्यत्वात् तेषामुपास्यत्वबोधकवेदस्यानित्यत्वप्रसङ्गाच्च । अतो भगवदवयवात्मकाधिदैवानामुपास्यत्वबोधकदेवानामप्यधिकारोऽस्तीति सिद्धम् ॥ ३३ ॥

प्रसङ्गाच्छूद्रस्याधिकारमाशङ्क्य परिहरति । छान्दोग्ये, अह हारे त्वा शूद्र तवैव सह गोभिरस्त्विति शूद्रनेन मुखेनालापयिष्यथा इति च जानश्रुतिं शूद्रत्वेन सम्बोध्य रयिकः संवर्गविद्यामुक्तवान् । अतो यथा, एतया निषादस्थपतिं याजयेत, हविष्कृदाधावेति शूद्रस्येति लिङ्गात् कर्मविशेषे शूद्रस्याधिकार एवमिहापि संवर्गविद्यायां शूद्रस्याधिकार इत्याशङ्क्य परिहरति ।

शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि ॥ ३४ ॥

अस्य जानश्रुतेः, तदनादरश्रवणात्, कंवर एनमेतत् सन्तं सयुग्वानमिव रयिकमात्थेति, तस्माद् हंसादनादरश्रवणात् शुक् शोको जातः । तेन किं जातमित्याकाङ्क्षायामाह । तदाद्रवणात् तत् तदनन्तरम् आद्रवणाच्छूद्रत्वं जातमित्यर्थः । शुचमनु आद्रवतीति शूद्रः । पृषोदरादित्वात् सिद्धः । ननु योगापेक्षया प्रबलत्वाद् रूढेर्जातिशूद्रवाचकत्वं कुतो न भवतीत्यत आह । सूच्यते हि । क्षत्रियं प्रति परोक्षवादेन शूद्रसम्बोधनेन हंसवाक्यजनितशोकवत्त्वसूचनात् तद्वृत्तान्ताभिज्ञत्वेन स्वस्य सर्वज्ञत्वं सूच्यते । ब्रह्मविदां सर्वज्ञत्व

युक्तमिति हि शब्दार्थः । अत शुच प्रत्याद्रवणाज्जानश्रुतिं प्रति शूद्रेति सम्बोधनं न जातिशूद्रत्वेन ॥ ३४ ॥

ननु जानश्रुतेर्जातिशूद्रत्वाभावे किं नियामकमत आह ।

क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३५ ॥

जानश्रुतेर्गोनिष्करथकन्यादिपदार्थानां रयिक्वाय दानात् क्षत्रियत्वमवगम्यते । नहि क्षत्रियादन्यो ब्राह्मणायैतद्दातुमर्हति । चकाराद् विद्योपदेशोऽप्यन्यस्य न सम्भवतीति । ननु गवादिपदार्थानामन्यस्यापि वदान्यस्य धनवतो दानसम्भवाश्चेदमेकान्ततः क्षत्रियत्वसाधकमित्याशङ्क्याह । उत्तरत्र चैत्ररथेन लिङ्गात् । उत्तरत्र सवर्गविद्योपासने, अथाह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिमिति क्षत्रियब्राह्मणावुक्तौ । अतोऽत्रापि क्षत्रियब्राह्मणावेव युक्तौ, न शूद्रब्राह्मणौ । कक्षा चित्रा सेना यस्य स कक्षसेनः । तस्यापत्यं काक्षसेनिः । स एव सूत्रे चैत्ररथशब्देनोक्तः । चित्रा रथा यस्य स चित्ररथः, तस्यापत्यं चैत्ररथ इत्यर्थात् । चैत्ररथस्याभिप्रतारिणः क्षत्रियत्वं तु, एतेन वै चित्ररथं कापेया अयाजयन्निति श्रुत्यन्तराद् बोध्यम् । शौनकः कापेयो याजकः । याज्यश्च चित्ररथः क्षत्रियः । नहि शूद्रो याज्यो भवति । तत्पुत्रश्च काक्षसेनिरभिप्रतारी । अत उत्तरब्राह्मणक्षत्रियौ गुरुशिष्यौ सवर्गविद्यायामुक्तौ । अतोऽत्रापि तथैव भवितुमर्हतीति न जातिशूद्रस्य सवर्गविद्यायामप्यधिकारः ॥ ३५ ॥

किञ्च ।

संस्कारपरामर्शात् तदभावाभिलापाच्च ॥ ३६ ॥

क्वापि विद्यायां शूद्रस्याधिकारश्चेत् सवर्गविद्यायामधिकारः कल्प्येत । सर्वत्र विद्योपदेश उपनयनाख्यः संस्कारः परामृश्यते । तं होपनिन्ये, अधीहि भगव इति होपससाद, तान् हानुपनीयैवेत्यादिवाक्येषु विद्याप्रदानमुपनयनपूर्वकं दृश्यते । शूद्रस्य तु तदभावाभिलापात् संस्काराभावकथनाच्चतुर्थ एकजातिः शूद्र इति, न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हतीत्यादिवाक्येषु । न शूद्राय मतिं दद्यादिति निषेधोऽपि चकारेण समुच्चीयते ॥ ३६ ॥

किञ्च ।

तदभावनिर्द्धारणे च प्रवृत्तेः ॥ ३७ ॥

सत्यकामो ह वै जावाल इति वाक्ये गौतमस्य सत्यकामवचनं श्रुत्वा, नैतदब्राह्मणो विवक्तुमर्हतीति शूद्राभावनिर्द्धारणे सति, चकाराद् वर्णित्वनिर्द्धारणे सत्युपनयनार्थं प्रवृत्तेः । अतो न जातिशूद्रस्य क्वापि विद्यायामधिकारः ॥ ३७ ॥

अथ विद्याधिकारचिन्ता दूरे, वेदश्रवणादीनामेव निषिद्धत्वादित्याह ।

श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ॥ ३८ ॥

अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमिति । पद्यु वा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसामीप्ये नाध्येतव्यमिति । उदाहरणे जिह्वाच्छेदो धारणे शरीरभेद इत्यादिना वेदश्रवणम् अध्ययनम् अर्थज्ञानमेतत्त्रयमपि तस्य प्रतिषिद्धम् । इदं, वेदाक्षरविचारेण शूद्रः पतति तत्क्षणादिति स्मृतेरपि सम्मतमित्याह । स्मृतेश्च । अधिकरणसम्पूर्णताबोधकश्चः । स्मार्ते ज्ञाने पौराणिके च सच्छूद्राणामधिकारो, नतु कर्मजातिशूद्राणाम् । अतः क्वचिदपि वैदिकविषये न शूद्राधिकार इति सिद्धम् ॥ ३८ ॥

प्रासङ्गिकं परिहृत्य प्रकृतं समन्वयोपयोगिविचारमारभते । कठवल्ल्यां श्रूयते । यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्तीति । तत्र प्राणशब्दाद् वज्रोद्यमनशब्दाच्च किमत्र प्राणोपासना, इन्द्रोपासना वा प्रतिपाद्यते ? उत ब्रह्मप्रकरणत्वाद् ब्रह्मोपासना वेति ? विशये, बलवद्बाधकश्रवणात् प्रकरणस्य दुर्बलत्वात् प्राण एवात्रोपास्यः । प्राणशब्दस्य च प्रत्यक्षत उपलभ्यमानत्वात् । अमृतं वै प्राणा इति श्रुतेरमृतप्राप्तिरपि प्राणोपासकस्य युक्ता । वज्रमुद्यतमित्यपि वियोगेन मरणजननेन प्राणानां भयरूपत्वाद् युक्तम् । अथवा इन्द्रोऽत्रोपास्यः । वज्रमुद्यतमित्यस्येन्द्रपक्षे सामञ्जस्यात् । प्राणशब्दवाच्यत्वमपीन्द्रस्य बलाधिष्ठातृत्वाद् युज्यते । अत इन्द्र एवात्र वाक्यार्थो, न ब्रह्मेति प्राप्ते, उच्यते ।

कम्पनात् ॥ ३९ ॥

प्राण एजतीत्यस्मिन् वाक्ये कम्पनं प्रतीयते । एजृ कम्पने इति धात्वर्थात् । तच्च भगवतः सर्वजगद्व्यजनकत्वेन कम्पजननाद् भगवद्धेतुकमेव भवितुमर्हति, न प्राणहेतुकमिन्द्रहेतुकं वा । वज्रोद्यमनमपि भगवतः सम्भवति । सर्वकर्तृत्वात् सर्वायुधत्वाच्च । 'नम्वेव वज्रस्तव शक्र ! तेजसा हरेर्दधीचेस्तपसा च तेजित' इति वाक्येन वज्रे विशेषतो भगवत्सम्बन्धकथनाच्च । अतो भगवत एव भारकं रूपमत्रोच्यते । तस्मात् कम्पनाद्धेतोर्ब्रह्मैवात्र वाक्यार्थः । प्राणशब्दवाच्यत्वं तु ब्रह्मणो व्युत्पादितमेव ॥ ३९ ॥

य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरभिसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रूयते । तत्र परज्योतिःशब्दवाच्यं महाभूतात्मकं ज्योतिर्ब्रह्म वेति संशये, ज्योतिःपदस्य रूढ्या भौतिकतेजोवाचकत्वात् तद्वाचकमेवात्र ज्योतिःपदमिति प्राप्तेऽभिधीयते ।

ज्योतिर्दर्शनात् ॥ ४० ॥

ज्योतिःशब्दं ब्रह्मैव । कुतः ? दर्शनात्, न्यायादित्यर्थः । सुषुप्त्यवस्थायां सता सोम्य तदा सम्पन्नो भवति सति सम्पद्य न विदुः सति सम्पद्यामह इति, अहरहर्ब्रह्मलोकं गच्छन्तीत्यादिषु सर्वत्र ब्रह्मसम्पत्तिरुक्ता । तन्न्यायादत्रापि सम्प्रसादशब्देन सुषुप्तिकथनात् परज्योतिःसम्पत्तिर्ब्रह्मप्राप्तिरेवेति ज्योतिःशब्देन ब्रह्मैवोच्यते, न भौतिकं तेजः । अतो यः कश्चन शब्दो ब्रह्मधर्मबोधकशब्दैः सह पठितः स ब्रह्मवाचक एवेति बोध्यम् ॥ ४० ॥

आकाशो वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मेति श्रूयते । तत्राकाशशब्देन रूढ्या भूताकाशो वा, प्रकरणाद् ब्रह्म वेति सन्देहे भूताकाश एवात्र ग्राह्यो रूढेर्बलीयस्त्वात् । भूताकाशस्यावकाशदानान्नामरूपनिर्वाहकत्वं युज्यते । अतो भूताकाश एवात्र प्रतिपाद्य इति प्राप्तेऽभिधीयते ।

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥

आकाशः परमात्मैव । कुतः ? भूताकाशस्य श्रुतिसिद्धं यत् प्रयोजनं तस्माद् अर्थान्तरस्य प्रयोजनान्तरस्य व्यपदेशात् कथना-

दित्यर्थः । अवकाशदानेन नामरूपनिर्वाहकत्वं न महात्म्यप्रतिपादकम । अत्र तु, 'वै' इति निश्चयवाचकपदकथनान्माहात्म्यरूपं नामरूपनिर्वाहकत्वमुक्तम् । तद्ब्रह्मण एव भवतीत्याकाशशब्दवाच्यं ब्रह्मैवात्र । एवमन्यत्राप्यतद्धीया उत्कृष्टधर्मा यत्राम्नातास्तद् ब्रह्मैव भवतीति ज्ञेयम् । नामरूपनिर्वाहकत्वरूपब्रह्मधर्मस्यान्यत्रानुक्तस्य कथनार्थमिदमधिकरणम् । अतोऽत्राकाशः परमात्मेति सिद्धम् ॥ ४१ ॥

बृहदारण्यके ज्योतिर्ब्राह्मणे, याज्ञवल्क्य ! किं ज्योतिरयं पुरुष इत्यारभ्य, अभयं० ह वै ब्रह्म भवति य एवं वेदेत्यन्तं श्रूयते । तत्रेदं जीवस्य ब्रह्मत्वप्रतिपादनेन जीववाक्यम्, आहोस्विद् ब्रह्मणो ज्ञेयत्वप्रतिपादनेन ब्रह्मवाक्यमिति संशये, आपाततोऽत्र जीवस्य ब्रह्मभावप्रतिपादनादन्यप्रतीतेर्जीववाक्यमेवेदमिति प्राप्तेऽभिधीयते ।

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥

व्यपदेशादित्यनुषज्यते । तथाच सुषुप्तिनिरूपणे उत्क्रान्तिनिरूपेण च जीवब्रह्मणोर्भेदेन व्यपदेशात् कथनाद् ब्रह्मण एव ज्ञेयत्वेन निरूपणेन ब्रह्मवाक्यमेवेदमिति युक्तम् ॥ ४२ ॥

किञ्च ॥

पत्यादिशब्देभ्यः ॥ ४३ ॥

सर्वस्य वशीत्यादिभ्यः शब्देभ्यः स्पष्टमेवेदं प्रकरणं ब्रह्मण इति निश्चीयते । अतोऽत्र ब्रह्मैव प्रकरणार्थ इति सिद्धम् ॥ ४३ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां प्रथमाध्यायस्य तृतीयः पादः ॥ ३ ॥

प्रथमाध्यायस्य चतुर्थः पादः ।

एवं सकलवेदान्तानां ब्रह्मणि समन्वये प्रतिपादिते, केषांचिद् वेदार्थाविदुषां क्वचिद् वेदे सांख्यमतानुसारिशब्ददर्शनात् तन्मतमपि वेदमूलकमेवेत्याशङ्का स्यात्, तन्निवारणं चतुर्थपादे क्रियते। तत्रेक्षत्यधिकरणे सांख्यमतमशब्दमित्युक्त्या निराकृतं, तद्वेदे प्रतिपादितमित्याशङ्कां निराकरोति ।

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥

एकेषां कठशाखासु, इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः, मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः, महतः परमव्यक्तमव्यक्तात् पुरुषः परः, पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिरित्यानुमानिकं सांख्यमतसिद्धं प्रकृत्यादिकं श्रूयते। बुद्धेः सकाशादात्माऽहङ्कारः परः । ततो महान् महत्तत्त्वम् । ततोऽव्यक्तं प्रकृतिः । ततः पुरुषः पर इति श्रुतेरर्थः । अतोऽहङ्कारादिपदार्थानां सांख्यमतसिद्धानां श्रुतौ दर्शनात् सांख्यमतमपि श्रौतं भवितुमर्हतीति चेद्, नैव शब्दमात्रदर्शनेन तन्मतस्य वैदिकत्वसिद्धिर्वक्तुं शक्या। तेषां शब्दानां प्रकृते भिन्नार्थकत्वात् । सन्दिग्धपदानां पूर्वापरानुसारेणार्थः कर्तव्यः । पूर्वं तु, आत्मानं रथिनं विद्धि शरीरं रथमेव तु, बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च, इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्, आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इत्युक्तं तदनुसारेणैवास्यार्थ उचितः । तदाह । शरीररूपकविन्यस्तगृहीतेः । शरीरसम्बन्धिन इन्द्रियादयो रथादिषु रूपकभावेन पूर्वम्, आत्मानं रथिनं विद्धीत्यादौ विन्यस्ताः । तेषामेवात्र गृहीतेः ग्रहणात् । तत्र जीवस्य ब्रह्मप्राप्तौ मुख्यं साधनं शरीरं रथत्वेन रूपितम् । तन्निर्वाहकाणीन्द्रियाणि हयाः । तन्नियामकः प्रग्रहो रश्मिः, स च सूताधीनः । सूतस्तु मार्गाधीनः । मार्गस्तु प्राप्याधीन इति । एष सम्यग् ज्ञाया

प्राप्यदेशं प्राप्नोतीति पूर्वमुक्तम् । तेषामेवात्र ग्रहणं युक्तम् । तत्रेन्द्रियाणां नियामका विषयाः । तेषां तदधीनत्वात् । विषयाणां सम्यक्त्वेन मनसा भावनाद्, मनसाऽभावितविषयाणामिन्द्रियाकर्षकत्वाभावाद् विषयेभ्यः परं मनः । बुद्धेर्मनोनियामकत्वात् ततः परत्वम् । बुद्धेः सकाशादात्मा विज्ञानं ब्रह्मविषयकत्वान्महत् तत्परम् । महतो विज्ञानात् परमव्यक्तं, न व्यक्तम् अप्रकटं भगवत्कृपा तस्या भगवदधीनत्वात् । तत उत्कृष्टः पुरुषो भगवानेवेति पूर्ववाक्यसम्बद्ध एवार्थः । एषु सर्वेषु भूतेषु गूढोत्मा न प्रकाशते, दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति स्वयं दर्शयति । सूक्ष्मया उपनिषदनुसारिण्या बुद्ध्या भगवान् दृश्यते प्राप्यत इत्यर्थः । चकारेण, ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमिति स्मृतेर्ग्रहणम् । अतो ब्रह्मप्राप्तिसाधनबोधकमिदं वाक्यं, न सांख्यमतसिद्धपदार्थबोधकम् ॥ १ ॥

नन्वत्रेन्द्रियादिरूपधर्मिप्रवाहाद्धर्मरूपा भगवत्कृपाऽव्यक्तशब्देन ग्रहीतुमयुक्तेत्याशङ्क्याह ।

सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥

तुः पूर्वपक्षनिरासे । सूक्ष्मं तद् ब्रह्मैव, अव्यक्तमपि तदेव । धर्मधर्मिणोरभेदाद् भगवत्कृपापि सूक्ष्मशब्देनोच्यते । कुतः ? अर्हत्वात् सूक्ष्मत्वाद् अव्यक्तशब्देन वक्तुं योग्यत्वात् । अतोऽत्र भगवत्कृपैवाव्यक्तशब्दवाच्या ॥ २ ॥

नन्वव्यक्तशब्दवाच्यभगवत्कृपाया भगवद्रूपत्वे पुरुषस्य ततः परत्वमनुपपन्नम् । नह्येकस्मिन्नेव परापरभावो भवति । धर्मरूपत्वे तु धर्मिप्रवाहपाठानुपपत्तिरित्याशङ्क्याह ।

तदधीनत्वादर्थवत् ॥ ३ ॥

धर्मधर्मिणोरभेदेऽपि कृपायास्तदधीनत्वाद् भगवतस्ततः परत्वं युज्यते । ननूक्तमेकस्मिन् परापरभावानुपपत्तिरित्याशङ्क्य दृष्टान्तेन समाधत्ते । अर्थवत् । अर्थः पुरुषार्थः फलं, तद्वत् । यथा, ब्रह्मविदाप्नोति परमितिवाक्ये एकस्यैव ब्रह्मणः सच्चिद्रूपेण साधनीभूत-

ज्ञानविषयत्वं, तस्यैवानन्दरूपेण फलत्वमुक्तम् । तथात्रापि कृपाविष्टः साधनम्, आनन्दरूपः फलमिति नोक्तदोषावकाशः । यद्वा अव्यक्तशब्देनाक्षरं ब्रह्म । महान् आत्मविषयकं विज्ञानम् । तस्य विषयाधीनत्वादक्षरब्रह्मणस्ततः परत्वम् । अत, इन्द्रियेभ्यः परा ह्यर्था इति वाक्ये सांख्यमतसिद्धः कोऽपि पदार्थो नास्तीति, न तन्मतं श्रुतिमूलकमित्यर्थः ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥

सांख्यवादिनां प्रकृतिपुरुषान्तरं ज्ञेयत्वेनोक्तम् । अस्मिन् वाक्ये त्वव्यक्तादयः पदार्था एवोक्ता, न तु तेषां ज्ञेयत्वमुक्तम् । नहि पदार्थनिर्देशमात्रेण सांख्यमते पुरुषार्थः सिद्ध्यति । चकारात् तेषां मते प्रकृतिपुरुषयोः संश्लिष्टत्वम्, अत्र तु परापरभाव उक्त इत्यपि वैलक्षण्यं सूचितम् । अतः, पूर्वापरविचारेण पूर्वमर्थ उक्तः । अस्मिन् सूत्रे त्वेतद्वाक्यार्थमात्रविचारेणापि सांख्याभिमतोऽर्थो न सिद्ध्यतीत्युक्तम् ॥ ४ ॥

ननु ज्ञेयत्वमप्यग्रोच्यते । इन्द्रियेभ्यः परा ह्यर्था इत्यस्मिन् वाक्ये पदार्थनिर्देशमात्रं कृत्वाऽग्रे, अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्, अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात प्रमुच्यत इत्यनेन निचाय्य तं मृत्युमुखात् प्रमुच्यत इति कथनाज्ज्ञेयत्वं वदतीत्याशङ्क्य परिहरति ।

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥

प्रकरणं हि वाक्यार्थे नियामकम्, तच्च परमात्मन एव । अतोऽस्मिन्नपि वाक्ये प्राज्ञः परमात्मैव निचाय्यो, नतु प्रधानम् । अतः प्रकरणस्य नियामकत्वादशब्दमित्यपि वाक्यं ब्रह्मपरमेव ॥ ५ ॥

ननु नात्र सर्वमेकं प्रकरणम्, अपि त्विन्द्रियेभ्यः परा ह्यर्था इत्यारभ्य नाचिकेतमुपाख्यानमित्यन्तं प्रकृतिपुरुषनिरूपकं भिन्नमेव प्रकरणम् । तत्रेन्द्रियेभ्यः परा इति वाक्ये पदार्थनिर्देशः । एष सर्वेषु भूतेष्विति वाक्ये पुरुषनिरूपणम् । अशब्दमिति तु प्रकृतिनिरूपणम् । अत एतावति प्रकरणे सांख्यमतनिरूपणमस्तीत्याशङ्क्याह ।

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥

अत्र कठवल्ल्यां, स त्वमग्निं स्वर्ग्यमध्येऽपि मृत्यो प्रब्रूहीत्यादिना प्रथममग्निप्रश्नः। प्र ते ब्रवीमीत्यादिना तदुत्तरम्। ये यं प्रेते विचिकित्सा मनुष्य इति जीवविषयको द्वितीयः प्रश्नः । देवैरत्रापीत्यादिनोत्तरम्। अन्यत्र धर्मादन्यत्राधर्मादिति ब्रह्मविषयकस्तृतीयः प्रश्नः । सर्वे वेदा यत्पदमामनन्तीत्यादिनोत्तरनिरूपणम् । एवं त्रयाणामग्निजीवब्रह्मणामुपन्यासः कथनं, तेषामेव प्रश्नश्च। कथने प्रश्नस्य हेतुत्वसूचनार्थं सूत्रे प्रश्नस्य पश्चान्निर्देशः । यद्यत्र सांख्यमतमपि निरूपणीयं स्यात् तदा चतुर्थस्याप्युपन्यासः प्रश्नश्च स्यादतः प्रकरणानुरोधात् प्राङ्स्य ब्रह्मण एवात्र निरूपणं, न मतान्तरीयपदार्थस्येति ज्ञेयम् ॥ ६ ॥

ननु सांख्यमतेऽन्यवाचकानां पदानां प्रकृते ब्रह्मवाचकत्वे प्रमाणाभाव इत्याशङ्क्याह ।

महद्वच्च ॥ ७ ॥

महान्तं विभुमात्मानं, वेदाहमेतं पुरुषं महान्तमित्यादौ यथा महच्छब्दो यौगिकः सन् ब्रह्मवाचक । एवमव्यक्तशब्दोऽप्यक्षरवाचकः । । नहि वेदान्तेषु, प्रथमकार्यरूपं महत्तत्वं महच्छब्देन वक्तुं शक्यते । तस्यैवास्वीकारात् । अत, इन्द्रियेभ्यः परा ह्यर्था इति वाक्ये साङ्ख्यपदार्थगन्धोऽपि नास्तीति, न तन्मतस्य वेदमूलकत्वमिति सिद्धम् । अधिकरणसमाप्तिबोधकश्चः ॥ ७ ॥

श्रुत्यन्तरे पुनराशङ्क्य परिहरति । ननु पूर्ववाक्ये प्रकरणात् पदानामन्योऽर्थ उक्तः । यद्वाक्यं प्रकरणापेक्षारहित, तदेव साङ्ख्यमतमूलं भविष्यति । अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानाः सरूपाः, अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः । देवात्मशक्तिं स्वगुणैर्निगूढामिति । ज्ञाज्ञौ द्वावजावीशानीशौ । अजा ह्येका भोक्तृभोग्यार्थयुक्ता । ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येदित्यादि श्वेताश्वतरोपनिषदि । अन्यत्र च कपिलप्रशंसकानि तन्मतीयपदार्थनिरूपकाणि च वाक्यानि वर्तन्त इति कापिलमतस्यापि वेदमूलकत्वमित्याशङ्क्य परिहरति ।

चमसवदविशेषात् ॥ ८ ॥

यथा, अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूपम्, तस्यासते ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति मन्त्रे कर्मविशेषं कल्पयित्वा तत्रार्वाग्बिलचमसं कल्पयित्वा तस्मिन् यशोरूपं सोमं सप्त होतारो मन्त्रेण भक्षयेयुरिति विशेषः कल्पयितुं न शक्यते । किन्तु मन्त्रान्तरेण व्याख्यात एवार्थो बुध्यते । तथाऽपि लोहितशुक्लकृष्णवर्णेन सत्त्वरजस्तमांसि कल्पयित्वा तदनुसारेण सर्वं कापिलमतं वैदिकमिति न कल्पयितुं शक्यते । कपिलर्षिस्तावकवाक्यस्यापि नित्यभगवदात्मकाधिदैविककपिलस्तावकत्वान्न दोषः । अन्यथा नित्यानित्यसंयोगविरोधदोषः स्यात् । अतो मन्त्रमात्रेण प्रकरणादिकमनपेक्ष्य न विशेषः कल्पयितुं शक्यते ॥ ८ ॥

ननु, अर्वाग्बिलश्चमस इति मन्त्रस्य मन्त्रान्तरं व्याख्यानमस्ति । शिरश्चमसः प्राणा वै यशः प्राणा वा ऋषय इति । न त्वजामन्त्रस्य तथा व्याख्यानमस्तीत्याशङ्क्याह ।

ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥ ९ ॥

तुः पक्षव्यावर्तकः । अजाशब्देन ज्योतिरुच्यते । भगवतः प्रथमोत्पन्ना ज्योतीरूपा देवता अजाशब्देनोच्यते । यथा साऽप्यदोग्ध्री तथैवमप्युपासिताऽप्युपयुक्ताऽऽप्नोतीति ज्ञापनायाऽजापदप्रयोगः । कुतः ? उपक्रमात् तदेवाग्निस्तद्वायुस्तदादित्यस्तदु चन्द्रमा इति ज्योतिषोपक्रमात् । द्वा सुपर्णेति वाक्यमग्रे उक्तम् । मध्यपठितोऽयं मन्त्रः पूर्वोत्तरसम्बन्धमेवार्थं वक्ति । जीवब्रह्मरूपमजद्वयमुक्तम् । अस्मिन् प्रकरणेऽप्ययमर्थो न स्पष्ट इति श्रुत्यन्तरमस्तीति दर्शयति । तथाहीत्यादि । तथाहि, यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति श्रुत्यन्तरे स्पष्टमेवैकेऽधीयते । अतस्त्रिवृत्कृततेजसो रोहितशुक्लकृष्णत्वं युक्तम् । अतश्चमसवाक्यवदत्रापि श्रुत्यन्तरेणार्थविशेषोऽङ्गीकर्तव्यः । तदिदं वाक्यं न सांख्यमतस्य मूलम् ॥ ९ ॥

ननु योगरूढिभेदेन शब्दप्रवृत्तिद्वैविध्यात्, प्रथमकार्यात्मकज्योतिषि, न जायत इत्यजेति योगाश्रयणादू रूढेश्छान्दोग्यप्रसिद्धत्वात् कथमजाशब्दस्य प्रथमकार्यपरत्वमित्याशङ्क्याह ।

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥

यथाऽजा वर्कसहिता सवत्सा च स्वामिहितं करोति दुग्धादिना, तथेयमप्युपासिता हितं करोतीति ज्ञापनायाजाकल्पताया उपदेशान्न पूर्वपक्षे उक्तो विरोधः । चकाराद् देवानां परोक्षप्रियत्वात् परोक्षवादोऽयमिति सूचितम् । मध्वादिवत् । यथा, आदित्यो वै देवमधु, वाचं धेनुमुपासीत, द्युप्रभृतीनामग्नित्वं पञ्चाग्निविद्योक्तम् । तथात्रापि कथनान्न दोषः । अतोऽजाशब्दमात्रान्न साङ्ख्यमतस्य वेदमूलकत्वमिति सिद्धम् ॥ १० ॥

ननु, यस्मिन् पञ्चपञ्चजना आकाशश्च प्रतिष्ठितः, तमेवमन्य आत्मानं विद्वान् ब्रह्माऽमृतोऽमृतम् इति बृहदारण्यकोक्तमन्त्रे पञ्चपञ्चेतिसङ्ख्याश्रवणात् साङ्ख्यमतस्य सम्भवति वेदमूलकत्वमित्याशङ्क्य परिहरति ।

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥११॥

यद्यप्यत्र पञ्चपञ्चेत्यनेन पञ्चानां पञ्चगुणत्वमुच्यते । पञ्चशब्दस्य सङ्ख्यावाचित्वे पञ्चसङ्ख्यायाः पञ्चसङ्ख्येत्यर्थकथने सङ्ख्यायां सङ्ख्याभावेनानन्वयात् षष्ठीसमासानुपपत्तेः पूर्वपञ्चशब्दस्य सङ्ख्येयपरत्वे द्वितीयस्य सङ्ख्यापरत्वे पञ्चसङ्ख्येयानां पञ्चसङ्ख्येत्यर्थात् पञ्चपदार्थानामेव बोधात् समीहितासिद्धेश्च । अतोऽत्र पञ्चजनानां पञ्चपञ्चेति वीप्सा वा यथासम्भवमर्थो भवति । तथाप्यसाग्रहेण सङ्ख्योपसङ्ग्रहादपि न समीहितसिद्धिः । कुतः? नानाभावात् । साङ्ख्योपसङ्ग्रहे कश्चन धर्मः पञ्चानामनुगतो वक्तव्यः । स च तन्मते न सम्भवति । तथा सति पञ्चैव तत्त्वानि भवेयुः । अतत्तेषां नानाभावः स्वीकर्तव्यः । स्वीकृते तु तस्मिन् प्रकृते समासानुपपत्तिः । किञ्चात्र साङ्ख्यमतपदार्थनिरूपणमस्मिन् वाक्य एव प्रतीयते । यत आकाशो यस्मिन्नित्यधिकरणत्वेनोक्त आत्मा चातिरेकेणोच्यत इत्याह । अतिरेकाच्चेति । अत एतन्मन्त्रेणापि न साङ्ख्यमतस्य वेदमूलकत्वसिद्धिः ॥ ११ ॥

ननु मन्त्रार्थस्त्वयदयं कश्चन वक्तव्यः । अतो लक्षणया ज्योतिःशास्त्रवच्छाश्रीयपरिभाषया वा पञ्चपञ्चशब्दस्य पञ्चविंशति-

संख्याबोधकत्वात् पञ्चविंशतितत्त्वान्तर्गतात्माकाशयोरेव माहात्म्याधेमाधाराधेयभावप्रदर्शनाच्चतन्मन्त्रस्यैव सांख्यमते मूलत्वमित्याशङ्कां निराकरोति ।

प्राणादयो वाक्यशेषात् ॥ १२ ॥

पञ्चजनशब्दवाच्याः प्राणादय एव । कुतः ? प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मन इति वाक्यशेषात् । नन्वस्य वाक्यशेषत्वं कथमिति चेदुच्यते । प्राणस्य प्राणमितिवाक्ये करणात्मकाः प्राणादय उक्ताः । ते ज्ञानक्रियात्मकं कार्यं स्वेन व्यापारेण जनयन्तीति तेषां करणान्तरानपेक्षणात् प्राणस्य प्राणमिति कथनं बाधितं स्यात् । अत एतद्वाक्यस्य पञ्चजनवाक्यशेषत्वमङ्गीकृत्य द्वयोर्वाक्ययोरेकोऽर्थो वक्तव्यः । एवञ्च बुद्धेः संशयविपर्यासनिश्चयस्मृतिस्वापलक्षणपञ्चवृत्तिजनकत्वात् पञ्चजनाः प्राणादय एव । तेषां तत्तत्कार्यजनकत्वं न स्वतः, किन्तु सर्वेषामाधिदैविकरूपभगवत एवेति प्राणादीनां प्राणादिरूपो भगवानेवेत्येवं द्वयोर्वाक्ययोरेकवाक्यतयार्थकरणे सर्वसामञ्जस्यम् । अतः प्राणादय एव पञ्चजना इति, न तन्मतं सिध्यति ॥ १२ ॥

ननु काण्वपाठे प्राणस्य प्राणमितिवाक्ये, अन्नस्यान्नमिति नास्ति, तदा कथं पञ्चजनकत्वं तत्राह ।

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

एकेषां काण्वानां पाठेऽन्ने असति ज्योतिषा पञ्चसङ्ख्यापूरणम् । यत एतत्पूर्वं पठितमन्त्रे तद्देवा ज्योतिषां ज्योतिरित्युक्तमतस्तेन ज्योतिषाऽत्र सङ्ख्यापूर्तिः । अत एतत्पञ्चजनमन्त्रस्यापि न साङ्ख्यमतमूलत्वमिति सिद्धम् ॥ १३ ॥

ननु, तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इति, तत्तेजोऽसृजतेति, एतस्माज्जायते प्राण इति, इदं सर्वमसृजतेत्यादौ क्वचिदाकाशादिकायाः क्वचित्तेजआदिकायाः क्वचित् प्राणादिकायाः क्वचिदक्रमिकायाः सृष्टेः प्रतिपादनाद् वस्तुनो द्वैरूप्यासम्भवेन सृष्टिप्रतिपादकश्रुतिवाक्यानां परस्परं विगानदर्शनात् तेषां ब्रह्मोपासनविधेस्तावकत्वेनार्थवादत्वान्न तैर्ब्रह्मणो जगत्कारणत्वं सिद्ध्यति । कि-

न्तु दृश्यमानजगतः कारणविचारेऽनेकेषु स्मार्तमतेषु कापिलमतस्याभ्यर्हितत्वेन तदुक्तप्रकारेणैव कार्यकारणविचार उचित इति प्राप्ते, उच्यते।

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥

सृष्टिभेदेषु ब्रह्मणः कारणत्वे न विप्रतिपत्तिरस्ति। कुतः? यथा व्यपदिष्टस्य एकत्राकाशादिषु कारणत्वेनोक्तस्यान्यत्रापि तस्यैव कारणत्वेनोक्तेः। अतः कार्यप्रकाराणामनेकत्वेऽपि सर्वत्र कारणत्वेन ब्रह्मण एवोक्तेः कारणत्वे विगानं नास्तीत्यर्थः। कार्यप्रकारेषु भेदेन निरूपणं तु ब्रह्मणो माहात्म्याय। अनेकप्रकारेण जगत्कर्तृत्वबोधनात्। अत एव, न तस्य कार्यं करणं च विद्यत इत्यादिभिर्लौकिककर्तृत्वनिराकरणम्। अतः श्रुतिषु परस्परं विरोधाभावात् तदुक्तप्रकारेण ब्रह्मण एव कारणत्वं युक्तं, नतु कापिलस्मृत्यभिमतप्रकृतेरिति सिद्धम्॥ १४॥

ननु कार्योत्पत्तिप्रकारभेदानां ब्रह्मणो माहात्म्यबोधकत्वात् तन्निरूपकश्रुतीनां परस्परं विगानाभावेऽपि कारणनिरूपिकाणाम्, असद् वा इदमग्र आसीत्, सदेव सौम्येदमग्र आसीत्, तद्धैक आहुरसदेवेदमग्र आसीत्, अव्याकृतमासीत्, नासदासीन्नो सदासीत् तम आसीदित्यादीनां श्रुतीनाम् असदादीनां कारणत्वेन प्रतिपादकत्वाद् ब्रह्मणः कारणत्वे विगानमस्तीति प्रकारान्तरेणाशङ्क्य परिहरति।

समाकर्षात् ॥ १५ ॥

आकृष्यते स्वस्थानात् प्रच्याव्यत इत्याकर्षः। एतेषां जगत्कारणप्रतिपादकानाम् असदादिपदानां लोकप्रसिद्धार्थात् समाकृष्य ब्रह्मपरत्वं कल्प्यते। यथाऽनेकविरुद्धधर्माश्रयत्वं ब्रह्मणस्तथाऽनेकशब्दवाच्यत्वमपि। ब्रह्मणोऽनभिव्यक्तत्वाद् असत्तमइत्यादिशब्दवाच्यत्वम्। एवंरीत्यैकवाक्यत्वसम्भवादन्यार्थकरणमबोधविजृम्भितम्। अतः शब्दवैलक्षण्येऽपि श्रुतीनामेकार्थत्वान्न विप्रतिषेध इति सिद्धम्॥ १५॥

कौषीतकिब्राह्मणोपनिषदि बालाक्यजातशत्रुसंवादे, वेदैष एत-

दृ यालाके पुरुषो ऽशयिष्टेत्यादौ जीवं प्रक्रम्य तस्मात् सर्वोत्पत्तिर्निरू-पिता । तत्र ब्रह्मणोऽनुप्रवेशश्चोक्तः । तत्र ब्रह्मसहितो जीव एव कर्ता ब्रह्मैव वेति संशयेऽस्मिन् प्रकरणे ब्रह्मोपक्रम्य जीवपर्यवसानोक्त्या ब्रह्मत्वेनोक्तो जीव एव कर्ता भवितुमर्हति । ब्रह्मत्वादयोऽपि जीवस्यैव धर्मा राजत्वादिवत् । एवञ्च लोके जीवस्य कर्तृत्वं दृश्यमानं स्वाह-जिकमेव । तथाच जीवस्याणुत्वात् स्वतः कर्तृत्वासम्भवेन प्रकृति-द्वारकमेव कापिलमतोक्तरीत्या भविष्यतीति प्राप्ते प्रोच्यते ।

जगद्वाचित्वात् ॥ १६ ॥

एतेषां पुरुषाणां कर्ता यस्य चैतत्कर्मेत्येतत्प्रकरणोपक्रमवा-क्ये जीववाचकपुरुषपदोक्त्या जीवकर्तृत्वं निरूप्य यस्य चैतत्कर्मे-त्यत्र, एतच्छब्दस्य जगद्वाचित्वात् तत्कर्तृत्वमत्रोच्यते । एवं च जीवजडात्मकस्य जगतो ब्रह्मकर्तृकत्वमन्यत्रोक्तमत्रापि तदेवोच्यत इति भगवानेव जगत्कर्ता, न जीवः । तस्य जगत्कर्तृत्वस्यान्यत्रा-श्रुतत्वादश्रुतकल्पनापत्तेः । सुषुप्तावपि ब्रह्मण्येव जीवस्य लयस्तत एव सर्वमिति ज्ञेयम् । प्राणादिशब्दवाच्यत्वं ब्रह्मणि पूर्वं साधितमेव । अतो न जीवो, नापि तदधिष्ठिता प्रकृतिर्जगत्कारणं, किन्तु ब्रह्मैव॥१६॥

नन्वत्र क्वैष एतद् बालाके पुरुषोऽशयिष्टेति जीवं प्रक्रम्य तस्य शयनोत्थानादिधर्मानुक्त्वा ब्रह्मत्वं जगत्कर्तृत्वं चोच्यते । तज्जीवे स्वतोऽसम्भवात् प्रकृतिद्वारकं भविष्यति । अथवा प्राण एवैकधा भवतीति मुख्यप्राणलिङ्गमप्यन्यत्र दृश्यते । सुषुप्तौ तस्यैव वृत्त्युप-लम्भात् तस्यैव विद्यमानत्वात् तत एवोत्पत्तिप्रलयौ । तस्य च प्र-कृत्यंशत्वेन जडात् प्रधानादेव सृष्टिरुक्ता भवति । अतोऽस्मिन् प्रक-रणे जीवात् प्राणाद्वा सृष्टिरुक्तेति न ब्रह्मणो जगत्कारणत्वमिति सू-त्रेणाशङ्क्य परिहरति ।

जीवमुख्यप्राणलिङ्गादिति चेत् तद्व्याख्यातम् ॥ १७ ॥

जीवप्राणयोः कर्तृत्वकथनं तु जीवस्य ब्रह्माश्रितत्वात् प्राणस्य ब्रह्मयोगादुक्तं, नतु तयोः स्वातन्त्र्येण जगत्कर्तृत्वं सम्भवतीति व्याख्यानं पूर्वमेव ' आश्रितत्वादिह तद्योगाद्' इति सूत्रेण । जीवस्य ब्रह्माश्रितत्वान्मुख्यप्राणस्य ब्रह्मणा सह योगाद् ब्रह्मकार्यमेव तयो-

निरूपितं, नतु तयोः स्वातन्त्र्येण कार्यकर्तृत्वमस्तीत्यर्थः। अतः सर्वं कार्यं ब्रह्मण एव, नान्यत इति निरूपणादस्मादपि वाक्याद् ब्रह्मकारणत्वमेव निरूपितं जगतो, न प्रकृतिकारणत्वमिति सिद्धम् ॥ १७ ॥

स्वमतेन जीवमुख्यप्राणलिङ्गसमाधानमुक्त्वा जैमिनिमतेनाऽपि परिहारमाह।

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥

स्वापप्रतिबोधौ जीवधर्मावेव। चक्षुरादिलयाश्रयत्वं प्राणधर्म एव। नैतौ ब्रह्मणि सम्भवत इति नियतधर्मवादी जैमिनिस्तयोर्धर्मयोः कीर्तनमस्मिन् प्रकरणेऽन्यार्थमिति वदति। जीवप्राणयोर्ब्रह्मभेदे ब्रह्मनिरूपणे तन्निराकरणावश्यकत्वज्ञापनार्थं तुः। सुपुप्तौ पश्चाज्जीवलयोद्गमनिरूपणवैलक्षण्येन ब्रह्मणो ज्ञानार्थं सुपुप्त्यवस्थायां मृतिवैलक्षण्यबोधनार्थं यत् प्राणनिरूपणं तदपि तदाश्रयब्रह्मज्ञानार्थमित्यन्यार्थं जीवमुख्यप्राणधर्मकीर्तनमित्यर्थः। यो वै बालाके एषां पुरुषाणां कर्तेत्युपक्रमे मुख्यतया ब्रह्मैव निर्दिष्टम्। उपसंहारे तु तज्ज्ञानेनासुरलयः सर्वभूतश्रैष्ठ्यं स्वाराज्यमाधिपत्यं चेति फलमुक्तम्। नह्येतद् ब्रह्मज्ञानं विनाऽन्येन सम्भवति। अत उपक्रमोपसंहाराभ्यामेवावगम्यते, यदस्मिन् प्रकरणे मुख्यं ब्रह्मैव प्रतिपाद्यमिति। अपिच प्रश्नव्याख्यानाभ्यामपि ब्रह्मपरत्वं प्रकरणस्य ज्ञायते। क्वैष एतद् बालाके पुरुषोऽशयिष्टेति प्रश्नो जीवस्य ज्ञातत्वादधिकरणात्मकब्रह्मविषयक एव। यत्रैष एतद् बालाके पुरुषोऽशयिष्टेति व्याख्यानमपि ब्रह्मपरमेव। ननु नाडीष्वपि श्रुतिसम्भवात् कथं ज्ञातव्य नाडीव्यतिरिक्त आत्मैवात्र प्रतिपाद्यत इत्याशङ्क्य तत्र प्रमाणमुपन्यस्यति। एवमेके शाखिनो वाजसनेयिनः स्पष्टमधीयते। स्वबालाकिब्राह्मणे, सहोवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद् य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेत इति। अत्राकाशशब्देन ब्रह्मोक्तम्। सता सोम्य तदा सम्पन्नो भवति। स्वमपीतो भवतीति चेत्यन्यत्रापि तथैवोक्तम्। अतोऽत्र जीवमुख्यप्राणलिङ्गानामाधारभूतब्रह्मज्ञाना-

र्थत्वाच्च तेन प्रकृतिकारणवादः सिद्ध्यतीति ब्रह्मैव जगत्कारणमिति सिद्धम् ॥ १८ ॥

वाक्यान्तरे जीवब्रह्मवादेन प्रकृतिकारणवादमाशङ्क्य परिहरति । बृहदारण्यके चतुर्थे षष्ठे चाध्याये याज्ञवल्क्यमैत्रेयीसंवादे यदेवाऽमृतत्वकरणं तदेव मे ब्रूहीति मैत्रेय्या पृष्टो याज्ञवल्क्यस्तां स्तुत्वा ज्ञानमुपदिदेश । तत्र प्रकरणी जीवो ब्रह्म वेति विशये, आत्मनस्तु कामाय सर्वं प्रियं भवतीत्यादिनाऽऽदिमध्यावसानेषु जीवनिरूपणदर्शनाज्जीव एवात्र प्रकरणी विज्ञायते । तस्यैवोत्कर्षार्थं ब्रह्मत्वं जगत्कर्तृत्वं चोच्यते । न तु ततोऽतिरिक्तं ब्रह्म वक्तुं युक्तम् । अतो वेदे सृष्टिनिरूपकवाक्यानामेतन्न्यायेनान्यपरत्वान्न ब्रह्मणो जगत्कारणत्वप्रतिपादने तात्पर्यमिति सांख्याभिमतः प्रकृतिकारणवाद एवास्त्विति प्राप्ते, उच्यते ।

वाक्यान्वयात् ॥ १९ ॥

एतद्वाक्यस्य ब्रह्मण्येवान्वयान्न जीवस्य प्रकरणित्वं सम्भवतीत्यर्थः । भगवत्सम्बन्धेनैव सर्वस्य जीवस्य च प्रियत्वम् । तस्यैवानन्दमयत्वात् । तमेव विदित्वाऽतिमृत्युमेति, आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, सर्वं एवात्मानो व्युच्चरन्ति, एष ह्येवानन्दयातीत्यादिश्रुतिभिर्निःसन्दिग्धं ब्रह्मणः स्वरूपं तत्कार्यं तदंशा जीवाश्च निरूपिता इतीदं वाक्यमपि तैः सहैकार्थं युक्तम् । नत्वस्य भिन्नरीत्या जीवनिरूपणपरत्वम् । एवञ्च सर्ववेदान्तानामविरुद्धार्थप्रतिपादकत्वं भवति । तथाच वाक्यान्वयादिदमपि वाक्यं ब्रह्मपरमेव, नतु जीवपरमिति, न प्रकृतिकारणवादशङ्कावकाशः ॥ १९ ॥

जीवधर्मा जीव एव नियता, न ब्रह्मणि सम्भवन्तीति ये एकदेशिनो मन्यन्ते, तेषां मतेन प्रकृते सिद्धान्तकथनार्थं तन्मतान्यनुवर्तते ।

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥

भगवता स्वस्य लौकिकभोगसिद्ध्यर्थं यः स्वांशो विस्फुलिङ्गवत् पृथक्कृतः स जीव इत्याश्मरथ्यमतेन जीवोपक्रमाज्जीवस्यैवेदं प्रकर-

वामित्याशङ्कासमाधानमाह । प्रतिज्ञासिद्धेर्लिङ्गमिति । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा जीवस्य भगवदंशत्वेन तदभेदे सति सिद्ध्यति । तथाच तस्याः प्रतिज्ञायाः सिद्धेरिदं लिङ्गं, यथा जीवो भगवदंशस्तथा जडोऽपीतिज्ञापकः । अतो जीवोपक्रमेऽपि न दोषः ॥ २० ॥

उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः ॥ २१ ॥

चैतन्यमात्रं जीवोऽनादिसिद्ध एव वासनया देहादिसङ्घाते प्रविष्टोऽतश्चिद्रूपे ब्रह्मणि चिन्मात्ररूपेण प्रवेशो तस्य मोक्ष इत्यौडुलोमिमतेनापि जीवोपक्रमशङ्कासमाधानमाह । उत्क्रमिष्यत एवम्भावादिति । अत्र जीवमुपक्रम्य भगवतः श्रवणकीर्तनादिकं निरूपितम् । तत्संसारभावादुत्क्रमिष्यतो जीवस्य लिङ्गम्, मुक्तौ जीवो भगवानेव भविष्यतीतिज्ञापकम् । कुतः ? एवम्भावात्, मैत्रेय्या एवाऽमृतीभावात् । सर्वेषां जीवानां ब्रह्मत्वेऽमृतत्वं सिद्धमेवेति तदर्थं ज्ञानादिप्रयासवैयर्थ्यं स्यात् । अतो ज्ञानेन संसारादुत्क्रमिष्यतो जीवस्याऽमृतत्वमिति ज्ञापनार्थं जीवोपक्रमः । अतो जीवो ब्रह्माभिन्न एवेति पक्षेऽपि न जीवोपक्रमे दोषः ॥ २१ ॥

भगवत आसक्त्या विषयभोक्तृरूपं जीव इति काशकृत्स्नमते जीवोपक्रमसंशयवारणमाह ।

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

भगवत एवावस्थाविशेषो जीव इत्यवस्थितेर्लिङ्गं जीवोपक्रमः । अतः संसारदशायामपि जीवो ब्रह्मैवेति तेनोपक्रम्य भगवच्छ्रवणादिविधानेऽपि न दोषः । अतो न मैत्रेयीब्राह्मणेनापि, जीवद्वारा प्रकृतिः कारणमिति सांख्यमतसिद्धिरिति सिद्धम् ॥ २२ ॥

ननु श्रुत्युक्तकारणत्वाद् ब्रह्मणो निमित्तकारणत्वमस्तु, समवायिकारणं तु प्रकृतिरेव कार्यानुरूपत्वात् । समवायिनिमित्तकारणयोर्भेदोऽवश्यं युक्तः । अतो ब्रह्मवादेऽपि सांख्यस्मृत्यभिमता प्रकृतिः समवायिकारणत्वाधर्ममपेक्षितैवेत्यर्द्धजरतीयन्यायेन ब्रह्मकारणत्वमुपनिषदुक्तं, प्रकृतिकारणत्वं स्मृतिसिद्धमुभयमप्यविरुद्धमित्याशङ्क्याह ।

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥

प्रकृति समवायिकारणं, चकारान्निमित्तकारणं च ब्रह्मैव । कुतः ? येनाश्रुतं श्रुतं भवतीत्यादि प्रतिज्ञा । यथैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादित्यादिदृष्टान्त । तयोरनुपरोधाद् अबाधादित्यर्थः । तद्यदि ब्रह्मैव सर्वसमवायिकारणं स्यात् तर्हि तज्ज्ञानेन सर्वं ज्ञातं भवति, नान्यथा । अतो न प्रकृतिर्जगत्समवायिकारणं, किन्तु ब्रह्मैव ॥ २३ ॥

अत्रैव हेत्वन्तरमाह ।

अभिध्योपदेशाच्च ॥ २४ ॥

सोऽकामयत बहु स्यां प्रजायेयेत्यभिध्यानस्योपदेशाद् ब्रह्मैव जगत्समवायिकारणं श्रुत्यभिमतम् । जडाया प्रकृतेरभिध्यानासम्भवात् । चकारेणेदं सर्वं यदयमात्मेतिश्रुत्युक्तं जगतो ब्रह्मत्वं ब्रह्मण एव समवायित्वे भवति, नान्यस्य समवायित्वे । यद्वा, सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्यादौ सर्वस्य ब्रह्मत्वेनोपासनोपदेशो ब्रह्मणः सर्वसमवायित्वं युक्तं इति । चकारेणैकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखमिति स्मृतिः परिगृहीता ॥ २४ ॥

किञ्च ।

साक्षाच्चोभयाम्नानात् ॥ २५ ॥

सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते, आकाशं प्रत्यस्तं यन्तीति श्रुत्या, चकाराद्, अहं सर्वस्य जगतः प्रभवः प्रलयस्तथेति स्मृत्या च साक्षादेवोभयोर्ब्रह्मणः सकाशाद् ब्रह्मण्येव च सृष्टिप्रलययोराम्नानात् कथनादित्यर्थः । न हीदं ब्रह्मणो निमित्तकारणत्वे सम्भवति । अतो ब्रह्मैव समवायिकारणम् ॥ २५ ॥

ननु, स एव सर्वं सृजति स एवावति हन्ति चेति श्रुतौ ब्रह्मणो निमित्तकारणत्वमात्रप्रतीतेराकाशादयः समुत्पद्यन्त इति वाक्यस्यौपचारिकत्वेनाप्युपपत्तेः प्रकृतिसमवायिकारणवाद एव युक्त इत्याशङ्क्य परिहरति ।

आत्मकृतेः परिणामात् ॥ २६ ॥

तदात्मानं स्वयमकुरुतेति श्रुतावात्मनः स्वस्यैव कृतेः करणाद् ब्रह्मैव जगत्कारणमुक्तमिति । आत्मकृतिः कथं सम्भवतीत्याश-

ङ्क्य तत्रोपपत्तिमाह । कार्याकारेण ब्रह्मणः परिणामात् । ब्रह्मणः सर्वभवनसमर्थत्वादविकृतमेव सुवर्णादिवत् कार्यरूपेण परिणामसम्भवात् । अतो जगतो ब्रह्माविकृतपरिणामरूपकार्यत्वाद् ब्रह्मैव समवायिकारणमिति सिद्धम् ॥ २६ ॥

ननु जडानां ब्रह्मकारणकत्वेऽपि चेतनेषु मनुष्यादिषु योनिबीजयोः समवायिकारणत्वदर्शनाज्जीवानां योन्यात्मकप्रकृतेः कारणत्वमस्त्वित्याशङ्क्य परिहरति ।

योनिश्च हि गीयते ॥ २७ ॥

जगतो योनिश्च ब्रह्मैव । चकाराच्छाकमादनिरासः । अत्र युक्तिश्रुती प्रमाणमित्याह । हि गीयते । सदेव सौम्येदमग्र आसीद्, एकमेवाद्वितीयमित्यादिश्रुतिषु सृष्टेः पूर्वमेकमेवोक्तम् । आकाशादेश्च समुत्पद्यन्ते, आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त इत्यादिष्वेवकारेणैकमेव ब्रह्म जगत्कारणमुक्तमिति युक्तिः । गीयते च ब्रह्मणो योनित्वं, कर्तारमीशं पुरुषं ब्रह्मयोनिं, यद्भूतयोनिं परिपश्यन्ति धीरा इत्यादिश्रुतिषु, मम योनिर्महद् ब्रह्म, तासां ब्रह्म महद्योनिरहं बीजप्रदः पितेत्यादिस्मृतिषु च । अतो ब्रह्मैव जगतो योनिर्बीजं पुरुषो जीवश्चेति, इदं सर्वं यदयमात्मेतिश्रुत्युक्तं भगवतः सर्वरूपत्वं सिद्धम् । अतो ब्रह्मवादे केनापि प्रकारेण प्रकृतिप्रवेशाभावात् साङ्ख्यमतमशब्दमिति सिद्धम् ॥ २७ ॥

एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥

एतेन ब्रह्मणो जगत्कारणत्वस्थापनेन ब्रह्मवादे स्थापिते साङ्ख्यमते निराकृते च सति सर्वे पातञ्जलादिवादा व्याख्याताः । अवैदिका अनुपयुक्तास्ते वादाः । अतस्ते नादर्तव्या इत्यर्थः । वैदिकानां वेदानुसारेण वस्तुविचारः कर्तव्यः । तद्विरुद्धवादानामप्रामाण्याद् ब्रह्मवादे न कोऽपि शङ्कावकाश इति सर्वं सुस्थम् । अत एवाग्रिमाध्याये विस्तरेण मतान्तराणि निराकरिष्यन्ते । अध्यायसमाप्तिसूचिका सूत्रैकदेशावृत्तिः ॥ २८ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां प्रथमाध्यायस्य

चतुर्थः पादः ॥ ४ ॥

समाप्तोऽयं प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयाध्यायस्य प्रथमः पादः ।

प्रथमाध्याये वेदान्तवाक्यानां सन्दिग्धानां ब्रह्मपरत्वेन समन्वयो निरूपितः । अतः परं स्मृतिविप्रतिषेधनिराकरणाय द्वितीयाध्याय आरभ्यते

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ १ ॥

ननु कपिलादिमहर्षिकृतसाङ्ख्यस्मृतौ प्रधानस्यैव जगत्कारणत्वमुक्तम् । सा तु मोक्षैकोपयोगित्वेन धर्मोद्देश्योनिमन्वादिस्मृतिभ्योऽन्तरङ्गा जगत्कारणनिर्णये । तत्राप्यनिर्णायकत्वाङ्गीकारे वैयर्थ्योपत्तेः । अतो न ब्रह्म जगत्कारणमिति चेन्न । अह सर्वस्य जगतः प्रभवः प्रलयस्तथेत्यादिविशुद्धब्रह्मकारणताबोधकस्मृत्यन्तरानवकाशान्न तथाङ्गीकर्तव्यमित्यर्थः ॥ १ ॥

इतरेषां चानुपलब्धेः ॥ २ ॥

प्रकृतिव्यतिरिक्तानां महदादीनां लोके वेदे चानुपलब्धेर्न साङ्ख्यमतमङ्गीकर्तव्यम् ॥ २ ॥

एतेन योगः प्रत्युक्तः ॥ ३ ॥

साङ्ख्यस्मृतिनिराकरणेन योगस्मृतिरपि निराकृता ज्ञेया । योगशास्त्रस्य वैदिकत्वशङ्कया तन्निराकरणार्थं पृथक् सूत्रारम्भः ॥३॥

न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ४ ॥

ननु जगतो विलक्षणत्वाद्चेतनत्वाच्चेतनं न कारणम् । विलक्षणत्वं च विज्ञानं चाविज्ञानं चेति श्रुतिवाक्याज्ज्ञेयम् । अतोऽचेतना प्रकृतिरेव कारणत्वेनाङ्गीकर्तव्या ॥ ४ ॥

ननु नास्य जगतः श्रुतिवाक्याद्चेतनत्वं वक्तुं युक्तम् । मृद्ब्रवीत्, आपोऽब्रुवन्, तत्तेज ऐक्षतेत्यादिश्रुतौ भूतेन्द्रियाणां चेतनत्वोक्तेरित्याशङ्क्याह ।

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ ५ ॥

तुशब्दः पक्षव्यावर्तकः । तत्तदभिमानिदेवतानामेव चेतनत्वेन व्यपदेशः । कुतः ? विज्ञातं चाविज्ञातं चेति तत्रैव चेतनाचेतनविशेषकथनात् । अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादौ चेतनानामग्न्यादिदेवतानामचेतनानुगतिनिरूपणाच्च । तथाच, न जगतश्चेतनत्वमित्यर्थः ॥ ५ ॥

अतोऽचेतना प्रकृतिरेव जगत्कारणं, नतु चेतनं ब्रह्मेति प्राप्ते, उच्यते ।

दृश्यते तु ॥ ६ ॥

तुः पक्षव्यावर्तनार्थः । लौकिके केशगोमयवृश्चिकादौ कार्यकारणयोर्वैरूप्यं दृश्यते । तथापि कश्चित् कारणांशोऽनुवर्तत एवेति चेत्, प्रकृतेऽपि ब्रह्मसत्तायाः सर्वत्रानुवृत्तिर्दृश्यत एव । अतो वैलक्षण्यानुरोधान्न ब्रह्मकारणत्वं दूषणीयमिति ॥ ६ ॥

असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ ७ ॥

ननु श्रुतौ जगत्कारणत्वेनासदुक्तमिति चेन्न । इदं वचनं प्रतिषेधमात्रार्थम् । अग्रे कथमसतः सज्जायेतेति कथनात् ॥ ७ ॥

शङ्कते ।

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ ८ ॥

कार्यस्य कारणे लये कार्यस्य स्थौल्यसावयवत्वपरिच्छिन्नत्वाशुद्ध्यादिधर्मैः कारणस्यापि तद्धर्मवत्त्वप्रसङ्गादसमञ्जसं ब्रह्मकारणवचनमिति प्राप्ते ॥ ८ ॥

परिहरति ।

न तु दृष्टान्तभावात् ॥ ९ ॥

ब्रह्मकारणवादे न किञ्चिदसामञ्जस्यमस्तीति तुशब्दः । स्वपक्षस्थापनपरपक्षनिराकरणयुक्तीनां सत्त्वात् । तत उत्पन्नस्य तत्रैव लये कार्यस्य तद्धर्मसम्बन्धो न भवति । शरावघटकादीनां मृदिलये-

ऽपि मृद्स्तद्धर्मवत्त्वादर्शनात् । अतो दृष्टान्ताभावान्नास्मन्मते दूषणलेशो ऽपि ॥ ९ ॥

स्वपक्षदोषाच्च ॥ १० ॥

एत एव दोषाः प्रतिवादिपक्षे दुष्परिहराः । निर्विशेषात् प्रधानात् सविशेषकार्योत्पत्तिर्लये तद्धर्मसम्बन्धप्रसक्तिरसत्कार्यवादाङ्गीकार एवमादिदोषाणां प्रतिवादिपक्षे सम्भवान्नेदं मतं समीचीनमित्यर्थः ॥ १० ॥

तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः ॥ ११ ॥

किञ्च, वेदार्थे केवलतर्केण विचारो न युक्तः । तर्कस्याप्रतिष्ठानात् । तर्को हि स्वोत्प्रेक्षिना युक्तिः । सैकेनोक्ता नान्यैरङ्गीक्रियते । ऋषीणां स्वातन्त्र्येण बुद्धिवैलक्षण्यसम्भवाद्, वस्तुनि विकल्पासम्भवान्नियामकस्यैकस्याभावाच्च । अतो न तर्कस्य प्रतिष्ठा । अत्र पूर्वपक्षी परिहरति । अप्यन्यथानुमेयमिति चेद् । एवमपि सति यथान्यथानुमिमीमहे, तर्के नाप्रतिष्ठादोषो भविष्यति । प्रतिष्ठितः कोऽपि तर्को नास्तीति तु न वक्तुं शक्यम् । सकलव्यवहारबाधापत्तेः । आर्षं धर्मोपदेशं चेति स्मृतेश्च । अतः सदोषतर्कं परित्यज्य निरवद्यतर्केण निर्णयो भविष्यतीति चेद् । एवमपि श्रुत्यनुसारिणां ब्रह्मवादिनां निरवद्यतर्कसद्भावेऽपि प्रकृतिकारणवादिनस्तर्कस्य दोषाविमोक्षप्रसङ्गः । नियामकप्रमाणाभावाद् ऋषीणां परस्परं वैमत्यसम्भवाच्च । अतस्तर्कमूलकसाङ्ख्यमतानुसारेण प्रकृतेर्जगत्कारणत्वं नाङ्गीकर्तव्यमितिभावः ॥ ११ ॥

एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ १२ ॥

एतेन साङ्ख्यमतनिराकरणेन शिष्टापरिग्रहा अणुमायाकारणवादा ये सर्वथा शिष्टैर्न परिगृहीतास्ते निरस्ता ज्ञातव्याः ॥१२॥

एवं ब्रह्मणो जगत्कारणत्वे स्मृतिविरोधं परिहृत्य दोषान्तरमाशङ्क्य परिहरति ।

भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ॥ १३ ॥

ननु निर्विशेषस्य ब्रह्मणो जगत्कारणत्वे भोक्तुर्भोग्यत्वं, भोग्यस्य च भोक्तृत्वं प्राप्नोति । अत एकस्यैव भोक्तृभोग्यविभागो न संभवतीति चेत्, स्याल्लोकवत् । लोके यथा कटककुण्डलादीनां सुवर्णकार्यत्वेन सुवर्णाभेदेऽपि, न कटकस्य कुण्डलत्वमेवमेव, न भोग्यस्य भोक्तृत्वम् । तथाच कार्याणां कारणात्मकत्वेऽपि परस्परं कार्यात्मकत्वाभावाल्लोकदोषः ॥ १३ ॥

ब्रह्मकारणवादे श्रुतिविरोधं परिहरति ।

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ १४ ॥

ननु, वाचारम्भणं विकार इति श्रुत्या घटपटादिविकाराणां वाङ्मात्रारब्धत्वेन वस्तुतोऽभावात् कस्य ब्रह्म कारणं स्यादित्याशङ्क्य वाचारम्भणश्रुतेरर्थमाह । आरम्भणशब्दादिभ्यः कार्यस्य कारणानन्यत्वमुच्यते, नतु मिथ्यात्वमिति ॥ १४ ॥

भावे चोपलब्धेः ॥ १५ ॥

भाव एव विद्यमान एव घटे घटोपलब्धिर्नत्वभावे । वाङ्मात्रारब्धत्वे तु मिथ्यैवात्र घटोऽस्तीत्युक्ते घट उपलभ्येत । चकारेण, मृत्तिकेत्येव सत्यमिति श्रुतिरपि सत्यत्वप्रतिपादिका संगृहीता । अतो घटादिकार्याणां सत्यत्वाद् वाचारम्भणश्रुतिः कारणानन्यत्वमेव प्रतिपादयतीत्यर्थः ॥ १५ ॥

सत्त्वाच्चावरस्य ॥ १६ ॥

अवरस्य प्रपञ्चस्य सत्त्वात् । यदिदं किञ्च तत्सत्यमित्याचक्षते, सदेव सौम्येदमग्र आसीदित्यादिश्रुतिभ्यस्त्रैकालिकत्वाद् ब्रह्मत्वं, नतु मिथ्यात्वम् ॥ १६ ॥

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॥ १७ ॥

ननु, असद्वा इदमग्र आसीदिति श्रुत्या पूर्वं कार्यस्यासत्त्वमुच्यत इति चेन्न । अव्याकृतत्वरूपधर्मान्तरेण तथा व्यपदेशः, तदात्मानं स्वयमकुरुतेतिवाक्यशेषाज्ज्ञातव्यः । तत्र हि स्वस्यैव क्रियमाणत्वमुक्तम् ॥ १७ ॥

युक्तेः शब्दान्तराच्च ॥ १८ ॥

समवेतमेव कार्यं सद् उत्पाद्यत इति युक्तम् । समवायात्मकसम्बन्धस्य द्विनिष्ठत्वेन नित्यत्वेन च कार्यस्यापि कारणे स्थितिरव्यक्तरूपेण सर्वदाङ्गीकर्तव्या । कुलालादीनां प्रवृत्तिस्त्वभिव्यक्त्यर्था। शब्दान्तरं तु, सच्छब्दात्, तदात्मानं स्वयमकुरुतेत्यात्मपदः । अतो घटादिकार्यस्य सत्यत्वमेव युक्तं, न मिथ्यात्वम् ॥ १८ ॥

नन्वेवं घटादीनां नित्यत्वे प्रलयकालेऽप्युपलब्धिः स्यादित्याशङ्क्याह ।

पटवच्च ॥ १९ ॥

यथा संवेष्टितः पटो न व्यक्तं गृह्यते, विस्तृतस्तु सम्यग्गृह्यते । तथाऽऽविर्भावानाविर्भावेण जगतोऽपि ग्रहणाग्रहणे ज्ञेये ॥ १९ ॥

यथा च प्राणादिः ॥ २० ॥

यथा प्राणापानानां नियमने जीवनमात्रं सम्पद्यते । अनियमने त्वाकुञ्चनादिकमपि । नैतावता प्राणभेदो वक्तुं युक्तः । तथा जगतोऽपि पूर्वमसत्त्वं न वक्तुं शक्यम् । ज्ञानक्रियाभेदात् सूत्रद्वयमुक्तम् ॥ २० ॥

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २१ ॥

नन्वनेन जीवेनात्मनानुप्रविश्येत्यादिश्रुतिभिरितरस्य जीवस्यापि ब्रह्मत्वेन व्यपदेशाद् ब्रह्मणो जगत्कारणत्वे तद्धिताकरणदोषप्रसक्तिः । जीवहिताकरणं तु जीवानां दुःखदर्शनाज्ज्ञायत इति प्राप्ते ॥ २१ ॥

उच्यते ।

अधिकं तु भेदनिर्देशात् ॥ २२ ॥

पूर्वपक्षव्यावर्तकस्तुशब्दः । यदि ब्रह्म तावदेव स्यात्तदाऽयं दोषः। तत्तु जीवाज्जडाद्याधिकम् । आत्मा द्रष्टव्य इत्यादिवाक्येषु कर्मकर्तृभावेन भेदेन निर्देशाद् विज्ञानमय आनन्दमय इति भेदनिर्देशाच्च। अतोऽधिकस्य नियमनांशहितकरणादर्शनादंशभूतजीवानां दुःखादिदर्शनेऽपि न ब्रह्मणो जगत्कारणत्वे दोषः ॥ २२ ॥

अश्मादिवच्च तदनुपपत्तिः ॥ २३ ॥

यथा हीरमाणिक्यपाषाणादीनां पलाशचम्पकचन्दनानां पार्थिवत्वाविशेषेऽप्युच्चनीचत्वं दृश्यते । तथा जीवमात्रस्य ब्रह्मांशत्वेऽपि ब्रह्मादिस्थावरान्तानामुच्चनीचत्वं कार्यवैलक्षण्यं चोपपद्यते ॥ २३॥

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २४ ॥

ननु लोके कुलालादीनां घटादिकार्यकरणे चक्रादिसाधनान्तरोपसंहारदर्शनान्न केवलस्य ब्रह्मणो जगत्कारणत्वमुपपद्यत इति चेन्न। क्षीरवद्धि । यथा दुग्धं साधनान्तरमनपेक्ष्यैव दधि भवति तथा ब्रह्मापि साधनान्तरनिरपेक्षं जगद्रूपं भवतीत्यर्थः ॥ २४ ॥

देवादिवदपि लोके ॥ २५ ॥

अतो भिन्नकार्यकरणे दृष्टान्तः । यथा देवर्षिपितरो बाह्यनिरपेक्षा एव योगसामर्थ्यात् सर्वं कुर्वन्ति । तथा ब्रह्मापि साधनान्तरनिरपेक्षमेव सर्वं करोति ॥ २५ ॥

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २६ ॥

ननु ब्रह्म साधनान्तरनिरपेक्षमेव स्वात्मानं जगत् कुर्यात् तदा कृत्स्नं ब्रह्मैकमेव कार्यं स्यात् । यद्यंशभेदेन जगद् भवति, तदा निष्कलं निष्क्रियं शान्तमिति निरवयवत्वश्रुतिविरोधः । अतो न जगतो ब्रह्मकारणत्वं युक्तमिति प्राप्ते ॥ २६ ॥

उच्यते।

श्रुतेस्तु शब्दमूलत्वात् ॥ २७ ॥

तुः पक्षव्यावर्तकः । ब्रह्मणो जगत्कारणत्वं निरवयवत्वं चोभयमपि श्रूयते । श्रुतिसिद्धं च युक्त्या न बाधनीयम् । ब्रह्मणः शब्दमूलत्वाच्छब्दैकसमधिगम्यत्वात् । अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदिति वाक्यात् । सर्वभवनसमर्थे ब्रह्मणि विरोधाभावाच्च ॥२७॥

आत्मनि चैवं विचित्राश्च हि ॥ २८ ॥

ब्रह्मणो जगत्सृष्टौ देशकालसापेक्षतापि नास्ति । यत आत्मन्येव सर्वं सृजति । यतोऽस्य विचित्राः शक्तयः श्रूयन्ते । यद्वा, अनन्तरोऽबाह्य इतिश्रुत्यनुरोधाद् बाह्यसृष्टिं पूर्वं निरूप्यान्तरसृष्टिं निरूपयति । आत्मनीति ॥ २८ ॥

स्वपक्षदोषाच्च ॥ २९ ॥

प्रधानवादिनः स्वपक्षदोषा दुष्परिहराः । युक्तिविरोधात् । प्रमाणाभावेन तस्याचिन्त्यत्वकल्पनानुपपत्तेश्च ॥ २९ ॥

सर्वोपेता च तद्दर्शनात् ॥ ३० ॥

सर्वशक्तिभिरुपेता युक्ता परा देवता ब्रह्मैव । चकारात् सत्यत्वादिगुणयुक्ता च । यः सर्वज्ञः सर्वशक्तिः सर्वकर्ता सर्वकाम इत्यादिश्रुतिषु तथा दर्शनात् ॥ ३० ॥

विकरणत्वान्नेति चेत्तदुक्तम् ॥ ३१ ॥

ननु लोके इन्द्रियवत एव कर्तृत्वदर्शनाद् ब्रह्मणो विकरणत्वान्निरिन्द्रियत्वान्न कर्तृत्वं सम्भवतीति चेद्, एतस्याः समाधानं पूर्वमेव, श्रुतेस्तु शब्दमूलत्वादितिसूत्रेणोक्तम् । अनवगाह्यमाहात्म्ये ब्रह्मणि श्रुतिरेव प्रमाणम् । न तु कुतर्कावकाशः ॥ ३१ ॥

न प्रयोजनवत्त्वात् ॥ ३२ ॥

ननु प्रयोजनवतो लोके कर्तृत्वदर्शनाद् ब्रह्मण आप्तकामत्वेन

प्रयोजनाभावान्न कर्तृत्वं सम्भवतीति प्राप्ते ॥ ३२ ॥

उच्यते ।

लोकवत्तु लीला कैवल्यम् ॥ ३३ ॥

तुः पक्षव्यावृत्तौ । इयं हि लोकवल्लीला । न हि लीलायां किंचित् प्रयोजनं दृष्टम् । लीलाया एव स्वतः फलरूपत्वात् । सा लीला कैवल्यं मोक्षरूपैव । ब्रह्मणो लीलाया एवान्यस्य कीर्तने मोक्ष इत्यर्थः । यद्वा सा लीलेव केवला, नत्वस्याः प्रयोजनान्तरमित्यर्थः ॥३३॥

ननु जीवेषु सुखदुःखप्रलयकरणदर्शनादीश्वरो विषमो निर्घृणश्च स्यादित्याशङ्क्य परिहरति ।

वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति ॥ ३४ ॥

ईश्वरस्य सुखदुःखदाने कर्मसापेक्षत्वान्नोक्तदोषः । यत, एष ह्येव साधु कर्म कारयति पुण्यो वै पुण्येन कर्मणेत्यादिश्रुतिस्तथा दर्शयति । कर्मसापेक्षतया करणेऽपीश्वरत्वं न विरुध्यते । विरुद्धधर्माश्रयत्वादिति माहात्म्यम् । वस्तुतस्तु वादिबोधनायैतदुक्तम् । आत्मसृष्टेर्वैषम्यनैर्घृण्यसम्भावनैवात्र नावतरति ॥ ३४ ॥

न कर्माविभागादिति चेन्नानादित्वात् ॥ ३५ ॥

ननु कर्म न सम्भवति, अविभागात् पूर्वं कार्याणां विभागाभावादतः कथं कर्मसापेक्षमीश्वरस्य सुखादिदानमितिचेन्न । बीजाङ्कुरवत् प्रवाहस्यानादित्वात् । अतो न कर्मणामभाव इति भावः ॥३५॥

प्रवाहानादित्वे प्रमाणमाह ।

उपपद्यते चाप्युपलभ्यते च ॥ ३६ ॥

प्रवाहस्यानादित्वमुपपद्यते । अन्यथा जीवानामभावे कस्य संसारः स्यात् । कृतहानाकृताभ्यागमश्च स्यात् । अतो नियमार्थं कर्मणां प्रवाहस्यानादित्वमङ्गीकार्यम् । श्रुतिस्मृत्योरुपलभ्यते च प्रवाहस्यानादित्वम् । अनेन जीवेनात्मनानुप्रविश्येति श्रुतौ सर्गादौ जीवप-

दप्रयोगात् प्रवाहानादित्वं सूच्यते । तपसैव यथापूर्वं स्रष्टा विश्वमिदं भवानिति स्मृतावपि तथोक्तम् ॥ ३६ ॥

एवमखिलजगत्कारणत्वं ब्रह्मण उपपाद्योपसंहरति ।

सर्वधर्मोपपत्तेश्च ॥ ३७ ॥

वेदोक्ताः सर्वे धर्माः सर्वसमर्थत्वाद् ब्रह्मण्येवोपपद्यन्ते, न प्रधानादौ । अतस्तस्य जगत्कारणत्वं निष्प्रत्यूहमिति सिद्धम् ॥ ३७ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां द्वितीयाध्यायस्य प्रथमः पादः ॥ १ ॥

द्वितीयाध्यायस्य द्वितीयः पादः ।

स्वातन्त्र्येणाखिलविरुद्धवादनिराकरणार्थं पादारम्भः । तत्र प्रथममनुपपत्त्या प्रकृतिकारणवादं निरस्यति ।

रचनानुपपत्तेश्च नानुमानम् ॥ १ ॥

भूर्भुवादिलोकानामचेतनेन प्रधानेन रचनाया अनुपपत्तेर्न प्रधानं जगत्कारणम् । अतो न जगत्कारणान्यथानुपपत्त्या तदनुमातव्यम् । सर्वशक्तिमता चेतनेन ब्रह्मणा जगत्कारणसम्भवादन्यथानुपपत्तिपरिक्षयाच्च ॥ १ ॥

प्रवृत्तेश्च ॥ २ ॥

यदि प्रधानमेव जगत्कारणं तदा तत्तत्कार्यार्थं जीवानां प्रवृत्तिर्दृश्यमाना बाधिता स्यात् । सर्वस्यैव प्रधानपरिणामत्वात् । अतः प्रवृत्त्यन्यथानुपपत्त्या न प्रधानं जगत्कारणम् । यद्वा प्रधानस्य जडत्वाच्चेतनप्रेरणं विना तस्यैव प्रवृत्त्यसम्भवाच्च प्रधानकारणवाद उपपद्यते ॥ २ ॥

पयोऽम्बुवच्चेत्तत्रापि ॥ ३ ॥

ननु यथा पयः स्वत एव विचित्रफेनरचनां करोति, यथा वा नद्यादिजलं स्वत एव स्पन्दते, तथा प्रधानप्रवृत्तिरपि स्वत एव भविष्यतीति चेन्न । तत्रापि पयसा विचित्रफेनरचनायां दोहनाधिश्रयणादौ चेतनप्रवृत्तिदर्शनाज्जलस्पन्दने वृष्टिकर्तॄणां मेघानामेव चेतनानां सत्त्वादतोऽचेतनप्रधानप्रवृत्त्यसम्भवात् प्रधानकारणवादो न युक्तः ॥ ३ ॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ ४ ॥

प्रधानस्यानपेक्षत्वाद् अन्यापेक्षाभावान्निरन्तरकार्यकरणमेव स्याच्च तु तद्व्यतिरेकेणावस्थितिः । पुरुषाधिष्ठानस्यापि सत्त्वात् । तथा सति मोक्षानुपपत्तिः ॥ ४ ॥

अन्यत्राभावाच्च न तृणादिवत् ॥ ५ ॥

ननु यथा तृणपल्लवजलानि स्वयमेव दुग्धादिभावेन परिणमन्ते तथा प्रधानपरिणामोऽपि युक्तोऽङ्गीकर्तुमितिचेद् अन्यत्र शृङ्गादौ वृषे च दुग्धात्मकपरिणामस्याभावान्न तथा नियमेन परिणामोऽङ्गीकर्तव्यः । चेतनक्रियाऽपि तत्र सहकारिणीति सूचनार्थे चकारः । अतो लोकदृष्टान्तासम्भवादचेतनं प्रधानं जगत्कारणत्वेन नाङ्गीकर्तव्यम् ॥ ५ ॥

अभ्युपगमेऽप्यर्थाभावात् ॥ ६ ॥

यथाकथञ्चित् प्रधानस्य कारणत्वेऽङ्गीकृतेऽपि तस्य जडत्वेन प्रेक्षयकारित्वासम्भवाच्च पुरुषार्थसिद्धिः ॥ ६ ॥

एवं केवलप्रधानस्य जगत्कारणत्वमिति मतं निरस्य पुरुषप्रेरितस्य तस्य कारणत्वं भविष्यतीत्याशङ्कां परिहरति ।

पुरुषाश्मवदिति चेत् तथापि ॥ ७ ॥

यथा पङ्गुः पुरुषोऽन्धमारुह्य परस्परोपकाराय गच्छति । यथाऽयःकान्तः स्वसन्निधानमात्रेण लोहे क्रियामुत्पादयति । एवं पुरुषाधिष्ठितं तत्सन्निहितं वा प्रधानम् । तत्र प्रधानप्रेरकत्वं पुरुषस्य स्वतस्तदा प्रधानस्याप्रयोजकत्वं दोषः । यदि तत्प्रेरकत्वं प्रधानाधीनं तदा निरन्तरं कार्यकरणं स्यात् । प्रकृतिपुरुषयोर्नित्यसम्बन्धसत्वात् ॥ ७ ॥

अङ्गित्वानुपपत्तेश्च ॥ ८ ॥

यदि प्रकृतिपुरुषयोरङ्गाङ्गित्वं स्यात्, सम्भवेत् सा प्रक्रिया । तदेव तु न सम्भवति । पुरुषस्याङ्गित्वे प्रधानपारतन्त्र्यस्वीकार आपद्येत । मतहानिश्च स्यात् । प्रकृतेरङ्गित्वेऽनिर्मोक्षः ॥ ८ ॥

अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॥ ९ ॥

ननु प्रकृतिरन्यथानुपपत्त्याऽनुमिता । तथा च तथैवानुमातव्या यथा सकलदोषाणां परिहारो भवतीति चेत् तथापि तस्याः ज्ञ-

किंवियोगाज्ज्ञानशक्तेरभावान्नोक्तरीत्या दोषाणां परिहारः सम्भव, तीत्यर्थः ॥ ९ ॥

विप्रतिषेधाच्चासमञ्जसम् ॥ १० ॥

साङ्ख्यमतानुवर्तिनां, केचित् षड्विंशतिं प्राहुरपरे पञ्चविंशतिमिति न्यायेन परस्परं विगानादसमञ्जसमिदं दर्शनम्। वस्तुतस्तु जगत्कारणनिर्णयस्यालौकिकत्वाद्वेदानुसारेणैव स वक्तव्यो, न तु युक्त्याभासैरिति ॥ १० ॥

एवं सांख्यमतं निरस्यातः परं परमाणुकारणवादं निरस्यति।

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ११ ॥

एवं हि नैयायिकानां प्रक्रिया। परमाणुद्वयं संयुज्य स्थूलकार्यार्थं प्रथमं द्व्यणुकं भवतीति। तत्र परमाणोरुपर्यधोभावेन मिलने तद्द्विगुणपरिमाणेन द्व्यणुकं महत् स्यात्। प्राक्पश्चाद्भावेन मिलने दीर्घवद् द्व्यणुकं स्यात्। यतः परमाणुपरिमाणं ह्रस्वं परितोमण्डलं चाङ्गीकृतम्। अनेन सूत्रेण तन्मतानुवाद उपहासार्थं कृतः ॥ ११ ॥

ततः किमत आह।

उभयथापि न कर्मातस्तदभावः ॥ १२ ॥

उभयथापि न द्व्यणुकं सम्भवति। परमाणुषु प्रदेशाभावेनोभयोः सङ्घटनाभावात् कल्पना मनोरथमात्रम्। यतः परमाणावसंयुक्तांशाभावेन परमाणुद्वयसम्बन्धे एक एव परमाणुः स्यात्। किञ्च, संयोगजकर्मापि न सम्भवति। कारणान्तरासम्भवात्। प्रयत्नवदात्मसंयोगेऽदृष्टवदात्मसंयोगे वा कारणत्वेनाभ्युपगम्यमाने पूर्वोक्त एव दोषः। प्रदेशाभावेन द्व्यणुकोत्पत्त्यसम्भवलक्षणः ॥१२॥

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ १३ ॥

परमाणुद्व्यणुकयोः समवायोऽभ्युपगम्यते। स च नित्यो नित्यमेव सम्बन्धिनमपेक्षते। सम्बन्धस्योभयनिष्ठत्वात्। अतोऽपि न द्व्यणुकस्योत्पत्तिः सम्भवति। किञ्च समवायस्य सम्बन्धत्वेन संयोगतुल्यत्वात् तस्यापि सम्बन्धान्तरापेक्षा। एवं तत्सम्बन्धस्या-

पि सम्बन्धान्तरापेक्षा। एवं तत्सम्बन्धस्यापि सम्बन्धन्तरापेक्षाया-मनवस्था॥ १३॥

नित्यमेव च भावात्॥ १४॥

परमाणूनां कारणान्तरस्य च नित्यमेव भावात् सत्वात् सदैव द्व्यणुकादिकार्यं स्यात्॥ १४॥

रूपादिमत्त्वाच विपर्ययो दर्शनात्॥ १५॥

यद् रूपादिमत् तदनित्यमितिव्याप्त्यङ्गीकारात् परमाणोरपि रूपादिमत्वाद् विपर्ययोऽनित्यत्वं स्यात्। अपरमाणुत्वं च। नचेयं व्याप्तिः परमाण्वतिरिक्तविषयेति वाच्यम्। श्रुतिबलेन ब्रह्मणो जगत्कारणत्वे सिद्धे तदर्थं परमाण्वङ्गीकारस्याप्रामाणिकत्वात्॥१५॥

उभयथापि च दोषात्॥ १६॥

परमाणूनां रूपादिमत्त्वेऽनित्यत्वं दोषः। तेषां नीरूपत्वे कार्ये रूपानुपपत्तिर्दोषः॥ १६॥

अपरिग्रहाच्चात्यन्तमनपेक्षा॥ १७॥

वैदिकशिष्टानामपरिग्रहात् सर्वथानपेक्षाऽक्षपादीयदर्शने। अतस्तदुक्तं नादर्तव्यमिति भावः॥ १७॥

अतः परं बाह्यसमयं निराकरोति।

समुदाय उभयहेतुकेऽपि तदप्राप्तिः॥ १८॥

एवं हि बाह्या मन्यन्ते। परमाणुसमूहात्मकः पृथिव्यादिभूतसमुदाय एकः। रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकपञ्चस्कन्धसमुदायोऽपरः। एतदुभयसमुदायसम्बन्धे जीवस्य संसारस्तस्यापगमे मोक्ष इति। तत्रोच्यते। एवमुभयहेतुकेऽपि समुदाये स्वीक्रियमाणे सर्वपदार्थानां क्षणिकत्वाज्जीवमात्रस्य क्षणिकत्वाद्वा जीवस्य तदप्राप्तिः स्यात्। कुतस्तत्सम्बन्धे जीवस्य संसार इति भावः॥ १८॥

इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्र-

निमित्तत्वात् ॥ १९ ॥

एतेषां क्षणिकत्वेऽपि पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणत्वात् सन्ततेरेव जीवजडरूपत्वाल्लोकदोष इति चेन्न । एतेषामुत्पत्तिमात्रे निमित्तत्वमङ्गीक्रियते, न तु समुदाये । अतः स्थैर्याभावेनानुसन्धानाभावात् समुदायानुपपत्तेश्च लोकदोषपरिहार इति भावः ॥ १९ ॥

किञ्च ।

उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥

अग्रिमस्योत्पत्तिरपि न सम्भवति । उत्पन्नो ह्युत्पादयति । उत्पत्तिक्षण एव तस्य नष्टत्वान्नोत्तरोत्पादकत्वं सम्भवति । एकक्षण एवोत्पत्तिस्थितिप्रलयकार्यकरणादिसर्वाङ्गीकारे विरोधात् किमपि न स्यात् ॥ २० ॥

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ २१ ॥

सर्वं क्षणिकमित्येका क्षणिकत्वप्रतिज्ञा । चतुर्विधान् हेतून् प्रतीत्य चित्तचैत्ता उत्पद्यन्त इति द्वितीया प्रतिज्ञा । तत्र पदार्थस्य क्षणान्तरसम्बन्धस्वीकारे क्षणिकत्वप्रतिज्ञा हीयेत । तदनङ्गीकारे द्वितीया प्रतिज्ञा नश्यति । वस्तुनः क्षणान्तरसम्बन्धाभावेन चतुर्विधहेतुसमुदायासम्भवात् । हेतुसमुदायश्चेन्नाङ्गीक्रियते तदा नियामकाभावात् सर्वं सर्वतो युगपत् स्यात् ॥ २१ ॥

प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिर-विच्छेदात् ॥ २२ ॥

किञ्च, बुद्धिबोध्यं त्रयादन्यत्र संस्कृतं क्षणिकं च । त्रयं तु निरोधद्वयमाकाशं चेति बाह्याः कथयन्ति । तत्र निरोधद्वयाङ्गीकारं प्रत्याचष्टे । भावानां बुद्धिपूर्वको विनाशः प्रतिसंख्यानिरोधः । अबुद्धिपूर्वको नाशोऽप्रतिसङ्ख्यानिरोधः । एतन्निरोधद्वयमपि न प्राप्नोति । पदार्थानां सन्ततेरविच्छेदात् । भावानां च क्षणिकत्वेन नाशकसम्बन्धाभावात् प्रथमनिरोधोऽसम्भववचनः । द्वितीयनिरोधस्तु

पदार्थानां क्षणिकत्वाङ्गीकारेणैवानुक्तसिद्धौ विशेषतो वक्तव्य. ॥२२॥

उभयथा च दोषात् ॥ २३ ॥

ते हि मन्यन्ते, प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधान्तर्गताविद्यानाशो मोक्ष इति । तत्राविद्याया' सपरिकराया निर्हेतुकनाशे मोक्षसाधननिरूपकशास्त्रवैफल्यम् । अविद्यातत्कार्यातिरिक्तस्य पदार्थस्यानङ्गीकारात् सहेतुकविनाशोऽपि न सम्भवति । वन्ध्यापुत्रकृतरज्जुसर्पनाशवत् । अत उभयथा दोषान्नेदं मतं समीचीनम् ॥ २३ ॥

आकाशे चाविशेषात् ॥ २४ ॥

यच्च नैरुक्त, प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधद्वयमावरणाभावात्मकमाकाश चैतत्त्रयमपि निरुपाख्यमिति । तत्राकाशेऽपि पदार्थान्तरवद्वस्तुत्वव्यवहारस्याविशेषान्नायमभ्युपगम समीचीन. ॥ २४ ॥

अनुस्मृतेश्च ॥ २५ ॥

स एवाय घट इत्याद्यनुस्मरणदर्शनादनुभवस्मरणयोरेकाश्रयत्वादेकविषयकत्वनियमाच्च सर्वोऽपि क्षणिकवादो बाधितो मन्तव्य ॥ २५ ॥

किञ्च, विनष्टाद् बीजादङ्कुरोत्पत्तिदर्शनान्नानुपमर्द्य प्रादुर्भाव वैनाशिका मन्यन्ते । तथा सत्यसतोऽलीकाज्जगदुत्पत्तिरिति प्राप्त, उच्यते ।

नासतोऽदृष्टत्वात् ॥ २६ ॥

असतो न कार्यमुत्पद्यत । शशशृङ्गादिभिरसद्भि कार्योत्पत्तेरदृष्टत्वात् ॥ २६ ॥

उदासीनानामपि चैवं सिद्धिः ॥ २७ ॥

अभावाद् भावोत्पत्तेरङ्गीकारे उदासीनानामपि क्षेत्रादिष्वकुर्वतामपि धान्यादिसिद्धि स्यात् । अभावस्य सुलभत्वात् ॥ २७ ॥

एवमसत कारणत्व निरस्य विज्ञानवादिसम्मतं प्रपञ्चस्यासत्त्व निराकरोति ।

नाभाव उपलब्धेः ॥ २८ ॥

विज्ञानवादी हि विज्ञानमय एव प्रपञ्चो, न तु बाह्यः कश्चन पदार्थोऽस्तीति मनुते। तत्राह। अस्य बाह्यपदार्थजातस्याभावो नाङ्गीकर्तुं शक्यः। उपलब्धेः। बाह्यप्रपञ्चः सर्वोऽप्युपलभ्यते। यः घटार्थमुपलभमानेव नोपलभ इति वदति स कथमाप्तः स्यात् ॥ २८ ॥

ननु यथा स्वाप्निकपदार्थ उपलभ्यते, नचासौ सत्य इति वक्तुं शक्यः कालान्तरे बाधात्। एवमसन्नेव बाह्यः पदार्थ उपलभ्यत इति नोपलब्धिमात्रेण वस्तुसत्यं वक्तुं शक्यमित्याह।

वैधर्म्याच्च न स्वप्नादिवत् ॥ २९ ॥

स्वाप्निकपदार्थानां स्वप्ने स्वप्नान्ते वाऽन्यथाभावोपलम्भान्न स्वाप्निकपदार्थवद् बाह्यो घटादिर्ज्ञातव्यः। वर्षानन्तरं दृष्टो घटादिस्तथैव दृश्यते। न तथा स्वाप्निको घटादिः। चकारात् स्वस्य मोक्षे प्रवृत्तिव्याघातश्च स्यादिति ॥ २९ ॥

यच्च तैरुच्यते, बाह्यपदार्थं विनापि वासनावैचित्र्येण ज्ञानवैचित्र्यं भवतीति। तत्राह।

न भावोऽनुपलब्धेः ॥ ३० ॥

वासनानां न भावः सम्भवति। तव मते बाह्यार्थस्यानुपलब्धेः। उपलब्धस्य हि वासनाजनकत्वं दृष्टम्। वासनानामनादित्वस्वीकारे त्वन्धपरम्पराप्रसक्तिः। अर्थं विना वासनाया असम्भवात्। वासनां विनार्थोपलब्धेर्दृष्टत्वादन्वयव्यतिरेकाभ्यां बाह्यार्थसिद्धिरप्रत्यूहैव ॥ ३० ॥

क्षणिकत्वाच्च ॥ ३१ ॥

आलयविज्ञानस्य क्षणिकत्वाद्वासनाया आधारोऽपि न सम्भवति ॥ ३१ ॥

सर्वथानुपपत्तेश्च ॥ ३२ ॥

बाह्यमतं यथा यथा विचार्यते तथा तथाऽनुपपन्न एव भातीति कियद् दूषणं वक्तव्यमित्यर्थः। चकाराद् वेदविरोधो मुख्यो दोषः सु-

चितः । एवं सौत्रान्तिकविज्ञानवादिनौ प्रत्युक्तौ । माध्यमिकोऽत्यन्तासम्बद्धभाषित्वेनोपेक्षितः सूत्रकारेण ॥ ३२ ॥

इदानीं दिगम्बरमतं निरस्यति । ते ह्यन्तर्निष्ठा वाह्यवस्तुन्युदासीना वाह्यवस्तुनिराकरणार्थं सप्तभङ्गीन्यायं प्रतिवस्तु योजयन्ति । स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्तिचावक्तव्यः, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च स्यान्नास्ति चावक्तव्यश्चेति सप्तभङ्गीन्यायः । अत्र स्याच्छब्दस्तिङन्तप्रतिरूपको निपातोऽनेकान्तद्योतकः । तन्मतं दूषयति ।

नैकस्मिन्नसम्भवात् ॥ ३३ ॥

अयं सप्तभङ्गीन्यायो नैकस्मिन् योजयितुं शक्यः । अस्तिनास्तिशब्दप्रतिपादितयोर्भावाभावयोरेकत्रासम्भवात् ॥ ३३ ॥

ननु वाह्यपदार्थे औदासीन्यान्नास्यैकत्रासम्भवलक्षणो दोष इत्यत आह ।

एवञ्चात्माकार्त्स्न्यम् ॥ ३४ ॥

एवं सत्यपि चात्मनो वस्तुपरिच्छेदादकार्त्स्न्यं सर्वत्राभावः स्यात् । यद्वा तैः शरीरपरिमाण आत्माङ्गीक्रियते । तथा सति शरीराणां तुल्यत्वाभावादात्मनो, न कार्त्स्न्यं कृत्स्नशरीरतुल्यत्वाभावः प्राप्नोति ॥ ३४ ॥

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३५ ॥

ननु शरीराणामवयवोपचयाऽपचयानुसारेणात्मनोऽप्यवयवोपचयापचयाङ्गीकारेण तत्तुल्यत्वात् पर्यायादविरोध इति चेन्न । एवं सत्यात्मनो विकारित्वं स्यात् । आत्मनः सङ्कोचविकासाङ्गीकारेऽपि विकारित्वं दुष्परिहरमेव ॥ ३५ ॥

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ ३६ ॥

अन्त्यावस्थितिर्मोक्षकालिकपरिमाणावस्थितिस्तस्या अङ्गीकारात् पूर्वोक्तदोषपरिहारार्थं चोभयनित्यत्वं महत्परिमाणमणुपरिमाणं वेदङ्गीक्रियते, तर्ह्युभयथापि शरीरपरिमाणव्याघातान्मतान्तरप्रवेशाच्च न नास्तिकाभिमतात्मसिद्धिः ॥ ३६ ॥

एवं बाह्यमतानि निरस्य तार्किकाद्यभिमतमीश्वरं निराकरोति।

पत्युरसामञ्जस्यात् ॥ ३७ ॥

ईश्वरो जीवेभ्यो भिन्नस्तेषां नियामकश्चेदङ्गीक्रियते, तदा वैषम्यनैर्घृण्यात्मकासामञ्जस्यप्रसक्तेर्नैवाङ्गीकर्तव्यः । कर्मसापेक्षत्वे स्वातन्त्र्याभावादनीश्वरत्वं प्रसज्ज्येत । अतः शुष्कतर्केण नैवमीश्वरोऽङ्गीकर्तव्यः ॥ ३७ ॥

सम्बन्धानुपपत्तेश्च ॥ ३८ ॥

जीवब्रह्मणोर्विभुत्वेनाजसंयोगानङ्गीकारात् सम्बन्धाभावेन नियामकत्वानुपपत्तिः । तुल्यत्वादपि न नियामकत्वं सम्भवतीति सूचनार्थं चकारः ॥ ३८ ॥

अधिष्ठानानुपपत्तेश्च ॥ ३९ ॥

जगत्कर्तृत्वेन कल्प्यमान ईश्वरो लौकिकन्यायेनाधिष्ठित एव कार्यं करोतीति कल्पनीयम् । तथाचेश्वरस्याप्यधिष्ठाने कल्प्यमाने मतविरोधोऽनवस्थाप्रसक्तिश्च स्यात् । अतोऽधिष्ठानानुपपत्तेर्न तन्मतसिद्धस्येश्वरस्य कर्तृत्वं सम्भवतीत्यर्थः ॥ ३९ ॥

करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥

नन्वेवमन्यत्रदोषपरिहारार्थं ब्रह्म करणवदङ्गीकर्तव्यमिति चेन्न । तथा सति सुखदुःखभोगादिकं प्रसज्ज्येत । करणवतो भोगनियमात् ॥ ४० ॥

अन्तवत्त्वमसर्वज्ञता वा ॥ ४१ ॥

प्रकृतेर्जीवस्य च नियमनार्थमीश्वरः स्वीकृतः । नियमनं चैतयोः परिच्छेदे सति सम्भवति । तथाङ्गीकारे जीवप्रकृत्योरन्तवत्त्वं भवेत् । तथाचानित्यत्वे मोक्षशास्त्रवैफल्यं प्रसज्ज्येत । एतद्दोषनिरासाय तयोर्विभुत्वे नित्यत्वे चाङ्गीकृते सम्बन्धाभावादीश्वरस्यासर्वज्ञता वा स्यात् । अतोऽसङ्गतस्तार्किकसमयः ॥ ४१ ॥

अतः परं पाञ्चरात्रिकमतेऽपि विरुद्धांशनिराकरणार्थमधि-

करणान्तरमारभते । ते हि वासुदेवात् सङ्कर्षणस्तस्मात् प्रद्युम्नस्तस्मादनिरुद्ध इति चतुर्व्यूहोत्पत्तिं वदन्ति । तद् दूषयति ।

उत्पत्त्यसम्भवात् ॥ ४२ ॥

संकर्षणस्य जीवत्वाङ्गीकाराज्जीवस्योत्पत्तेरसम्भवान्नेदं मतं युक्तमित्यर्थः । जीवस्योत्पत्त्यङ्गीकारे तु तस्यानित्यत्वप्रसक्त्या मोक्षशास्त्रवैफल्यं प्रसज्येत ॥ ४२ ॥

नच कर्तुः करणम् ॥ ४३ ॥

यदपि तैरङ्गीक्रियते, कर्तुः संकर्षणनामकजीवात् प्रद्युम्नसंज्ञकं मन उत्पद्यत इति । इदं लोकेऽप्रसिद्धम् । कुलालादिभ्यः कर्तृभ्यो घटादिकरणानामुत्पत्तेरदर्शनात् ॥ ४३ ॥

विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥

यद्येते सर्वे परमेश्वरा विज्ञानादिमन्त इत्युच्यते, तथा सति सर्वेष्वीश्वरत्वस्याप्रतिषेधः । तथाचानेकेश्वरत्वदोषप्रसक्तिरित्यर्थः ४४

विप्रतिषेधाच्च ॥ ४५ ॥

अस्मिन् मते कल्पनाबाहुल्याद् वेदनिन्दादर्शनाच्च विप्रतिषेधः । चकाराद् वेदप्रक्रियाविरोधश्च सूचितः । अतोऽसमञ्जसमिदं दर्शनम् ॥ ४५ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां द्वितीयाध्यायस्य द्वितीयः पादः ।

द्वितीयाध्यायस्य तृतीयः पादः ।

एवं पूर्वपादे वेदविरुद्धानि मतानि निराकृत्य ब्रह्मवादे ब्रह्मजीवनिरूपकश्रुतिषु विरुद्धांशनिराकरणाय तृतीयः पाद आरभ्यते । तत्र वेदान्ते सृष्टिर्द्विधा निरूप्यते । एतस्माज्जायते प्राण इतिश्रुत्यैर्नुरोधेन भूतभौतिकं सर्वं ब्रह्मण एव विस्फुलिङ्गन्यायेन जायते इत्येकः प्रकारः । अपरस्तु वियदादिक्रमेण सृष्टिर्जायत इति । तत्र क्रमसृष्टिनिरूपणे छान्दोग्ये, तत्तेजोऽसृजतेति तेजोऽबन्नानां सृष्टिरुक्ता, न वाय्वाकाशयोः । तैत्तिरीयोपनिषत्तु, आकाशः सम्भूत इत्यादिना तयोरपि सृष्टिरुक्ता । वाक्यद्वयस्यापि क्रमसृष्टिनिरूपकत्वादेकवाक्यत्वं युक्तम् । अत आकाशस्योत्पत्तिरस्ति न वेति संशये पूर्वपक्षी नेत्याह ।

न वियदश्रुतेः ॥ १ ॥

विमतम् आकाशं नोत्पद्यते । छान्दोग्ये सृष्टिनिरूपणे तदुत्पत्तेरश्रवणात् ॥ १ ॥

अस्ति तु ॥ २ ॥

तु' पक्षव्यावर्तक । तैत्तिरीयके वियदुत्पत्तिरस्ति । तथाच तदेकवाक्यतायै छान्दोग्येऽपि साङ्गीकर्तव्येत्यर्थः ॥ २ ॥

शङ्कते ।

गौण्यसम्भवात् ॥ ३ ॥

तैत्तिरीयोपनिषदुक्ता वियदुत्पत्तिर्गौणी । आकाशस्य निरवयवत्वाद् व्यापकत्वाच्च मुख्योत्पत्तेरसम्भवात् ॥ ३ ॥

शब्दाच्च ॥ ४ ॥

वायुश्चान्तरिक्षं चैतदमृतमिति, आकाशवत् सर्वगतश्च नित्य इत्यादिशब्दादाकाशस्य नित्यत्वबोधनादपि तदुत्पत्तिर्गौणी वक्तव्या ॥ ४ ॥

नन्वाकाशः सम्भूत इत्यत्रैकस्यैव सम्भूतशब्दस्याग्न्यादौ मुख्योत्पत्तिवाचकत्वम्, आकाशे गौणोत्पत्तिवाचकत्वमिति युगपद् वृत्तिद्वयविरोधाशङ्कीकर्तुं युक्तमत आह ।

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥

एकस्यापि पदस्य काचिन्मुख्या वृत्तिः, काचिद् गौणीति स्यात्। यथा तपसा ब्रह्म विजिज्ञासस्व, तपो ब्रह्मेति श्रुतौ प्रथमब्रह्मशब्दो मुख्यार्थको, द्वितीयस्तु गौणार्थकः । एवं सम्भूतशब्दोऽपीति नाकाशस्य पृथिव्यादिवन्मुख्योत्पत्तिरिति प्राप्ते ॥ ५ ॥

उच्यते ।

प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥

यद्याकाशस्योत्पत्तिर्नाङ्गीक्रियेत, तर्ह्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा हीयते । अव्यतिरेकाद् आकाशस्यानुद्गमात् । अत आकाशस्यालौकिकत्वेन तज्ज्ञानस्य सर्वज्ञतायामपेक्षितत्वाल्लौकिकत्वेन जीववद् ब्रह्मरूपत्वानङ्गीकाराच्चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्ध्यर्थं तदुत्पत्तिरङ्गीकार्येत्यर्थः । नन्वाकाशस्यानुद्गमेऽपि जीववैलक्षण्येऽपि वस्तुसामर्थ्येनैतादृशमप्येकं ब्रह्मरूपमस्तीति स्वीकारान्न प्रतिज्ञाहानिरतो आह । शब्देभ्यः । येनाश्रुतं श्रुतं भवतीतिशब्दात् प्रकृतिविकारभावेनैव श्रुतिरेकविज्ञानं व्युत्पादयतीति न वस्तुसामर्थ्येन तादृशं ब्रह्मरूपमङ्गीकर्तव्यमित्यर्थः ॥ ६ ॥

यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥

आकाशोत्पत्त्यसम्भावनानिरासकस्तुशब्दः । यत्किञ्चिद् विकृतं तस्य सर्वस्य विभाग उत्पत्तिर्दृष्टा । आकाशमपि लौकिकव्यवहारविषयत्वाद्विकृतम् । अतोऽस्याप्युत्पत्तिर्युक्ता । एवमाकाशोत्पत्तौ श्रुतिसिद्धायाम्, आकाशवत् सर्वगतश्च नित्य इत्यादिश्रुतिभ्य आकाशनियामकतदाधिदैविकरूपब्रह्मप्रतिपादिका बोध्या ॥ ७ ॥

एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥

आकाशोत्पत्तिस्थापनेन वायोरुत्पत्तिः समर्थिता । सैषा अन-

त्मिता देवतेत्यादिश्रुतिराधिदैविकवाग्रुपरा ॥ ८ ॥

ननु यथाऽऽकाशोत्पत्तिः समर्थिता तन्नित्यत्वप्रतिपादकश्रुतीनामन्यार्थप्रतिपादनेन, तथा ब्रह्मणोऽप्युत्पत्तिरस्त्वित्यत आह ।

असम्भवस्तु सतोऽनुपपत्तेः ॥ ९ ॥

तुः पक्षव्यावर्तकः । सन्मात्रस्य ब्रह्मण उत्पत्तेरसम्भवः । न हि कार्योत्पत्तौ कारणस्योत्पत्तिरङ्गीक्रियते । कुण्डलोत्पत्तौ कनकोत्पत्तेरनभ्युपगमात् । ब्रह्मण उत्पत्तिः स्वतो न सम्भवति । अन्यतश्चेदनवस्था । यत्सर्वस्य मूलं तदेव ब्रह्मेतिस्वीकारात् । अतोऽनुपपत्तेर्ब्रह्मण उत्पत्तेरसम्भवः ॥ ९ ॥

तेजोऽतस्तथा ह्याह ॥ १० ॥

अतो वायुभावापन्नब्रह्मणस्तेज उत्पन्नम् । तथाहि, वायोरग्निरितिश्रुतिराह ॥ १० ॥

आपः ॥ ११ ॥

अग्नेराप इति श्रुतेस्तेजोरूपब्रह्मण आपो जाताः । सर्वश्रुतीनामविरोध इतिसूचनार्थमेकमिदं सूत्रं श्रुतिसिद्धार्थानुवादकमुक्तम् ॥ ११ ॥

ता आप ऐक्षन्त बह्वयः स्याम प्रजायेमहीति, ता अन्नमसृजन्तेति श्रूयते । अत्रान्नशब्देन व्रीह्यादय उत पृथिवीति संशये, तैत्तिरीये, अद्भ्यः पृथिवी पृथिव्या ओषधय ओषधीभ्योऽन्नमिति श्रवणाद् अन्नमयं हि सौम्य मन इत्यादौ तेजोऽबन्नानां सहचारोपलम्भात् पृथिव्योषध्यन्नानां मध्येऽभेदविवक्षया यत्किञ्चिन्निरूपणीयेऽन्नमुक्तमिति प्राप्ते, उच्यते ।

पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥

अत्रान्नशब्देन पृथिवी । यतोऽधिकारो भूतानामेव, न तु भौतिकानाम् । नीलं च रूपं पृथिव्या एव सम्भवति । अद्भ्यः पृथिवीति शब्दान्तरम् । एभ्यो हेतुभ्योऽन्नशब्देन पृथिव्येवोच्यते, न त्वन्नम् ॥ १२ ॥

तदभिध्यानादेव तु तल्लिङ्गात् सः ॥ १३ ॥

कार्यरूपादाकाशाद् वाय्वादीनामुत्पत्तिं श्रुतिर्वारयति । किन्तु, तदभिध्यानात् तस्य ब्रह्मणोऽभिध्यानं तत्तत्कार्योत्पादनार्थं तत्पर्यालोचनं, ततस्तदात्मकत्वं, तेन तच्छब्दवाच्यत्वं तस्मात् तद्भावापन्नब्रह्मण एव कार्यं, नत्वाकाशादिभ्यः केवलेभ्यः । तल्लिङ्गात् सर्वकार्यकर्तृत्वं लिङ्गं ब्रह्मण एवेति सर्ववेदान्तेषु निश्चितमतस्तस्मादेव कार्योत्पत्तिर्नतु केवलेभ्यो भूतेभ्यः । तस्मात् स एव सर्वं सृजतीत्यर्थः ॥ १३ ॥

उत्पत्तिक्रमं विचार्य लयक्रमं विचारयति।

विपर्ययेण तु क्रमोऽत उपपद्यते ॥ १४ ॥

उत्पत्तिक्रमेण न लयः, किन्तु तद्विपर्ययेण । अत उत्पत्त्यनन्तरं प्रलयः । यतस्तथैवोपपद्यते । प्रवेशविपर्ययेण निर्गमनदर्शनात् । इदं च क्रमसृष्टौ बोध्यम् ॥ १४ ॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादि-
ति चेन्नाविशेषात् ॥ १५ ॥

ननु तैत्तिरीयकेऽन्नमयादयः पञ्च कोशा निरूपिताः । तत्रान्नमयप्राणमययोः सामग्री पृथिवीवायुरूपा पूर्वं निरूपिता । आनन्दमयः परमात्मैव । अतोऽन्तरा मध्ये विज्ञानमनसी उक्ते, ते क्रमेण प्रातिलोम्यक्रमेण उत्पन्ने वक्तव्ये । तयोरग्रे कथनात्मकाल्लिङ्गात् । अतस्तयोरुत्पत्तिर्वक्तव्येति चेन्न । अविशेषात् । नामरूपात्मकविशेषयुक्तानामेवोत्पत्तिरुच्यते । एतयोस्तु विशेषाभावान्नोत्पत्तिरुक्ता । विज्ञानमयस्य जीवत्वात् । अतो भूतभौतिकसृष्टौ प्रवेशाभावान्न तयोरुत्पत्तिर्वक्तव्येत्यर्थः ॥ १५ ॥

ननु विज्ञानमयस्य जीवस्योत्पत्त्यनङ्गीकारे जातो देवदत्त इत्यादिसकलव्यवहारोच्छेदप्रसक्तिरित्याशङ्क्याह ।

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्त-
स्तद्भावभावित्वात् ॥ १६ ॥

तुः पक्षव्यावर्तकः । चराचरे स्थावरजङ्गमे शरीरे तयोर्विशेषेणापाश्रय आश्रयः शरीरसम्बन्धः, स तु स्यात् । न तु स्वतो जीवस्योत्पत्तिरस्ति । ननु जीवस्यानुत्पत्तौ जातकर्माद्यनुपपत्तिरत आह । तद्व्यपदेश इति । शरीरजन्ममरणादिना जीवस्य तद्व्यपदेशो जन्ममरणादिव्यपदेशो भाक्तो लाक्षणिकः । तद्भावभावित्वात् शरीरान्वयव्यतिरेकेण जीवोपलब्ध्यनुपलब्धी । अतो लक्षणया देहधर्मो जीवे उच्यते । न तु मुख्या जीवस्योत्पत्तिः ॥ १६ ॥

ननु जीवस्याप्युत्पत्तिरस्तु, किमिति लाक्षणिकत्वं स्वीक्रियत इत्याशङ्क्याह ।

नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥

आत्मा नोत्पद्यते, कुतः ? अश्रुते. । नह्यात्मन उत्पत्तिः कुत्रचिदपि श्रूयते । देवदत्तो जात इति देहोत्पत्तिरेव, न तु जीवोत्पत्तिरुच्यते । विस्फुलिङ्गवदुच्चरणन्तु नोत्पत्तिः । नामरूपसम्बन्धाभावात् । किञ्च, ताभ्यः श्रुतिभ्यः, अयमात्माऽजरोऽमरः, न जायते म्रियते वेत्यादिभ्य आत्मनो नित्यत्वादपि नोत्पत्तिः ॥ १७ ॥

आत्मनो गुणान्निरूपयन् प्रथमतश्चैतन्यगुणमाह ।

ज्ञोऽत एव ॥ १८ ॥

अत एव, विज्ञानमय इत्यादिश्रुतिभ्य आत्मा ज्ञः चैतन्यरूपो ज्ञेयः ॥ १८ ॥

उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥

अत एवेत्यनुवर्तते । स यदाऽस्माच्छरीरादुत्क्रामति चन्द्रमसमेव ते सर्वे गच्छन्ति, तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण इत्यादिश्रुत्युक्तानामुत्क्रान्तिगत्यागतीनां जीवसम्बन्धिनीनां श्रवणात् यथायोग्यं तस्य परिमाणमङ्गीकर्तव्यम् । यद्यप्याराग्रमात्रो ह्यपरोऽपि दृष्ट इति श्रुतौ परिमाणमुक्तं । तथापि बहुवादिविप्रतिपत्तिनिरासाय युक्तिभिः साध्यते ॥ १९ ॥

स्वात्मना चोत्तरयोः ॥ २० ॥

ऊर्णनाभिर्यथा तन्तून् सृजते सञ्चरत्यपि, जाग्रत्स्वप्ने तथा जीवो

गच्छत्यागच्छते पुनरितिश्रुत्युक्तयोर्गत्यागत्योः स्वात्मना स्वरूपेणैव सम्भवात् तदनुरोधेनाणुत्वं तस्य स्वीकर्तव्यमित्यर्थः । उत्क्रमणे तु देहेन्द्रियादिभिः सम्बन्धोऽप्यस्ति । गतो निःसन्दिग्धत्वाय गत्यागतिकथनम् । अतो व्यापके गत्यागत्योरसम्भवान्मध्यमपरिमाणत्वेऽनित्यत्वप्रसक्तेरणुपरिमाणो जीव इत्यङ्गीकर्तव्यमित्यर्थः ॥ २० ॥

शङ्कते ।

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २१ ॥

ननु, स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेष्वित्यत्रातच्छ्रुतेरणुत्वविपरीतव्यापकत्वश्रुतेर्नाणुर्जीव इति चेन्न । इतराधिकाराद् इतरस्य परब्रह्मणोऽधिकारात् । अतो ब्रह्मनिरूपणमेवास्मिन् वाक्ये कृतं, न तु जीवस्वरूपनिरूपणमित्यर्थः ॥ २१ ॥

स्वशब्दोन्मानाभ्यां च ॥ २२ ॥

स्वयं विहत्य स्वयं निर्मायेत्यादिश्रुतौ स्वशब्दोऽणुपरिमाणं जीवस्य ज्ञापयति । स्वप्ने व्यापकस्य शरीरपरिमाणस्य वा विहरणासम्भवात् । बालाग्रशतभागस्य, आराग्रमात्रो ह्यपरोऽपि दृष्ट इत्यादौ चोन्मानम् । चकारेण स्वप्नप्रबोधयोः सन्ध्या वा गतिदर्शनम् । एतैर्हेतुभिर्जीवस्याणुत्वमेव सिद्ध्यतीत्यर्थः ॥ २२ ॥

ननु जीवस्याणुत्वे सकलशरीरव्यापि चैतन्यं न सम्भवतीत्याशङ्क्याह ।

अविरोधश्चन्दनवत् ॥ २३ ॥

चन्दनं यथैकदेशस्थितं सकलदेहसुखं करोति, अतिनष्टनैलस्थितं वा तापनिवृत्तिं करोति । तथा जीवोऽप्येकदेशस्थितः सकलदेहे चैतन्यं सम्पादयतीत्यर्थः ॥ २३ ॥

अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २४ ॥

ननु चन्दनेऽवस्थितिवैशेष्याद् अनुपहतत्वचि सम्यक्तयाऽवस्थानरूपात् त्वच एकत्वात् तत्र सकलशरीरे सुखमुपपद्यते, नत्वत्र तथा सम्भवतीति, चेन्न । जीवस्यापि स्थानविशेषाभ्युपगमात् । किं

तत् स्यानमित्यत आह । हृदि हि । जीवस्य हृदि स्थितिरुक्ता । द्वित्व-
त्वेन गुहां प्रविष्टाविति युक्तिः सूचिता ॥ २४ ॥

गुणाद्वा लोकवत् ॥ २५ ॥

यद्वा जीवस्य स्वरूपतोऽणुत्वेऽपि सकलशरीरव्यापिचैतन्य-
गुणाच्छरीरव्यापकत्वम् । लोकवत् । लोके यथा मणेरल्पत्वेऽपि त-
त्कान्तिर्बहुदेशं व्याप्नोति, तद्वत् ॥ २५ ॥

ननु गुणिनं विहाय गुणस्याधिकदेशेऽवस्थितिः क्वापि न दृष्टे-
त्याशङ्क्य दृष्टान्तमाह ।

व्यतिरेको गन्धवत् ॥ २६ ॥

यथा चम्पकादिपुष्पाणां गन्धस्तद्व्यवहितदेशेऽप्युपलभ्यते
तथा जीवस्य चैतन्यगुणोऽपीत्यर्थः । यथा वृक्षस्य सम्पुष्पितस्य दू-
राद् गन्धो वातीति वेदोक्त्याऽस्य दृष्टान्तत्वं युक्तम् ॥ २६ ॥

तथा च दर्शयति ॥ २७ ॥

जीवस्य हृदयस्थानत्वमणुपरिमाणं चोक्त्वाऽऽलोमभ्य आन-
खाग्रेभ्य इति तस्य चैतन्यगुणेन सकलशरीरव्यापित्वं दर्शयति ॥२७॥

ननु चैतन्यस्य जीवगुणत्वे किं प्रमाणमत आह ।

पृथगुपदेशात् ॥ २८ ॥

प्रज्ञया शरीरं समारुह्येति श्रुतौ प्रज्ञायाः करणत्वेन पृथगुपदे-
शाच्चैतन्यस्य गुणत्वम् ॥ २८ ॥

ननु तत्त्वमस्यादिवाक्यैः परं ब्रह्मैव जीव इति कथं तस्याणुत्वं
सम्भवतीत्याशङ्क्याह ।

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥२९॥

तुः पक्षव्यावर्तकः । तद्गुणसारत्वात् तस्य ब्रह्मणो गुणाः प्र-
ज्ञाद्दृष्टत्वादयस्त एव जीवे सारा जडवैलक्षण्यकारिण इति हेतोस्त-
द्व्यपदेशः, अमात्ये राजपदप्रयोगवज्जीवे भगवद्व्यपदेशो मैत्रेयीब्राह्म-
णादौ । ननु निरूपणस्थले उपचारासम्भवात् कथमन्यस्यान्यधर्मव-

त्वेन कथनं, तत्राह । प्राज्ञवत् । यथा, तद्वा अस्यैतदतिच्छन्दा अपहतपाप्मेत्यादिना प्राज्ञस्वरूपमुक्तम् । न हि सुषुप्तिसाक्षिणः प्राज्ञस्यैतादृशं स्वरूपं सम्भवति । अपहतपाप्मादीनां ब्रह्मलिङ्गत्वात् । अतो ब्रह्माभेदेनैतदुक्तमिति ज्ञेयम् । एवमेव ब्रह्माभेदविवक्षया शारीरस्य जीवस्यापि ब्रह्मधर्मनिरूपिका श्रुतयो ज्ञेया ॥ २९ ॥

ननु जीवस्यात्यन्तमपकृष्टस्य सर्वोत्कृष्टत्वेन व्यपदेशोऽत्यन्तप्रत्ययिततरे वेदेऽयुक्तः । न च ब्रह्मण आनन्दांशप्राकट्यात् तद्गुणसारत्वेन व्यपदेश इति वाच्यम् । तथा सति प्राज्ञे यथाऽऽनन्दांशस्तिरोहितो भवति तथाऽत्रापि स्यादतोऽयुक्तस्तद्व्यपदेश इत्याशङ्क्याह ।

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥३०॥

यावदयमात्माऽऽनन्दांशप्राकट्येन ब्रह्म भवति तावदस्य व्यपदेशः । पश्चात्तु ब्रह्मधर्माणामाविर्भावाद् ब्रह्मत्वं युक्तमेवेतिभावः । अतो न पूर्वोक्तदोषो, यतस्तदानीं ब्रह्मधर्माणां स्वास्मिन् दर्शनमस्ति । चकाराज्जीवस्याप्यानन्दांशः प्रकटित इति सूचितम् । यद्वा, अयं व्यपदेशो नात्यन्तमयुक्तस्य, किन्तु राजज्येष्ठपुत्रवद् ब्रह्मभावयोग्यस्य । तथा च न पूर्वोक्तो दोषः । तदुक्तं निबन्धे,

व्यापकत्वश्रुतिस्तस्य भगवत्त्वेन युज्यते ।
आनन्दांशाभिव्यक्तौ तु तत्र ब्रह्माण्डकोटयः ॥
प्रतीयेरन् परिच्छेदो व्यापकत्वं च तस्य तदिति ॥ ३० ॥

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥३१॥

जीवस्य संसारदशायामप्यानन्दांशस्य नात्यन्ताभावः । किन्तु पुंस्त्वादिवत् । यथा सेकादिसामर्थ्यलक्षणं पुंस्त्वं बाल्ये विद्यमानमेव यौवने प्रकटीभवति । तथाऽऽनन्दांशस्यापि संसारदशायां तिरोहितस्य ब्रह्मभावे सत्यभिव्यक्तियोग आविर्भाव इत्यर्थः ॥ ३१ ॥

ननु जीवस्य संसारावस्थायां सच्चित्प्राकट्यमेव । मोक्षे आनन्दांशस्यापि प्राकट्यमिति त्रयमेव वैरूप्यं कथं भिद्यत इत्याशङ्क्याह ।

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो

वाऽन्यथा ॥ ३२ ॥

यदि संसारावस्थायामपि जीवस्यानन्दांशः प्रकट इत्युच्येत, तथा सत्यानन्दांशस्य नित्यमुपलब्धिः स्यात्। तथाच संसारावस्थाया असम्भवः स्यात्। अथ जीवस्य सर्वदैवानन्दांशस्यानुपलब्धिः स्वीक्रियेत, तथा सति मोक्षदशा न स्यात्। अथान्यथानुपपत्याऽन्यतरनियमः स्वीक्रियेत, जीवो निरानन्द एव, ब्रह्म त्वानन्दमयमिति। तथाच, ब्रह्मैव सन् ब्रह्माप्येतीतिश्रुतिविरोधः प्राप्नोति। अतः पूर्वोक्त एव प्रकारोऽङ्गीकर्त्तव्य इति सिद्धम्॥ ३२ ॥

अतः परं साङ्ख्यानां मते कर्तृत्वं प्रकृतिगतमेवेति, तन्मतनिरासाय जीवगतकर्तृत्वव्यवस्थापनार्थमधिकरणान्तरमारभ्यते।

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥

कर्ता जीव एव। ज्योतिष्टोमादिविधायकशास्त्राणामर्थवत्त्वाच्च। अन्यथा ब्रह्मणः कर्मणामनुपयोगाज्जडस्याशक्यत्वात्कर्मविधयो व्यर्थाः स्युः॥ ३३ ॥

विहारोपदेशात् ॥ ३४ ॥

यद्यत्कामयते तत्तद्भवतीति श्रुत्या जीवस्यैव गान्धर्वादिलोकेषु विहार उपदिष्टः। तथाच साधुकारी साधुर्भवतीति श्रुतौ कर्तृत्वभोक्तृत्वयोः सामानाधिकरण्याज्जीव एव कर्ता सिद्ध्यति॥ ३४ ॥

नन्विन्द्रियैः कर्मकरणदर्शनात्तेषामेव कर्तृत्वमस्त्वित्याशङ्क्याह।

उपादानात् ॥ ३५ ॥

तदेषां प्राणानां विज्ञानेन विज्ञानमादायेतिश्रुत्युक्तार्ज्जीवेन सर्वप्राणानां विज्ञानोपादानाज्जीव एव कर्ता। इन्द्रियाणां तु करणत्वमेव। अतः स्वातन्त्र्याज्जीव एव कर्ता॥ ३५ ॥

व्यपदेशाच्च क्रियायां नचेन्निर्देशविपर्ययः ॥ ३६ ॥

विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि चेतिश्रुतौ यागादिक्रियायां विज्ञानात्मकजीवस्यैव कर्तृत्वेन व्यपदेशात् तस्यैव कर्तृत्वमि-

त्यर्थः । माद्धयगते तु कर्माणि बुद्ध्यादीनामेव कर्तृत्वं, भोगे तु जीव-स्य । माद्धयगताग्रहेणा पूर्वोक्तव्यपदेशाङ्गीकारो नचेत्तर्हि, विज्ञानं यज्ञं तनुत इति श्रुतौ, विज्ञानेन विज्ञानमादायेतिश्रुतिवन्निर्देशस्य वि-पर्यय स्यात् । विज्ञानेन यज्ञं तनुत इति निर्देशः स्यादित्यर्थः ॥ ३६ ॥

ननु जीवस्य कर्तृत्वं चेत्तर्हि स्वस्य हिताकरणादिदोषप्रसङ्ग इत्याशङ्क्याह ।

उपलब्धिवदनियमः ॥ ३७ ॥

चक्षुषा यथेष्टमनिष्टं चोपलभते तथेन्द्रियैः कर्म कुर्वञ्जीव इष्ट-मनिष्टं वा प्राप्नोतीति न हिताकरणनियम इत्यर्थः ॥ ३७ ॥

नन्वेवमपि जीवस्य क्रियायां स्वातन्त्र्यलक्षणं कर्तृत्वं चेत् स्व-स्याहितं न कुर्यादित्याशङ्क्याह ।

शक्तिविपर्ययात् ॥ ३८ ॥

जीवस्य शक्तेर्विपर्ययात् तथा सामर्थ्याभावान्न हितकरणनियम इत्यर्थः ॥ ३८ ॥

शक्तिविपर्यये हेतुमाह ।

समाध्यभावाच्च ॥ ३९ ॥

जीवस्य क्रियाज्ञानशक्ती योगेन भवतः । समाधेरभावाच्छ-क्त्यभावः । चकारान्मन्त्रसामर्थ्याभावोऽपि सूचितः ॥ ३९ ॥

ननु कर्मकर्तृणां पाचकादीनां कर्तृत्वभोक्तृत्वयोर्भेदो दृश्यते तथात्रापि भविष्यतीत्यत आह ।

यथा च तक्षोभयथा ॥ ४० ॥

यथा तक्षा स्वयं रथं निर्माय तमारुह्य विहरति । परार्थनि-र्माणे स्वयं तेन न विहरति च । तथा जीवोऽपि स्वार्थं परार्थं च करोति कारयति चेत्यर्थः । नच कर्तृत्वस्य दुःखरूपत्वाज्जीवे तन्ना-ङ्गीक्रियत इति वाच्यम् । पचःपानादिकर्तृत्वस्य सुखरूपस्य दृ-ष्टत्वात् ॥ ४० ॥

तत्कर्तृत्वं जीवधर्मो वा, ब्रह्मधर्मो वेति सन्देहे निर्णयमाह ।

परात्तु तच्छ्रुतेः ॥ ४१ ॥

कर्तृत्वं ब्रह्मधर्म एव। परादू ब्रह्मण एव तत्कर्तृत्वं जीवे समायाति। तस्य ब्रह्मांशत्वादैश्वर्यादिवत्। कुतः? तच्छ्रुतेः। यमधोनिनीषति, सर्वकर्ता सर्वभोक्ता सर्वनियन्तेति तस्यैव कर्तृत्वश्रुतेः। ब्रह्मणः सर्वरूपत्वान्न कश्चिद्दोषः शङ्क्यः॥ ४१ ॥

ननु ब्रह्मणः सर्वकर्तृत्वे वैषम्यं नैर्घृण्यं च स्याज्जीवानां दुःखदातृत्वात्तदनुकूलकर्मकारणाच्चेत्याशङ्क्याह।

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥४२॥

पूर्वपक्षव्यावर्तकस्तुशब्दः। भगवान् फलदाने जीवकृतप्रयत्नापेक्षः। अतो जीवस्य यादृशप्रयत्नाभिनिवेशं पश्यति तादृशं कर्म कारयतीति न भगवति दोषः। अन्यथा विहितप्रतिषिद्धयोर्वैयर्थ्यं स्याद॥ ४२ ॥

अधुना जीवस्य ब्रह्मसम्बन्धिरूपमाह।

अंशो नानाव्यपदेशादन्यथाचापि दाशकितवा-दित्वमधीयत एके ॥ ४३ ॥

जीवो ब्रह्मणोऽश एव। सर्व एवात्मानो व्युच्चरन्ति कपूयचरणा रमणीयचरणा इत्यादिनानाव्यपदेशात्। ननु ब्रह्मणो निरवयवत्वाज्जीवस्यांशत्वं न सम्भवतीति चेन्न। ब्रह्मणः स्वरूपे न लोकसिद्धं, किन्तु श्रुतिसिद्धमेव तत्। तथाच यथा श्रुतिर्वदति तत्स्वरूपं तथैवेति मन्तव्यं, नतु कुकल्पनाभि' प्रत्यवस्थातव्यम्। ननु जीवस्य ब्रह्मांशत्वे तत्सजातीयत्वमायाति। ब्रह्मदाशा ब्रह्मेमे कितवा उतेतिश्रुत्यन्तरे त्वेकविज्ञानेन सर्वविज्ञानप्रतिज्ञानाद्दाशादीनां ब्रह्मत्वं प्रतीयते। तत्कार्यत्व एव समञ्जसं स्यादिति चेन्न। अन्यथा प्रकारान्तरेणापि शरीरत्वेन च प्रकारेणैके शाखिनो दाशकितवादित्वमधीयते। तथाचानन्दांशस्य तिरोहितत्वान्न जीवस्य ब्रह्मसाजात्यम्। चिद्रूपेण तु साजात्याङ्गीकारे इष्टापत्तिरिति भावः॥ ४३ ॥

मन्त्रवर्णात् ॥ ४४ ॥

पुरुष एवेद॰ सर्वमित्युपक्रम्य, पादोऽस्य विश्वाभूतानीत्यनेन भूतानां जीवानां पादत्वं, पादेषु स्थितत्वेन वांशत्वमुक्तमिति तदेव जीवस्य स्वरूपमित्यर्थः ॥ ४४ ॥

अपि स्मर्यते ॥ ४५ ॥

ममैवांशो जीवलोके जीवभूतः सनातन इति जीवस्यांशत्वं स्मर्यतेऽपीत्यर्थः ॥ ४५ ॥

ननु जीवस्य ब्रह्मांशत्वे तद्दुःखेन ब्रह्मणोऽपिदुःखित्वं स्याद्, हस्तादिवेदनया शरीरस्येवेत्याशङ्क्याह ।

प्रकाशादिवन्नैवं परः ॥ ४६ ॥

परो भगवान् एवं जीवदुःखेन दुःखी न । प्रकाशादिवत् । नाग्नेर्हि तापो न हिमस्य तत्स्यादिति न्यायेन यथा प्रकाशादिरूपाणामग्न्यादीनामन्यस्य तापकत्वेऽपि स्वस्य न तापादि । तथा द्वैतबुद्ध्यांशस्य दुःखित्वेऽपि परस्य भगवतो दुःखित्वं नेत्यर्थः । यद्वा, यथा प्रकाशादिकं प्रकाश्यदोषेण न दुष्यति तथा ब्रह्माप्यंशदोषेण न दुष्यतीत्यर्थः ॥ ४६ ॥

स्मरन्ति च ॥ ४७ ॥

तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः, न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा, कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैः स युज्यते, एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्य इत्यादिना सर्वेऽप्यृषयोंऽशिनो दुःखासम्बन्धमंशस्य च दुःखसम्बन्धं स्मरन्ति । चकारेण, तयोरन्यः पिप्पलं स्वाद्वत्तीतिश्रुतिः परिगृहीता ॥ ४७ ॥

ननु जीवस्य भगवदंशत्वेन विधिविषयत्वाभावात् कर्मसम्बन्धोऽनुपपन्नः । किञ्चैकस्यैव जीवस्यानेकदेहसम्बन्धादयं शूद्रोऽयं पतिरियं स्त्रीति ज्ञानमशक्यम् । अतः कर्ममार्गीयनियमस्यासम्भवाज्जीवस्यापि दुःखित्वं न सम्भवतीत्याशङ्क्याह ।

अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॥ ४८ ॥

अनुज्ञापरिहारौ विधिनिषेधौ जीवस्य देहसम्बन्धात् । यदा यो देहो गृहीतस्तत्सम्बन्धात् । ज्योतिरादिवत् । यथा शवाग्निश्च-ण्डालभाण्डस्थितं जलं तद्गृहादिकं च परिह्रियते । उत्कृष्टं ज्योति-रादिकं च गृह्यते । एवं जीवोऽप्युत्कृष्टापकृष्टशरीरसम्बन्धाद्विधिनि-षेधौ भजत इति नोक्तदोषः ॥ ४८ ॥

ननु शरीरस्यापि बाल्यकौमाराद्यवस्थाभेदेन भेदात् कर्मकाले ब्राह्मणत्वादि कथम् । उपनयनकालीनशरीरस्य तदानीमभावात् । नच जीवैक्यादिदमुपपन्नमिति वाच्यम् । देहान्तरेऽपि तस्यैव जीव-स्य सत्त्वाच्चण्डालदेहेऽपि ब्राह्मणत्वं स्यादित्याशङ्क्याह ।

असन्ततेश्चाव्यतिकरः ॥ ४९ ॥

बाल्यादिषु शरीराणां भेदेऽपि सन्ततेरैक्यादेकत्वं विवक्षित-म् । जन्मान्तरे तु सन्ततेर्भेदान्न पूर्वोक्तो व्यतिकरः । अतो न कर्म-णां साङ्कर्यमिति भावः ॥ ४९ ॥

ननु ब्रह्मणः सच्चिदानन्दमयत्वात्तदंशो जीवोऽपि तथा भवि-तुमर्हतीति कथं तस्य संसारित्वमत आह ।

आभास एव च ॥ ५० ॥

आनन्दांशतिरोधानाज्जीवो ब्रह्माभास इत्युच्यते । तत्त्वाभा-सोक्त्या तस्य मिथ्यात्वं बोध्यम् । व्यापकस्य सर्वत्र विद्यमानस्य च ब्रह्मणः प्रतिबिम्बासम्भवात् । अतोऽस्य संसारित्वमुपपन्नमिति भावः ॥ ५० ॥

ब्रह्मणो नियामकत्वप्रतिपादनाय नैयायिकाद्यभिमतं जीवरूपं निराकरोति ।

अदृष्टानियमात् ॥ ५१ ॥

नैयायिकादिभिर्हि, नानात्मानो व्यवस्थात इत्युक्त्वा भोगव्य-वस्थासिद्ध्यर्थं जीवनानात्वं स्वीकृतम्, अदृष्टस्य भोगनियामकत्वं च । स्वभोग्यवस्तूनां देशान्तरे उत्पत्त्यन्यथानुपपत्त्या जीवस्य व्याप-कत्वं चाङ्गीकृतम् । इदं सर्वथानुपपन्नम् । सर्वेषामेव व्यापकानां जीवानामनेकदेहसम्बन्धस्य सत्त्वादेतज्जीवस्येदमदृष्टमेतस्य नेति

नियमो न स्यात् । अतोऽदृष्टस्यानियमान्न तार्किकाद्यभिमतं जीवस्वरूपं युक्तमित्यर्थः ॥ ५१ ॥

ननु मनःप्रभृतीनां करणानां नियामकत्वेनाङ्गीकारात्तेषां चेश्वरेच्छया नियतत्वाद्र यदीयं यत्र मनस्तच्छरीरावच्छेदेन तदीयमदृष्टं तत्रोत्पद्यत इतिनियमान्नोक्तदोष इत्याशङ्क्याह ।

अभिसन्ध्यादिष्वपि चैवम् ॥ ५२ ॥

अभिसन्ध्यादिषु ईश्वरेच्छामनःप्रभृतिषु नियामकत्वेनाङ्गीक्रियमाणेष्वप्येवं पूर्वोक्तदोषप्रसक्तिः । आत्मनां व्यापकत्वेन सर्वत्र सम्बन्धसम्भवादस्येदं मनोऽस्य नेतिनियमाभावादित्यर्थः । तदभिमतेश्वरनिराकरणं च, पत्युरसामञ्जस्यादिति सूत्रेण पूर्वं कृतमेव । अतो नेश्वरेच्छयापि नियमसिद्धिः ॥ ५२ ॥

नन्वात्मनो विभुत्वेऽपि तस्मिंस्तादृशः प्रदेशविशेषोऽस्ति येनाऽदृष्टनियमादिकं सम्भविष्यतीतिकल्पने नोक्तदोषापत्तिरित्याशङ्क्य परिहरति ।

प्रदेशादिति चेन्नान्तर्भावात् ॥ ५३ ॥

अन्यस्यात्मनोऽपि प्रदेशस्य तत्रान्तर्भावान्न प्रदेशकल्पनेनापि दोषपरिहारः सम्भवति । यद्वा तद्देहस्यैव देशान्तरगमने पूर्वदेशस्य त्यक्तत्वात् स प्रदेशोऽन्तर्भवेत्तिरोभवेदित्यर्थः । अतो नेदं मतं समीचीनमिति भावः ॥ ५३ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां द्वितीयाध्यायस्य तृतीयः पादः ॥ २ ॥ ३ ॥

द्वितीयाध्यायस्य चतुर्थः पादः ।

पूर्वपादे जीवस्वरूपं विचार्य तच्छरीरवर्तिनां प्राणादीनां विचारार्थमग्रिमप्रकरण आरभ्यते ।

तथा प्राणः ॥ १ ॥

प्राणा इन्द्रियाणि । यथा जीव उत्क्रान्त्यादिधर्मवांस्तथा तेऽपि बोध्याः । इन्द्रियाणां प्रियत्वसूचनाय प्राणशब्द उक्तः । मनसो मुख्यत्वात्तदभिप्रायेण प्राण इत्येकवचनम् । जीवे आनन्दमात्रांशस्य तिरोभावो, जडेषु प्राणेन्द्रियेषु चिदंशस्यापि तिरोभावात् पृथक्तया तन्निरूपणं कृतम् । नच जीव इव प्राणेषु ब्रह्मव्यपदेशाभावान्न तेषु जीवधर्मातिदेशो युक्त इति शङ्क्यम् । ये प्राणं ब्रह्मोपासत इति श्रुतौ तत्रापि तद्व्यपदेशस्य सत्त्वात् ॥ १ ॥

नन्विन्द्रियाणामुत्क्रान्तिश्रुतिर्गौणी भविष्यतीत्याशङ्क्याह ।

गौण्यसम्भवात् ॥ २ ॥

इन्द्रियाणामुत्क्रमणश्रुतिर्गौणी न सम्भवति । एकस्या एव श्रुतेर्जीवे मुख्यत्वस्येन्द्रियेषु गौणत्वस्य चासम्भवात् ॥ २ ॥

तत्प्राक् श्रुतेश्च ॥ ३ ॥

सृष्टेः प्राक् पूर्वमपि प्राणादीनां स्थितिश्रुतेरपि तेषां नित्यत्वमित्यर्थः । श्रुतिश्च, असद्वा इदमग्र आसीत्, तदाहुरित्युपक्रम्य, प्राणा वा ऋषय इत्यादिका ज्ञेया । प्राणानां जडत्वेन जीवविचारापेक्षयाऽऽधिक्येनात्र विचारः क्रियते । न च प्राणानां पूर्वं सत्त्वे सदेव सौम्येदमग्र आसीदितिश्रुतिविरोधः स्यादिति वाच्यम् । असद्वा इदमग्र इति श्रुतौ प्राणानामुत्पत्तिरेव निषिध्यते, जीवस्येवोद्गमस्तु न निषिध्यते । अत उद्गमात् पूर्वावस्थानिरूपिका, सदेव सौम्येति श्रुतिरिति न विरोधावकाशः । चकारान्मोक्षे सम्पत्तिश्रुतिः परिगृहीता ॥३॥

तत्पूर्वकत्वाद् वाचः ॥ ४ ॥

मनः पूर्वरूपं वागुत्तररूपमितिश्रुतेर्वाचो मनःपूर्वकत्वाद् वेदात्मकवाचो यत्र नित्यत्वं तत्र तत्पूर्वरूपमनसो नित्यत्वं सुतरामेवेत्यर्थः ॥ ४ ॥

सप्तगतेर्विशेषितत्वाच्च ॥ ५ ॥

तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीति श्रुतौ सप्तानां चक्षुरादीनां गतिश्रवणाद् एकीभावश्रुतौ च सप्तानां गतिभिर्जीवगतेर्विशेषितत्वाज्जीवगत्या सप्तानां गतीनां विशेषितत्वाच्च तेषां जीवतुल्यत्वमित्यर्थः । चकारेण तत्तदुपाख्यानेषु चक्षुरादीन्द्रियाणां देवतात्वं संवादश्च परस्परमुक्तः स संगृहीतः । अतः सर्वथा जीवतुल्यत्वमेतेषु ज्ञेयम् ॥ ५ ॥

केचित्त्विदं सूत्रमग्रिमसूत्रपूर्वपक्षनिरूपकं व्याचख्युः । तथाहि । ते प्राणाः किं त इत्यपेक्षायां सप्त प्राणाः प्रभवन्तीति, अष्टौ ग्रहा अष्टावतिग्रहा इति सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चाविति नव वै पुरुषे प्राणा नाभिर्दशमीति दश वै पशोः प्राणा आत्मैकादश इत्यादिश्रुतिष्वनेकविधसंख्यानां प्रतीतेः किं युक्तमितिसंशये सप्त प्राणा इत्यर्थः । कुतः? गतेः, सप्त इमे लोका इतिश्रुतौ सप्तानामेव गतिश्रवणाज्जीवस्योत्क्रमणसमये सप्तानामेव विशेषितत्वाच्च । अन्ये भेदास्त्वेतेषामेव वृत्तय इति प्राप्ते, उच्यते ।

हस्तादयस्तु स्थितेऽतो नैवम् ॥ ६ ॥

पूर्वसूत्रस्य प्रथमोक्तरीत्या व्याख्याने तु पूर्वपक्ष उत्सूत्रं ज्ञेयः । तुः पूर्वपक्षव्यावर्तकः । हस्तौ चादातव्यं च, उपस्थश्चानन्दयितव्यं च, पायुश्च विसर्जयितव्यं च, पादौ च गन्तव्यं चेति श्रुतौ हस्तादयश्चत्वार इन्द्रियत्वेन गणिताः । एवं च हस्तादीनां चक्षुरादितौल्ये स्थिते सति, अतो हेतोर्नैवं, सप्तैवेति न, किन्त्वेकादशैवेन्द्रियाणीति सिद्धम् ॥६॥

अणवश्च ॥ ७ ॥

सर्वे प्राणा अणुप्रमाणा ज्ञेयाः । गतिमत्त्वे सति नित्यत्वस्याऽणुत्वं विनाऽसिद्धेः ॥ ७ ॥

श्रेष्ठश्च ॥ ८ ॥

श्रेष्ठो मुख्यप्राणः, सोऽपि नित्यगतिशीलोऽणुपरिमाणश्च ज्ञेयः ॥ ८ ॥

ननु यः प्राणः स वायुः, एष वायुः पञ्चविधः प्राणोऽपानो व्यान उदानः समान इति श्रुतेः, सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्चेति साङ्ख्यांकेश्च मुख्यप्राणो वायुरिन्द्रियाणां क्रिया वास्त्वित्याशङ्क्याह ।

न वायुक्रिये पृथगुपदेशात् ॥ ९ ॥

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति श्रुतौ प्राणवाय्वोः पृथगुपदेशान्मुख्यः प्राणो, वायुः क्रिया वा न भवतीत्यर्थः ॥९॥

अथ मुख्यः प्राणः स्वाधीनः पराधीनो वेति संशये, हुतेषु वागादिषु प्राण एको मृत्युनाऽनाप्तः प्राणः संवर्ग इत्यादिश्रुत्या प्राणः स्वतन्त्र इति प्राप्ते, उच्यते ।

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ १० ॥

तुः पूर्वोक्तशङ्कानिरासार्थः । चक्षुरादिवत् प्राणोऽप्यस्वतन्त्रः मुख्यतया भगवदधीनः । व्यवहारे तु जीवाधीनः । कुतः ? चक्षुरादिभिः सह शासनात् । अतः प्राणः पराधीनो, न स्वतन्त्रः ॥ १० ॥

ननु प्राणस्य जीवकरणत्वे व्यापारोऽपेक्षितः । तत्र वृत्तयस्त्वेकादशैव । एकादशामी मनसो हि वृत्तय इति वाक्यात् । अतोऽस्य व्यापारान्तरमपेक्षितमित्याशङ्क्याह ।

अकरणत्वाच्च न दोषस्तथाहि दर्शयति ॥ ११ ॥

प्राणस्याकरणत्वान्न पूर्वोक्तो दोषः शङ्क्यः, करणस्यैव व्यापारवत्त्वनियमात् । अन्यस्योपकारकस्य तु कार्यमात्रमपेक्षितम् । तथाहि श्रुतिरेव शरीरस्थितिलक्षणं कार्यं प्राणस्य दर्शयति, तस्मिन्नुत्क्रामत्यथेतर इत्यादिना । अतो व्यापाराभावेऽपि स्वरूपस्थितिमात्रेण तस्योपकारित्वं सिद्धम् ॥ ११ ॥

ननु व्यापारं विनोपकारित्वं न सम्भवतीत्याशङ्क्याह ।

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ १२ ॥

अहमेवैतत्पञ्चधात्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामीति श्रुतौ प्राणस्य पञ्चवृत्तिश्रवणान्मनोवच्चायं व्यपदिश्यते । यथा मनसः स्वरूपत एव द्वारभेदेनैकादश वृत्तय एवमेव प्राणस्यापि पञ्चधात्मानं विभज्य कार्यकरणं व्यपदिश्यते । अतो न पूर्वोक्तो दोषः ॥१२॥

अणुश्च ॥ १३ ॥

आसन्यप्राणोऽणुः । प्राणानामुक्तमप्यणुत्वं पञ्चधात्मानं विभज्येतिवचनान्मुख्यप्राणे सन्दिग्धमतः पुनरुच्यते । चकारात्पूर्वोक्तधर्माणां समुच्चयः ॥ १३ ॥

अथ वागादीन्द्रियाणां देवताधिष्ठानयुक्तानां वदनादिकार्ये प्रवृत्तिरुत जीवाधिष्ठानभगवत्प्रेरणयोः सत्त्वात् स्वत एवेति संशये विशेषकार्यान्तरस्यादर्शनान्न देवतान्तरापेक्षेति प्राप्ते, उच्यते ।

ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ १४ ॥

तुः पक्षव्यावर्तकः । वागादीन्द्रियाणां ज्योतिरादि अग्न्यादिकमधिष्ठानमङ्गीकर्तव्यम । अग्निर्वाग्भूत्वा मुखं प्राविशदिति श्रुतौ तदामननात् कथनादित्यर्थः ॥ १४ ॥

अथ यदग्न्यादीनां वागाद्यधिष्ठातृत्वमुक्तं तत्स्वत एवोतान्यसहितानां वेति संशये केवलाग्न्याद्यधिष्ठानेनैव कार्यसिद्धेस्तस्यापि नियामकान्तरकल्पनेऽनवस्थाप्रसक्तेस्तेषां स्वतोऽकिञ्चित्करत्वे देवतात्वव्याघाताच्च स्वत एव नियामकत्वमिति प्राप्ते, उच्यते ।

प्राणवता शब्दात् ॥ १५ ॥

वागादिकं प्राणवता अग्न्यादिनाऽधिष्ठितमङ्गीकर्तव्यम् । सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यत इत्यादिशब्दात् । अत्र परेणापहतपाप्मना प्राणेन युक्तोऽग्निर्दीप्यत इत्युक्त्या दीप्यमानस्यैवाधिष्ठातृत्वात् प्राणसहितस्याग्नेरधिष्ठातृत्वमुक्तं, नतु केवलस्येत्यर्थः ॥१५॥

ननु प्राणसहितस्याधिष्ठातृत्वे सर्वदाऽधिष्ठातृत्वं न स्यादत आह ।

तस्य च नित्यत्वात् ॥ १६ ॥

अग्न्यादीनां प्राणसम्बन्धस्य नित्यत्वात् सर्वदैवाधिष्ठातृत्व-

मित्यर्थः । चकारात् प्राणस्यापि नित्यत्वं पूर्वमुक्तं सूचितम् ॥ १६ ॥

अथेन्द्रियाणां प्राणाधीनव्यापारत्वात् प्राणशब्दवाच्यत्वाच्च प्राणस्यैव वृत्तिरूपाणीन्द्रियाणि तत्त्वान्तराणि वेति संशये लाघवात् प्राणवृत्तिरूपाण्येवेति प्राप्ते, उच्यते ।

तदिन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥

तानीन्द्रियाणि तत्त्वान्तराण्येव । कुतः ? तद्व्यपदेशात् । एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेतीन्द्रियशब्देन व्यपदेशात् । अतः क्वचित् प्राणशब्दवाच्यत्वेऽपि तेषां नैकत्वम् । ननु तर्हि भेदव्यपदेशादासन्योऽपि तत्त्वान्तरं स्यादत आह । अन्यत्रेति । श्रेष्ठान्मुख्यप्राणादन्यत्र भेदः । मुख्यप्राणे तु तत्त्वान्तरत्वं नास्तीत्यर्थः ॥ १७ ॥

भेदश्रुतेः ॥ १८ ॥

यत्रापीन्द्रियेषु प्राणशब्दः प्रयुक्तः, तमुत्क्रामन्तं प्राणोऽनूत्क्रामति, प्राणमनूत्क्रमन्तं सर्वे प्राणा अनूत्क्रामन्तीत्यादौ तत्रापि भेदेन श्रुतेर्नैकत्वमित्यर्थः ॥ १८ ॥

वैलक्षण्याच्च ॥ १९ ॥

प्राणस्येन्द्रियाणां च वैलक्षण्यादपि नैकत्वम् । वागादिषु सुप्तेषु प्राणस्य जागरणं सर्वेन्द्रियाणां स्वामित्वं चेत्याद्यनेकविधं वैलक्षण्यं ज्ञेयम् ॥ १९ ॥

इदानीं भूतभौतिकानां सृष्टिः परब्रह्मण एवेति निर्णीय नामरूपव्याकरणमपि तत एवेति निर्णयार्थमधिकरणान्तरमारभ्यते । तत्र घटादिपदार्थानां नामरूपनिर्माणं जीवादेवोत ब्रह्मण इति संशये लोके घटादिपदार्थानां नामरूपनिर्माणस्य कुलालादिभ्यो दर्शनाल्लौकिकेऽपि स्थावरजङ्गमे मयूरादिसंज्ञा मूर्तिश्च हिरण्यगर्भात्मकजीवादेव भविष्यतीति प्राप्ते, उच्यते ।

संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ २० ॥

पूर्वपक्षव्यावर्तकस्तुशब्दः । पदार्थानां संज्ञामूर्त्योः क्लृप्तिर्नामरूपयोर्निर्माणं, तत् त्रिवृत्कुर्वत एव, यस्त्रिवृत् करोति तस्मादेव ।

कुतः ? उपदेशात् । सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकं करवाणीति श्रुतौ नामरूपव्याकरणत्रिवृत्करणयोः समानकर्तृकत्वेनोपदेशात्, त्रिवृत्कर्ता तु परमेश्वर एव । जीवस्य देहसम्बन्धानन्तरमेव कर्तृत्वात् त्रिवृत्करणेऽसामर्थ्यात् । अतो नामरूपव्याकरणमपि तत्कर्तृकमेवेति सिद्धम् ॥ २० ॥

अथान्नमशितं त्रेधा विधीयत इत्यादिश्रुतेर्वाक्प्राणमनांसि भौतिकानि, उत, एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति श्रुतेः स्वतन्त्राणीति संशये, पूर्वपक्षमाह ।

मांसादि भौमं यथाशब्दमितरयोश्च ॥ २१ ॥

पुरीषमांसादिकं भौमं तेजोऽबन्नप्रकृतिकं ज्ञेयम् । तत्र हेतुः यथाशब्दम् । अन्नमशितमित्यादिश्रुत्या निःसन्दिग्धं प्रतिपादनात् । ततः किमत आह । इतरयोश्च । इतरयोर्मनःप्राणयोरपि यथाशब्दं भौतिकत्वं ज्ञेयम् । एतस्माज्जायते प्राण इत्युद्गमश्रुतिस्तु तेषां स्तुतिपरा । पूर्वोक्तोपपादकश्रुतिबाधात् । अतो भौतिकान्येव मन आदीनीत्येवं प्राप्ते ॥ २१ ॥

उच्यते ।

वैशेष्यात्तु तद्वादस्तद्वादः ॥ २२ ॥

मनआदि अन्नादिभिर्विशेष्यते कार्यक्षमं क्रियत इति । अतो वैशेष्यादेव हेतोर्मनः प्रभृतिष्वन्नमयत्वादिवादः । ननु कथं ज्ञायते, वैशेष्याद् गौणोऽयं वाद इति । अत्रोच्यते । अथात्मनोऽन्नाद्यमागायदिति श्रुतौ प्राणः सर्वस्यान्नस्यात्ता निर्दिष्टः । स कथं तत्परिणामकार्यमिति वक्तुं युक्तम् । सृष्टौ प्रथमतो निर्दिष्टा वागादयोऽपि तत्राऽन्नभोगार्थमनुप्रविष्टाः । अतो मन प्रभृतीनां न भौतिकत्वं, किन्तु तत्त्वान्तरायत्तैवाभीति सिद्धम् । तद्वादपदवीप्साऽध्यायसमाप्तिबोधनार्था ॥ २२ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां द्वितीयाध्यायस्य चतुर्थः पादः । समाप्तश्चाय द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयाध्यायस्य प्रथमः पादः।

तृतीयेऽध्याये साधनानां विचार्यमाणत्वात् साधनेष्वन्तरङ्गत्वात् प्रथममधिकारिणः पञ्चाग्निप्रक्रमेण जन्म विचार्यते। तत्र ब्रह्मज्ञानौपयिकशरीरान्तरनिष्पत्तयेऽस्माच्छरीरात् केवल एव जीवो निर्गच्छति, संस्कृतभूतसहितो वेति संशयः। तत्रालौकिकेऽर्थे श्रुत्यनुसरणस्योचितत्वात्, तत्र ते देवाः श्रद्धां जुह्वतीति वाक्ये श्रद्धारूपायामेव होमश्रवणात् केवल एव गच्छतीति प्राप्ते, उच्यते।

तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्॥ १॥

तस्य ब्रह्मज्ञानलक्षणस्य फलस्य अन्तरे या प्रतिपत्तिस्तस्यां साधनीयायां, ब्रह्मज्ञानौपयिकजन्मार्थमिति यावत्, संस्कृतैर्भूतैः सम्परिष्वक्तः सहितो रंहति गच्छति। कुतः? प्रश्ननिरूपणाभ्याम्। वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति प्रश्नः। असौ वाव लोक इति निरूपणम्। प्रश्नेऽपां पुरुषत्वेन कथनाद् उत्तरे चाहुतिफलत्वेन कथनात् तेषां च पाञ्चभौतिकत्वादागन्तुकभूतानां फलत्वासम्भवात् संस्कृतभूतसहितो गच्छतीति सिद्धम्॥१॥

ननु संस्कृतपञ्चभूतैः सह गमने प्रश्नोत्तरयोरपामेव ग्रहणं कुत इत्याशङ्क्याह।

त्र्यात्मकत्वात्तु भूयस्त्वात्॥ २॥

तुशब्दोऽद्भिरेव सहित इतिशङ्काऽपाकरणार्थः। अपां ग्रहणम्॥ २॥

लौकिकयुक्त्याऽप्यपामेव ग्रहणं युक्तमित्याह।

प्राणगतेश्च॥ ३॥

तमुत्क्रामन्तमिति श्रुत्या प्राणस्य गतेरुक्तत्वाद्, आपोमयाः प्राणा इत्यपां प्राणपोषकत्वश्रवणाद् प्राणो गच्छन् स्वाप्यायकं गृहीत्वा गच्छतीति युक्तमपां ग्रहणम्॥ ३॥

ननु प्राणस्य जीवसङ्गे गमनं नोपपद्यते, यत्रास्य पुरुषस्येति श्रुत्या वाक्प्राणादीनामग्निवायुभावश्रवणादित्याशङ्क्य समाधत्ते ।

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥

अग्निवायुभावबोधकश्रुतेर्मुक्तविषयत्वाद् उत्क्रमणश्रुतेरमुक्तविषयत्वेन भाक्तत्वाद् गौणत्वादित्यर्थः । अतोऽग्न्यादिभावबोधकश्रुत्योत्क्रमणश्रुतेरबाध इति ॥ ४ ॥

ननु देवाः श्रद्धां जुह्वतीति प्रथमाहुतिबोधकश्रुतावपामश्रवणात् कथं ताभिः परिष्वक्तो गच्छतीत्याशङ्क्य परिहरति ।

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥

ता एव आपः श्रद्धाशब्देनोच्यन्ते । हि युक्तम् । श्रद्धा वा आप इति श्रुतेः । किमुपचारेण ? नेत्याह । उपपत्तेः । उपक्रमोपसंहारयोरपां श्रवणान्मध्ये श्रुतः श्रद्धाशब्दोऽपि तत्परत्व एवोपपद्यते । निष्कामकर्तुः संस्कारार्थं भूतानामेव श्रद्धाविषयत्वाच्छ्रद्धापदप्रयोगः । तस्माद् भूतैः सम्परिष्वक्तो रंहतीति सिद्धम् ॥ ५ ॥

अथ सर्वे जीवाः सम्परिष्वक्ता रंहन्त्युत ज्ञानाधिकारिण एवेति विचार्यते । तत्र पञ्चाहुतिनिरूपणे नाधिकारिणः श्रुताः । अतो विशेषाश्रवणात् सर्वेषामेव पञ्चाहुतिप्रकारेण जन्मेत्याशङ्क्य परिहरति ।

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥

न । इष्टादिकारिणो हि धूमादिमार्गेण गच्छन्तः प्रथमं सोमभावं प्राप्नुवन्तीत्युक्तम् । सोऽत्रापि प्रथमं सोमभाव उच्यते । अतः श्रुतिसाम्यादपीष्टादिकारिणः सम्परिष्वक्ता गच्छन्तीति सिद्धम् ॥६॥

ननु तं देवा भक्षयन्तीति श्रुतौ तेषां सोमभावे भक्षणोक्तेः पञ्चाहुत्यभाव इत्युत्सूत्रमाशङ्क्य परिहरति ।

भाक्तं वाऽनात्मवित्त्वात् तथाहि दर्शयति ॥ ७ ॥

वाशब्देन शङ्का निराक्रियते । तेषां भक्षणं भाक्तं गौणम् । कुतः ? अनात्मवित्त्वात् । भक्ष्यभावे सति मुख्यं भक्षणं भवेत् । स तु

सर्वभवनश्रुतेरात्मविद् एव सम्भवति, नत्वन्यस्य । तथाहि श्रुतिरेव शब्दस्य गौणमात्रं दर्शयति । न स वेद यथा पशुरित्यत्र यथा पशुशब्दः पोषकपर एवमत्र भक्षणं भोग्यभावपरम् । देवास्तं स्वसेवां कारयन्तीत्यर्थः ॥ ७ ॥

सफलां प्रथमाहुतिं विचार्य द्वितीयाहुतिं विचारयितुमधिकरणान्तमारभ्यते । तत्र सोमलोके कर्मफलं भुङ्क्त इति निश्चितं, किं सर्वफलं भुक्त्वा वृष्टिर्भवत्युत सदाचारार्थं सानुशय इति संशयः । तत्र सावशेषफलभोगे प्रमाणाभावादुत्तमशरीरादेव सदाचारसिद्धेर्निरनुशय एवावरोहतीति प्राप्ते, उच्यते ।

कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥

कृतस्य सोमभावस्यात्यये नाशे सति, अनुशयवान् अवान्तरफलसाधकसुकृतफललेशसहितो वृष्टिभाव प्राप्नोति । कुतः ? दृष्टस्मृतिभ्याम् । दृष्टं हि भोगसाधकमूलधननाशेऽपि तादृशवस्त्रोपकरणादिसहित एव तत्स्थानादपगच्छति । तथाऽत्रापि सानुशयोऽवरोहति । स्मृतिश्च, यद्यत्र नः स्वर्गसुखावशेषितमित्यादि । तर्हि नाद्भिः परिष्वक्तः स्यादित्याशङ्क्याह । यथेत, यथागतम् । अन्यथा प्रश्नोत्तरयोर्बाधः स्यात् । तर्ह्यवान्तरफलसाधकसहितः स्यादत आह । अनेवं च । अनुशयलेशसहितो भिन्नप्रकाराद्भिः परिष्वक्तः । चकाराद् वैराग्यसहितोऽवरोहतीति सिद्धम् ॥ ८ ॥

ननु, तद्य इह रमणीयचरणा इत्यादिश्रुतेस्तस्य रमणीयचरणादेव सम्यग्जन्मसिद्धेः किमनुशयसहभावेनेत्याशङ्क्य परिहरति ।

चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥

चरणश्रुतौ या योनिरुक्ता सोपलक्षणार्था, अनेन पूर्वजन्मनि समीचीनं कृतमिति ज्ञापिका । नत्वग्रिमजन्मनि समीचीनकारणे नियामिका । ततोऽनुशयोऽपेक्ष्यते ज्ञानार्थमिति कार्ष्णाजिनिमतम् । वस्तुतस्तु चरणश्रुतेः प्रकरणान्तरीयत्वात् तदनुरोधेन पञ्चाग्निविद्यायामाशङ्कानुदयात् समाधानवैयर्थ्यं नाम्ना सूच्यते ॥ ९ ॥

ननु चरणश्रुतेर्मार्गान्तरेऽपि पूर्वजन्मकृतकर्मज्ञापने प्रयोजनाऽभावाद् वैयर्थ्यापत्तिमिया विधायकत्वं वाच्यम् । तत एवाभिमदेहे रमणीयत्वप्राप्तेर्नानुशयोऽपेक्ष्यते इत्याशङ्क्य परिहरति ।

आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥

धूमादिमार्गस्थ तच्छ्रुत्यपेक्षत्वात् काम्यकर्मिणः सुकृतफलभोगानन्तरं न्यायतो दुष्कृतभोगस्योपस्थितत्वादसमीचीनयोनिप्राप्तिर्मा भवत्विति लोकन्याये बाधित्वा रमणीयं जन्म बोध्यते । अतः सार्थकत्वान्नानुशयाभावबोधिका श्रुतिः ॥ १० ॥

मतान्तरेणानुशयपदार्थमाह ।

सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥

विहितनिषिद्धकर्मणी अनुशय इति बादरिराचार्यो मन्यते । स्वमते तु फलांश एवानुशयः ॥ ११ ॥

ननु, ये वैके चास्माल्लोकात् प्रयान्तीति श्रुतौ सर्वपदादिष्टादिकारिव्यतिरिक्तानामपि सोमभावप्राप्तिः श्रूयते । तस्मात् सर्वेषामपि सोमभावानन्तरं जन्मेति शङ्कते ।

अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥

परिहरति ॥ १२ ॥

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥

तुशब्दः शङ्कामपनुदति । इतरेषां विहितव्यतिरिक्तकर्तॄणां संयमने यमसन्निधाने सुखं दुःखं वानुभूय, आरोहावरोहौ विशेषानुभवार्थमारोहोऽनुभूयावरोहः । कुतः ? तद्गतिदर्शनात् । वैवस्वते विविच्यन्त इति श्रुतौ तेषां विलक्षणगतेर्दर्शनात् ॥ १३ ॥

स्मरन्ति च ॥ १४ ॥

व्यासादयोऽपि, यमेन पृष्टस्तत्राहमित्यादिना यमगतिं स्मरन्ति । यमपुरालोकप्रसिद्धिः ॥ १४ ॥

अपि सप्त ॥ १५ ॥

पापभोगार्थं यमलोकगमनमवश्यमङ्गीकर्तव्यम् । यतो नरकास्तत्र सप्त सन्ति रौरवादयः ॥ १५ ॥

ननु नरकेषु चित्रगुप्तादयो यमाद्भिन्ना एवाधिकारिणः श्रूयन्ते । तेषां स्वातन्त्र्ये पक्षान्तर स्यादित्याशङ्क्य समाधत्ते ।

तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥

चित्रगुप्तादीनां यमायत्तत्वात् तत्रापि नरकेष्वपि तस्यैव यमस्यैव व्यापाराच्च पक्षान्तरप्राप्तिलक्षणा विरोध इत्यर्थः ॥ १६ ॥

ननु पञ्चाग्निविद्यानिरूपणे, अर्चिरादिमार्गनिरूपणे च गत्यन्तरस्यानुक्तत्वाच्च यमगतिरस्तीत्याशङ्क्याह ।

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥

तुशब्दः पक्षव्यावर्तकः । विद्यया देवयानं कर्मणा सोमभाव इति श्रुत्या तत्र तयोरेव प्रकृतत्वात् कारणत्वेन कथनाच्च यममार्ग उक्तः । नैतावता तस्य बाधः । श्रुत्यन्तरसिद्धत्वात् ॥ १७ ॥

ननु, जायस्वेत्यादिश्रुत्या यस्तृतीयः प्रवाहमार्ग उक्तस्तत्रैव यममार्गः कुतो न निविशत इत्याशङ्क्याह ।

न तृतीयेऽतथोपलब्धेः ॥ १८ ॥

तृतीये प्रवाहमार्गे तथा यमलोकवत् सुखदुःखोपलब्ध्यभावाच्च तस्मिन्नन्तर्भाव इत्यर्थः । कीटः पतङ्गो यदि दन्दशूक इति श्रुत्या मत्स्ययोनौ निर्वृतेर्विद्यमानत्वात् तथा दु खोपभोगाभावात्, तत्पश्चाद्दारीरदुःखस्यापि सत्त्वात् तथा सुखोपभोगाभावाच्च ॥ १८ ॥

स्मर्यतेऽपि च लोके ॥ १९ ॥

मूर्च्छादिषु यमलोकगमनसम्भाषणादिकं लोकेऽपि स्मर्यते इति ॥ १९ ॥

साधकान्तरम् ।

दर्शनाच्च ॥ २० ॥

यमपुरुषाणामजामिलप्रभृतिभिर्दर्शनात् । चकारात् तेषां वाक्यादिश्रवणादपि यममार्गे न विवदितव्यम् ॥ २० ॥

ननु तृतीयाहुतौ वृष्टेरन्नमिति श्रुतम् । तत्र, लोके बीजं विना केवलवृष्टेरन्नानुपलब्धेर्बाधितमित्याशङ्क्याह ।

तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥

संशोकजस्य, तस्माद् यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तद्ध्यापो जायन्त इति श्रुतेः कारणभूतजलस्य तृतीयशब्दावरोधः, तृतीयाहुतौ शब्देन वृष्टिशब्देनावरोधो ग्रहणम् । तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवतीति श्रुतेर्देवहोमात् कारणशक्तियुक्ताभ्योऽद्भ्यो बीजान्तरनिरपेक्षाभ्योऽन्नं भवतीत्यर्थः ॥ २१ ॥

ननु समानधूममार्गश्रुतौ तस्मिन् यावत्सम्पातमुषित्वा अथैतमेवमध्वानं पुनर्निवर्तन्त इत्युक्तेः, यथेतमिति वायुर्भूत्वा धूमो भवतीत्यादि, आकाशाच्चन्द्रमसमित्युक्तत्वात् कार्यरूपवाय्वादिसहभावेन कार्यरूपवृष्टिभावः प्रतीयते, न कारणरूप इत्याशङ्क्य परिहरति ।

साऽऽभाव्यापत्तिरुपपत्तेः ॥ २२ ॥

सा वाय्वादिरूपापत्तिराभाव्यापत्तिरेव वाय्वादिवद्भासमानमेव, न तु मुख्यं वाय्वादित्वम् । कुतः ? उपपत्तेः । गौणत्वेनान्यस्यान्यभावबोधकस्य वायुर्भूत्वेत्यस्य तथैवोपपत्तेः । तस्मान्न कार्यरूपवृष्ट्यादिभावः ॥ २२ ॥

नातिचिरेण विशेषात् ॥ २३ ॥

वृष्टेरन्नरूपता च नातिचिरेण । कुतः ? विशेषात् । अतो वै खलु दुर्निष्प्रपतरमिति श्रुत्याऽन्नभावादन्नस्यैव विलम्बश्रवणाद् व-

हुकालस्थितौ हि कार्यरूपवृष्टित्वम् ॥ २३ ॥

ननु, संसर्गजैः कर्मदोषैर्यान्ति स्थावरतां नर इत्युक्तेरस्याधिकारिणोऽन्तरवासम्भव इत्याशङ्क्याह।

अन्याधिष्ठितेऽपूर्ववदभिलापात् ॥ २४ ॥

अन्यैर्जीवैरधिष्ठिते व्रीह्यादावपूर्ववत्तद्भावापत्तिः। अतिथिवत्। कुतः? अभिलापात्। व्रीहियवा ओषधिवनस्पतय इत्यादिना जगति स्थितव्रीह्यादिभावस्यैवाभिलापात्। अतोऽन्यजीवाधिष्ठितव्रीह्यादौ सम्बन्धमात्रान्नोक्तदोष इति भावः ॥ २४ ॥

नन्वन्याधिष्ठानेऽङ्गीक्रियमाणेऽधिष्ठातृजीवानामशुद्धत्वादन्नस्याशुद्धत्वे तेन योग्यदेहानुपपत्तिरित्याशङ्क्य परिहरति।

अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥

न, शब्दात्। देवा अन्नं जुह्वति तस्या आहुते रेतः सम्भवतीति श्रुतेर्दैवहोमात्मकसंस्कारेणैवान्नस्य शुद्धत्वान्नोक्तदोष इत्यर्थः ॥२५॥

ननु पुरुषभक्षणमात्रादेव नान्नस्य रेतोभावो दृश्यते। बाल्यकौमारवार्द्धकेषु व्यभिचारात्। अतः श्रुतस्य पुरुषे दैवैरन्नहोमाद्रेतोभावस्यानुपपत्तिरित्याशङ्क्य समाधत्ते।

रेतःसिग्योगोऽथ ॥ २६ ॥

अत्र श्रुतौ पुरुषशब्देन मन्त्रवद्रेतःसेचनसमर्थ उच्यते। तद्योगोऽत्र विवक्षितः। कथं ज्ञायते, तत्राह। अथ। आनन्तर्यात्। पूर्वत्र देवैर्होमे कृते फलस्य जातत्वात् कथं चतुर्थ्याहुतिरफला स्यात् ॥ २६ ॥

फलं निरूपयति। तस्या आहुतेर्गर्भः सम्भवतीति श्रुतम्। तत्र योनावन्तः स्थितमेव फलं बहिर्निर्गतं चेति संशयः। तत्र गर्भशब्दस्यान्तःस्थितवाचकत्वाच्छरीरपरत्वे लक्षणाप्रसङ्गः। ततश्च गर्भस्यैवाहुतिफलत्वेन कथनात् षण्मासानन्तरं गर्भे ज्ञानसम्भवात् तादृशस्याधिकारिणो गुरूपसत्त्यादिकमग्रे न कर्तव्यमिति प्राप्ते, उच्यते।

त्कृतगुणदोषसम्बन्धेन जीवस्य मोक्षप्रतिबन्धः स्यादिति प्राप्ते ॥ २ ॥

उच्यते।

मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥३॥

तुः पक्षव्यावर्तकः। स्वप्नसृष्टिर्मायामात्रम्। तत्र हेतुः, कार्त्स्न्येनेत्यादिः। यद्वस्तुनो यादृग्देशकालसापेक्षं रूपं तद्रूपेण तस्याभिव्यक्तिः कार्त्स्न्येनाभिव्यक्तिस्तदभावात्। स्वप्ने पदार्थानां विशकलिततया भानात् सा सृष्टिर्मायामात्रमेव। किञ्च। यथा, ऐतदात्म्यमिदं सर्वं, तत्सत्यमित्यादिश्रुतौ प्रपञ्चस्य सत्यत्वं निरूप्यते, न तथा क्वापि स्वप्नप्रपञ्चस्य सत्यत्वं निरूप्यते। अतः प्रदर्शनार्थत्वान्मायिकत्वमेव। तस्य लोकप्रतिच्छायरूपत्वाज्जीवतां मृतानां च दर्शनमुपपद्यते। अतः स्वप्नसृष्टेर्मायामात्रत्वान्न जीवस्य तत्कृतगुणदोषसम्बन्धेन मोक्षप्रतिबन्धः। स्वप्ने दीक्षितस्याधर्मांजनादिप्रायश्चित्तं तु, वचनबलादेव तत्र तदानीं जीवस्य कर्तृताऽऽरोपाद्दोषसम्बन्धं कल्पयित्वा तन्निरासाय विधीयते। अन्यत्र तु स्वप्ने जीवस्य कर्तृत्वाभावान्न गुणदोषसम्बन्धः। तत्र जीवब्रह्मणोर्विद्यमानत्वाद्देवताऽऽज्ञादिरपि युक्ता। स्वप्नपदार्थानां त्वलौकिकत्वात् क्वचिन्न संवादः, क्वचिद्भगवदावेशेनैव संवादोऽपि भवति। अतः स्वप्नस्य मायामात्रत्वमिति सिद्धम् ॥ ३ ॥

ननु किमर्थं तर्हि स्वप्नसृष्टिरित्याह।

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥

स्वप्नः शुभाशुभफलस्य सूचको भवति। चकारेण क्वचिद्दाताविशेषदानमपि तत्र दृश्यते। कलिकालाद्यनुरोधात् प्रत्यक्षत आज्ञाद्यसम्भवात्। प्रातः स्वप्नपदार्थदर्शनेऽपि तत्सूचितफलस्य दृष्टत्वात्। अस्यार्थस्य युक्तत्वं हि शब्देन द्योत्यते। अत्र प्रमाणमाह। यदा कर्मसु काम्येष्वित्यादिश्रुतेः। किञ्च तद्विदः स्वप्नाध्यायविदोऽपि तथा, आरोहणं गोवृषकुञ्जराणामित्यादिना सूचकमाचक्षते। अतः शुभाऽशुभफलसूचनार्थं स्वप्नदर्शनम् ॥ ४ ॥

ननु लीलार्थं भगवान् सृष्टिं करोति, स्वप्नसर्गो लीलाश्च तस्मै

प्रदर्शयति, भगवदंशश्चायं जीवः । तथासत्येतस्य दुःखित्वाद्यनुपप-त्तिरित्याशङ्क्याह ।

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ५ ॥

तुः पक्षव्यावर्तकः । अस्य जीवस्य पराभिध्यानात् परस्य भगवतोऽभिध्यानं स्वस्यैतस्य जीवस्य च भोगेच्छा तस्मात् तिरोहितमैश्वर्यादि । अतो भगवदिच्छया जीवस्यैश्वर्यादिषड्गुणतिरोभावाद् यथायोग्यं दीनत्वसर्वदुःखसहनसर्वहीनत्वजन्माद्यापद्विषयत्व-देहाद्यहम्बुद्धिविषयासक्त्यादयो भवन्ति । अतो बन्धविपर्ययावेतस्य ज्ञातौ । हि युक्तश्चायमर्थः । एकस्य जीवस्यैकांशप्राकट्येऽपि तद्धर्म-दर्शनात् । आनन्दांशस्तु पूर्वमेव तिरोहितो यतो जीवभावः । अत एवास्य काममयत्वम् । आनन्दस्याकामरूपत्वात् । निद्रायाश्च सुतरां भगवद्धर्मतिरोभावकत्वम् । अतो भगवत ऐश्वर्यादिलीलासिद्ध्यर्थं जीवस्यैश्वर्यादितिरोभाव उक्तः । अत्रायं भावः । भगवतः परम-कारुणिकत्वात् तदिच्छया जीवस्य बन्धोऽसम्भावितः । अतो जीव-स्य भोगेच्छयैव भगवदिच्छाया उत्तेजनम् । अथवा जीवस्य भग-वदंशत्वाद्भगवदिच्छयैव जीवेच्छा । तयैतस्य बन्धविपर्ययौ । अत्रा-नन्दतिरोभावरूपोऽनादिर्बन्धो देहादिष्वहम्बुद्ध्यादिरूपः पूर्वसिद्ध एव । अन्यस्तु बन्धो जीवस्य भोगेच्छया भगवदिच्छाकृत इति ज्ञेयम् । तस्मान्नपूर्वोक्तो दोषः ॥५॥

एवं स्वमतेन जीवस्यैश्वर्यादिधर्मतिरोभावं निरूप्य मतान्तरेण निरूपयति ।

देहयोगाद्वा सोऽपि ॥ ६ ॥

देहयोगाद्वैतस्य सर्वतिरोभावो विपर्ययो वा । अविद्याध्यासाद-न्यदपि ज्ञानद्वयम् । अस्मिन् पक्षे देहवियोग एव पुनरैश्वर्यादिप्राप्तिः । पूर्वकल्पे विद्यमानेऽपीति शेषः ॥ ६ ॥

एवं प्रसङ्गाज्जीवस्याज्ञानं निरूप्य सुषुप्तौ केवलमज्ञानं वक्तुं स्वापस्वप्नाभावौ निरूपयति ।

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥

नाडीरनुक्रम्य, तासु तदा भवति यदा सुप्तः स्वप्नं न कञ्चन पश्यति, अथास्मिन् प्राण एवैकधा भवतीति, तथा प्राज्ञेनात्मना सं-परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमिति श्रूयते । तत्र स्वप्नवत् प्रपञ्चसृष्टिमपि भगवान् मायिकीं करोति, न वेति संशयः । तत्र, एव सुप्तेषु जागर्तीत्यत्र जीवस्वापमात्रे भगवत्सृष्टेः कथनात् स्वप्नं न कञ्चन पश्यतीत्यत्र दर्शनमात्रनिषेधान्न बाह्यं किञ्चन वेद नान्तरमिति जागरणस्वप्नप्रपञ्चयोरविशेषेणादर्शनकथनात् सुषुप्तावपि प्रपञ्चनिर्माणमम्भवान्मुक्तावपि तत् स्यात् । परं सुषुप्तावित्राज्ञानमात्रम् । तथा सति सुषुप्तिवत् पुनर्बन्धप्रसङ्ग इति प्राप्ते, उच्यते । नाडीष्वात्मनि च तस्य स्वप्नस्याभावः । कुतः ? तच्छ्रुतेः प्रपञ्चाभावश्रुतेः । कामनया हि प्रपञ्चनिर्माणम् । सुषुप्तेस्तु तद्वा अस्यैतदात्मकाममित्यादिनाऽकामरूपश्रवणात् । तत्र तन्न सम्भवतीत्यर्थः । नाडीष्वात्मनि चेतिकथनात् सुषुप्तेर्द्विरूपत्वं सूच्यते । अत एव बृहदारण्यकषष्ठे, ता वा अस्यैता हिता नाड्य., तद्वा अस्यैतदात्मकाममिति भेदेन सुषुप्तिमाह । अतः सुषुप्तौ प्रपञ्चसृष्टेरभावान्न सर्वदा प्रपञ्चनिर्माणम् । तेन नोक्तदोष. ॥ ७ ॥

प्रबोधे विचार्यते । तत्र नाडीभ्यो भगवतो वा हृदयदेशं समागत्य जागर्ति, उत यत्र स्थितस्तत एवेति संशये, प्रतियोन्याद्रवति बुद्धान्तायैवेतिब्रह्मप्रकरणीयश्रुतेर्हृदयदेशमागत्य जागर्तीति प्राप्ते, उच्यते ।

अतः प्रबोधोऽस्मात् ॥ ८ ॥

नाडीषु सुप्तौ, अतो नाडीभ्य एव प्रबोधः । प्रतियोन्याद्रवणश्रुतिस्तु ब्रह्मप्रकरणीयत्वाद् भगवतः प्रबोधव्यवस्थामाह । तस्माद् यत्र स्थितस्तत एव प्रबोध इति सिद्धम् ॥ ८ ॥

ननु प्रिययेव प्राज्ञेनात्मना परिष्वक्तस्य प्रबोधेन ज्ञाते जाते मुक्तिरवश्यान्न पुनरागमनम् । देहनिर्वाहार्थं तु भगवदिच्छयाऽयं जीवः समायाति । नाडीभ्यः प्रबोधे तु मुक्त्यसम्भवात् स एव जीवः समायाति । तथाच भगवति सुप्तस्य तत एव मुक्त्यसम्भवान्मोक्षार्थं प्रयत्नो व्यर्थं इत्याशङ्क्य परिहरति ।

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

तुः शङ्कानिरासे। भगवतः प्रबोधे स एव । कुतः? कर्मानुस्मृतिशब्दविधिभ्यः। सामिकृतस्य लौकिककर्मणः समापनं दृश्यते। अतः स एवेति जानीमः। अनुस्मृतिरप्यनुभवितुरेव नान्यस्य सम्भवति। शब्दश्च पुण्यो वै पुण्येन कर्मणेत्यादिः । विधयश्च, श्वोभूते ब्रह्माणं वृणीत इत्याद्या अन्यस्यानुपपद्यमानाः स एवेति ज्ञापयन्ति। अतः पूर्वपक्षयुक्तीनां दुर्बलत्वात् स एव प्रतिबुध्यत इति सिद्धम् ॥९॥

ननु यत्र कर्मानुस्मृत्यादिहेतवो न सम्भवन्ति मुग्धादिषु तत्र स एवेत्यत्र नियामकाभावादन्यो भविष्यतीत्याशङ्क्य परिहरति।

मुग्धेऽर्द्धसम्पत्तिः परिशेषात् ॥ १० ॥

मुग्धे मुग्धभावे अर्द्धसम्पत्तिरेव, न सर्वा। मुग्धस्य यागाद्यनधिकारात् । लौकिकव्यवहारस्याप्यपूर्वस्यासाधनत्वाज्जीवनाधिकारप्राप्तकर्ममात्रकरणादर्द्धसम्पत्तिरेव ज्ञेया। परिशेषात् । स एव वा, न वेतिनिश्चयप्रमाणाभावात् सन्देहोऽवशिष्यते । अत्र जीवावस्थानामेव विचार्यत्वात् प्राणायतनविघातकृता मूर्च्छा नेह विचार्यते। अत एक एव जीवः स्वप्नादिदोषसम्बन्धरहितः पञ्चाग्निसाधितदेहयुक्तो भगवज्ज्ञानरहितो ज्ञानाधिकारीति सिद्धम्॥ १० ॥

अथवा ज्ञानविषयनिर्णयाय ब्रह्मस्वरूपं विचार्यते । तत्र प्रथममन्योऽन्यं विरुद्धवाक्यानां निर्णयः क्रियते । तत्र पूर्वाध्यायद्वयेन समन्वयविरोधः परिहृतः । तथा ब्रह्मणि धर्मविरोधः परिहर्तव्यः अन्यथा वेदान्तानामबोधकत्वं प्रसज्ज्येत । तत्र विरुद्धानां स्वगतधर्माणामस्मिन् पादे विचारः । जडजीवधर्मत्वेन प्रतीतास्तत्र विचार्यन्ते। तत्र क्वचिज्जडजीवधर्मा भगवति बोध्यन्ते, सर्वकर्मा सर्वकाम इत्यादिना। क्वचित्स्वस्थूलादिवाक्ये प्रापञ्चिकधर्मा निषिद्ध्यन्ते। नच सर्वकामादयो जीवधर्मा नेति वाच्यम् । तेषां जीवगतत्वेन प्रतीतेः। नच ते धर्माः कारणत्वेन ब्रह्मणि सन्तीति वाच्यम्। नेतरोऽनुपपत्तेरित्यादिना सर्वत्र जीववैलक्षण्यस्योक्तत्वाद् ब्रह्मणि तद्धर्माणां निषेधाच्च। एवं वेदान्तेषु वाक्यानां परस्परविरोधे प्राप्ते केषां चिन्मतेनाविरोधमाशङ्क्य परिहरति।

न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥

सर्वत्र कारणत्वेन भगवतो विद्यमानत्वादस्थूलेऽस्थूलोऽनणावनणुरुच्चावचकर्तर्युच्चावचकर्ता उच्चावचकामे उच्चावचकामः पृथिव्यां गन्धो जलादावगन्धः । एवं स्थानतः परस्य ब्रह्मण उभयलिङ्गत्वमुपपद्यते । अपिशब्देनावच्छेदभेदेनाचिन्त्यसामर्थ्याद्वोभयलिङ्गत्वं सम्भवतीति संगृह्यते । तत्र, कुतः ? सर्वत्र हि । सर्वत्रैव हि ब्रह्मवाक्येष्वेतादृशमेव ब्रह्मस्वरूपं निरूप्यते । अतः स्थानभेदेनोभयवाक्यसमाधानं न सम्भवतीत्यर्थः । ब्रह्मवाक्यानामनुवादकत्वे वैयर्थ्यात् स्वरूपप्रतिपादकत्वं युक्तमिति हिशब्दार्थः । अचिन्त्यसामर्थ्याङ्गीकारे ज्ञानानुदयप्रसङ्गः । अत एतन्मतानुसारेण स्थानत उभयलिङ्गवाक्यानां विरोधो न परिहर्तुं शक्यः ॥ ११ ॥

प्रकारान्तरेणाविरोधमाशङ्क्य परिहरति ।

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

भेदात् प्रपञ्चधर्मविशिष्टं ब्रह्म भिन्नं, तद्धर्माभावविशिष्टं च भिन्नमिति सर्वत्र कारणकार्येषु भेदाङ्गीकाराच्च पूर्वोक्तो विरोध इति चेन्न । मधुब्राह्मणे, अयमेव स योऽयमिति प्रत्येकमभेदवचनान्तानेनापि प्रकारेण विरोधपरिहारः ॥ १२ ॥

अपि चैवमेके ॥ १३ ॥

एके शाखिन एवं भेदनिषेधेनाभेदमेव वदन्ति । नेह नानाऽस्ति किञ्चन, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति । अत्रैवशब्दो बहु स्यामितीच्छया प्रतीतस्य भेदस्य व्यावृत्त्यर्थः ॥ १३ ॥

अतो भेददर्शनस्य प्रत्युत निषिद्धत्वात् तदङ्गीकारेण विरोधपरिहारासम्भवादुपनिषद्वाक्येषु परस्परं विरोधे प्राप्ते, एकदेशिमतेन परिहारमुच्यते ।

अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥

रूप्यते निरूप्यते व्यवह्रियत इति रूपं सर्वव्यवहारविषयत्वं, तद्युक्तं रूपवज्जगत् । ब्रह्म तु तद्विलक्षणम् । ननु जगतः कार्यत्वात्

कार्यकारणयोरवैलक्षण्यमपि स्यादित्याशङ्क्याह। तत्प्रधानत्वाद् ब्रह्मस्वरूपप्रतिपादकवाक्येषु ब्रह्मणः प्रधानत्वान्मुख्यत्वात् तस्यैव निरूपणमुचितं, नतु जगतोऽपि। अतो ब्रह्मणो जगद्विलक्षणत्वात्तद्धर्माणां निषेध उचितः। सर्वकर्मादयस्तु जगद्धर्मा उपचारादुच्यन्ते। अत्रारूपमितिवक्तव्येऽरूपवदिति भिन्नवत्कथनं सर्वकर्मादीनां जगद्धर्माणामेवैवं निर्णयो, नतु प्रशासनाद्यसाधारणधर्माणाम्। तेषां भगवद्धर्मत्वे विरोधाभावात्। अतः प्रपञ्चवत्तद्धर्माणामपि कार्यत्वाद्भगवत्त्व, न भगवद्धर्मत्वमिति। एवं ब्रह्मस्वरूपनिरूपकवाक्यानां मुख्यतया तन्निरूपकत्वं धर्मप्रतिपादकानां तूपचारेण तन्निरूपकत्वमित्येकदेशिमतेन विरोधपरिहारः॥ १४॥

नन्वेवं निर्द्धर्मके ब्रह्मणि सर्वव्यवहाराभावे शास्त्रवैफल्यं, तं त्वौपनिषदं पुरुषं पृच्छामि, यतो वाचो निवर्तन्त इति वाक्यानां विरोधश्चेत्याशङ्क्याह।

प्रकाशवच्चावैयर्थ्यात्॥ १५॥

यथा सौरः प्रकाशो व्यवहार्योऽव्यवहार्यश्च स्वतः स्थापयितुं सम्पादयितुं च न शक्यते। सूर्योदये मेघाद्यभावे च व्यवहर्तुं शक्यते। तथा ब्रह्मापि लौकिकेन्द्रियैर्व्यवहर्तुं न शक्यते। भगवत्कृपया तत्सन्निधाने तु व्यवहर्तुं शक्यते। उभयथा श्रुतिर्निरूपयतीत्यर्थः। कथमेतज्ज्ञायते, तत्राह। अवैयर्थ्यात्। अन्यथा ब्रह्मप्रतिपादकं शास्त्रं व्यर्थं स्यात्। चकारेण, आसीनो दूरं व्रजति, अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्यादीनामलौकिकभगवद्धर्माणामकार्याणां घात विद्वानां विरोधो नास्तीत्युच्यते। तस्माद्व्यवहार्येऽपि ब्रह्मणि न शास्त्रवैफल्यम्॥ १५॥

ननु श्रुत्युक्तानां दर्शनश्रवणादिधर्माणामकार्यत्वकल्पनापेक्षायामलौकिकानीन्द्रियाणि कल्पनीयानि। तथा सत्यकारणकार्यत्वपरिहारेऽपि पश्यत्यचक्षुरिति श्रुतिविरोध इत्याशङ्क्य परिहरति।

आह च तन्मात्रम्॥ १६॥

यथा सैन्धवघनोऽनन्तरोऽबाह्य इत्यादिना श्रुतिस्तन्मात्रं प्रज्ञानघनमात्रमाह। अतः स्वरूपातिरिक्तेन्द्रियाणामभावाद् वेदात्मनिःश्वा-

स्वसमुत्थानादिक्रियाणामपि तत एव सम्भवात् सर्वाकारस्वरूपात्मकत्वस्याङ्गीकारान्नेन्द्रियादिकल्पनया श्रुतिविरोधः शङ्क्यः । चकारेण, सर्वेन्द्रियविवर्जितमिति स्मृतिरपि संगृहीता ॥ १६ ॥

ननु ब्रह्मणः समवायिनिमित्तरूपेण जगत्कारणत्वात् कारणधर्माणामेव कार्ये दर्शनात् कामादिधर्माणां च श्रुत्योक्तत्वाद् ब्रह्मणि सत्त्वमङ्गीकर्तव्यम् । तथाच निषेधकश्रुतिविरोध इति प्रकारान्तरेणाशङ्क्य परिहरति ।

दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥

दर्शयति श्रुतिरेव, अथात आदेशो नेति नेतीत्यादिना ब्रह्मणि जडजीवधर्माणामभाव इति । अग्रे, अन्यत्परमस्तीत्यनेन ब्रह्मणः प्रपञ्चातिरिक्तकथनात् प्रपञ्चधर्माणां तत्र कथनमौपचारिकमेव युक्तम् । श्रुतेरन्यार्थत्वनिराकरणाय स्मृतिसम्मतिमाह । अनादिमत्परं ब्रह्मेत्यादि स्मर्यतेऽपीत्यर्थः । अतः प्रपञ्चधर्माणामुपचाराद् ब्रह्मणि कथनं युक्तम् ॥ १७ ॥

अत्रैव निदर्शनमाह ।

अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥

अत एवेमं निर्णयमाश्रित्य, समः प्लुषिणा समो नागेन समो मशकेन सम एभिस्त्रिभिर्लोकैरित्यादिना निरुपमस्य भगवत उपमाकथनम् । नह्येतत् तत्तद्धर्मसम्बन्धं विनोपपद्यते । स्वतन्त्रतादशधर्मवत्त्वस्य ब्रह्मणि वक्तुमयुक्तत्वात् । नन्विदमपि विरुद्धमित्याशङ्क्य दृष्टान्तेन समाधत्ते । सूर्यकादिवत् । सूर्येण सहितं कं जलं सूर्यकम् । यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्, एकधा दशधा चैव दृश्यते जलचन्द्रवदित्यत्र प्रतिबिम्बसहितस्य जलस्योपमानत्वम् । तथा, समः प्लुषिणेत्याद्यपि भगवतः सर्वकारणत्वेन तत्तद्धर्मसम्बन्धाद् बोध्यं, नतु स्वातन्त्र्येण भगवति ते धर्माः सम्भवन्ति । चकारस्त्वेवं विरोधाभावो वाच्योऽधिकरणं चैकदेशिनः सम्पूर्णमिति बोधनार्थः ॥ १८ ॥

अतो जडजीवधर्माणां भगवत्युपचारात् कथनं, निषेधस्तु मुख्य इत्येकदेशिमतं दूषयति ।

अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥

तुः पूर्वमतव्यावृत्त्यर्थः। न तथात्वं, ब्रह्मण उपचारेण जडजीवसम्बन्धात् सर्वकामत्वादिकं न सम्भवति । कुतः ? अम्बुवदग्रहणात्। यथा स्वच्छमम्बु प्रतिबिम्बं गृह्णाति, तथा धर्माः सर्वकामत्वादयो धर्मिणं भगवन्तं न गृह्णन्ति । स्वातन्त्र्यपरत्या धर्मव्याघातात्। सर्वाधारत्वेन ब्रह्मणस्तद्धर्मवत्त्वं तु स्वाभ्युपगमविरुद्धम् । नच वेदे भ्रमाद्धर्मकल्पनं सम्भवति । अप्रतारकत्वात् सर्वज्ञत्वाच्च। अतः सर्वकामादयो ब्रह्मधर्माः स्वाभाविका एव, नतूपाधिसम्बन्धादौपचारिकाः ॥ १९ ॥

सिद्धान्तेन विरोधं परिहरति।

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २० ॥

यथैकस्यैवाकाशस्य करकादिष्वन्तर्भावाद् वृद्धिह्रासभाक्त्वमेवमेवोभयसामञ्जस्याद् एवं तत्तदनुप्रवेशाद् ब्रह्मणोऽपि सर्वकामादयः सम्भवन्ति। नचैवं धर्माणामौपाधिकत्वप्रसङ्गः । जपाकुसुमलौहित्यवदन्यधर्मत्वाभावाद् ब्रह्मधर्माणामेवान्यत्र प्रतिभानात् ॥ २०॥

अत्र हेत्वन्तरमाह।

दर्शनाच्च ॥ २१ ॥

भगवति सर्वे विरुद्धा धर्मा दृश्यन्ते, अल्पपरिमाणो, महत्परिमाणम्। एवं बाल्यकिशोरावस्थास्वपि ज्ञेयम् । नहि दृष्टेऽनुपपन्नं नाम, व्याघातात्। चकारेणोलूखलबन्धनादौ प्रत्यक्षेणोभयधर्मवत्त्वेन दर्शनं संगृह्यते। अतस्तद्रस्वेनादृशामिति मन्तव्यम् । ततः श्रुतिस्मृतिप्रत्यक्षैः सर्वविरुद्धधर्माश्रयत्वेन ब्रह्मप्रतीतेर्न कश्चिद् विरोधः शङ्क्यः ॥ २१ ॥

एवं वस्तुस्वरूपविचारेण परमार्थतो विरोधं परिहृत्य युक्त्या परिहरति।

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति

च भूयः ॥ २२ ॥

प्रकृतं यदेतावत्त्वं प्राकृतधर्मवत्त्वं तदेव प्रतिषेधति श्रुतिः, न त्वलौकिकसर्वकामवत्त्वादिकम् । प्रतीतस्यैव प्रतिषेध्यत्वादप्रतीतस्याऽलौकिकधर्मवत्त्वस्य प्रतिषेधायोगात् । अस्थूलादिवाक्यैर्ब्रह्मणो अ‑गद्वैलक्षण्यमेवोच्यते । ननु वेदोक्तधर्मा निषिध्यन्ते । अत्र प्रमाणमाह । ततो ब्रवीतीत्यादि । यत्र वाक्ये धर्मान् निषेधति, पुनस्तत्रैव तान् विधत्ते, यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वानित्यादौ । तस्माल्लौकिकधर्माणामेव प्रतिषेधो, न त्वलौकिकानामपीति ज्ञेयम् ॥ २२ ॥

एवं शब्दबलविचारेण विरोधं परिहृत्यार्थबलविचारेण तत्परिहारायाधिकरणान्तरमारचयति । तत्र, न चक्षुषा गृह्यते, कश्चिद्धीरः प्रत्यगात्मानमैक्षत्, नापि वाचा, सर्वे वेदा यत्पदमामनन्ति, अस्पर्शमगन्धमरसं, सर्वरूपः सर्वगन्धः सर्वरस इत्यादिविरुद्धवाक्यानां दर्शनाद् वस्तुनो द्वैरूप्यासम्भवात् स्वतःप्रमाणभूतवाक्यद्वये एकस्य प्रामाण्यमन्यस्योपचरितार्थत्वं कल्प्यम् । तत्र कस्योपचरितार्थत्वमितिजिज्ञासायां प्रत्यक्षानुरोधेन पूर्वपक्षमाह ।

तदव्यक्तमाह हि ॥ २३ ॥

तद् ब्रह्माव्यक्तमेव भवितुमर्हति । यतः, आह हि श्रुतिप्रत्यक्षाभ्याम् । नेति नेतीत्यात्माऽग्राह्यो नहि गृह्यत इति । न हि गृह्यत इत्यनुभवं श्रुतिराह । नहि चक्षुषा वा मनसा वा कस्यापि दर्शनमस्ति । सर्वरूपत्वे तु ब्रह्मणः सर्वेषां दर्शनं स्यात् । अतो धर्मप्रतिपादकानि वाक्यान्युपचरितार्थान्येवेति प्राप्ते ॥ २३ ॥

उच्यते ।

अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २४ ॥

अपिः पूर्वपक्षिगर्हणे, यतोऽसौ मूर्खः।संराधने सम्यक्प्रकारकसेवायां भगवत्तोषे जाते द्रष्टुं शक्यते । श्रद्धाभक्तिध्यानयोगादवैहि, भक्त्या त्वनन्ययेत्यादि, ज्ञातुं द्रष्टुं च तत्त्वेनेत्युक्तेः । किञ्च, ततस्तु तं पश्यते निष्कलं ध्यायमानः, अनेकयाद्रूरवक्त्रनेत्रं पश्या‑

मीत्यादिना सगुणनिर्गुणं च रूपं दृश्यत्वेनोच्यते । अतः प्रत्यक्षानुमानाभ्यां संराधकस्य स्वानुभवो, ध्रुवादीनामनुमापकत्वात् तज्जनितमनुमानं ताभ्यां, श्रुतिस्मृतिभ्यां वा ब्रह्म साकारमनन्तगुणपूर्णं चेति, नाव्यक्तमिति ज्ञेयम् ॥ २४ ॥

इममेव सिद्धान्तं प्रकारान्तरेण स्थिरीकर्तुमधिकरणान्तरमारचयति । तत्र सूत्रद्वयेन पूर्वपक्षद्वयमाह ।

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २५ ॥

ननु प्रत्यक्षानुरोधेन ब्रह्मण उभयरूपत्वं न सम्भवति । अतस्तत्प्रतिपादकवाक्यानां वस्तुशक्त्या निर्णय उचितः । तत्र यथा प्रकाशजलसुवर्णानां सूर्यचन्द्रमणिप्रकाशादिषु हिमतप्तकुण्डादिजलेषु सुवर्णे चानेकविधरूपस्य दृश्यमानत्वेऽपि नानेकविधत्वमङ्गीक्रियते, एकरूपत्वेनैव तेषां निर्णयात् । तथा ब्रह्मणोऽप्यवैशेष्यमङ्गीकर्तव्यम् । ननु साक्षात्कारानुरोधेन ब्रह्मणि तावन्तो धर्मा अङ्गीक्रियन्त इत्याशङ्क्याह । प्रकाशश्च कर्मणि । भगवतः प्रकाशस्तु तपःप्रणिधानादिकर्मणि भवति । तत्र तु भक्तेच्छानुरोधाद् यथाकामं प्रकटीभवतीति स प्रकाशो वस्तुनिर्णायको न भवतीत्यर्थः । चकारेणाप्रकाशोऽन्यथा प्रकाशश्च भवति, तदप्यभ्यासात् । बहुवारमनेकरूपेण प्रकटीभवति । अतोऽनेकरूपदर्शने न वस्तुनिर्णायकं भवतीति भावः ॥ २५ ॥

अतोऽनन्तेन तथा हि लिङ्गम् ॥ २६ ॥

अतोऽभ्यासादनन्तेन रूपेणाविर्भावः । नह्येकं वस्तु स्वतोऽनेकविधं भवति । तथा सति लिङ्गं विग्रह एव भवति, न स्वरूपम् । हीत्यनेन, यद्धियाता उरुगाय विभावयन्तीति प्रमाणं सूचितम् । अतः श्रुतेः प्रत्यक्षस्य वा निर्णायकत्वान्निर्धर्मकमेव ब्रह्मेति प्राप्ते ॥२६॥ उच्यते ।

उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २७ ॥

तुः पक्षव्यावर्तकः । नहि ब्रह्मस्वरूपनिर्णयो युक्त्या कर्तुं शक्यः । शब्दैकगम्यस्य ब्रह्मणः स्वरूपनिर्णयः शब्देनैव भवति । अत उभयव्यपदेशाद् निर्गुणत्वेनानन्तगुणत्वेन सर्वविरुद्धधर्माश्रयत्वेन व्यपदेशादुभयरूपं ब्रह्म ज्ञेयम् । तदुभयमपि वास्तविकं नित्यम् । गुणानामपि तदात्मकत्वेन निर्गुणत्वम् । आश्रयाश्रयिभावरूपेण स्फुरणात् सविशेषमपि । नन्वेकस्य कथमनेकधा भानं, तत्राह । अहिकुण्डलवत् । यथैक एव सर्प ऋजुरनेकाकारः कुण्डलश्च भवति, तथा ब्रह्माप्यचिन्त्यशक्त्या सर्वप्रकारं भक्तेच्छया तथा स्फुरति । अतः प्रमाणसिद्धसकलविरुद्धधर्माश्रये भगवति, न कापि श्रुतिरुपचरितार्थेति सिद्धम् ॥ २७ ॥

एवं धर्मिस्वरूपविचारेण ब्रह्मणो निर्धर्मकत्वं सधर्मकत्वं च स्थापयित्वा धर्मस्वरूपविचारेणेदमेव स्थापयितुमधिकरणान्तरमाह । तत्र धर्माः, किं ब्रह्मणो भिन्नास्तत्कार्यरूपा उत ब्रह्मैवेति संशये, लोके कार्यस्यैव घटरूपादेस्तद्धर्मत्वव्यपदेशात् तन्नित्यतायां प्रमाणाभावात् स्वाभाविकत्वेन नित्यत्वोक्तौ, एकमेवाद्वितीयमितिश्रुतिविरोधाच्च धर्माः प्रपञ्चवत् कार्याः, तथाच ब्रह्म निर्धर्मकमेवेति प्राप्ते, उच्यते ।

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥

वाशब्दः पूर्वपक्षव्यावर्तकः । यथा प्रकाशाश्रयाः सूर्यादयः प्रकाशेन न भिन्नाः पृथक्स्थित्यभावात् । नापि प्रकाशः सूर्य एव । सूर्यस्य प्रकाशभेदेन प्रतीतेः । अनन्तत्वस्त्वेनादृशमिति मन्तव्यम् । तत्र हेतुः । तेजस्त्वात् तेजःशब्दवाच्यत्वाद्, अथ यदतः परो दिवो ज्योतिरित्यादिना । अतो ब्रह्मधर्माणामपि चिद्रूपत्वेन स्वरूपानतिरेकान्न कार्यत्वेनानित्यत्वमिति ज्ञेयम् । तस्माद् यथाश्रुतमेव ब्रह्म सधर्मकं निर्धर्मकं चेति सिद्धम् ॥ २८ ॥

पूर्वोक्तैकदेशिमतेनाप्युभयवाक्यसमाधानमाह ।

पूर्ववद्वा ॥ २९ ॥

अथवा, अरूपवदेव हीत्यादिपञ्चसूत्र्या यः पूर्वमेकदेशिमतेन सिद्धान्त उक्तो, निर्धर्मकमेव ब्रह्म सर्वकामादिधर्मनिरूपणं तूपचारादिति तद्वद्वा ब्रह्म ज्ञेयम् । अत्रायमाशयः । उपपत्त्योपपत्त्या च द्वेधा ब्रह्मस्वरूपविचारः । तत्र सिद्धान्तिमतेनोपपत्त्या विचारे धर्मिग्राहक-

प्रमाणभूतैरुपनिषद्वाक्यैर्यादृशं ब्रह्म बोध्यते सधर्मकं निर्द्धर्मकं च तादृशमेव तद्वस्तूपपद्यते । अन्यथाकल्पनस्य कल्पनामात्रत्वात् । एकदेशिमतेन तूत्परत्या विचारे प्रथमं ब्रह्म निर्द्धर्मकमेव । ततो, बहु स्यामितिसृष्टीच्छया प्रथमं ब्रह्म स्वधर्मरूपेण भवति । ततः क्रियादिरूपेण प्रपञ्चरूपेण चेति । अनया रीत्याऽपि ब्रह्मस्वरूपमुभयात्मकं सिद्ध्यति । अन्यथैकतरश्रुतिबाधः स्यात् । धर्माणां नित्यत्वं तु ब्रह्मात्मकत्वादेव ज्ञेयम् । अयं भावः । निर्गुणमेव ब्रह्माङ्गीकर्तव्यम् । अत्र न विवदामः । किन्तु केवलनिर्गुणत्वे सृष्टिप्रक्रियाबन्धमोक्षव्यवस्थादीनामनुपपत्तिरस्ति । ननु प्रतिबिम्बेनैव समाधेयमिति चेदुच्यते । नहि निर्द्धर्मकस्य प्रतिबिम्बं सम्भवति । लोके कुत्रापि तथाऽदर्शनात् । तस्मादचिन्त्यतद्भिन्नशक्त्या सगुणमपि स्वरूपं वास्तविकमेवाङ्गीकर्तव्यम् । तदेव सृष्टिसमये गुणानाविष्कृत्य सृष्टिं करोति । ननु सधर्मकत्वे, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाभङ्गः स्यादिति चेदुच्यते । गुणाः स्वस्वरूपान्नात्यन्तं भिन्नाः । तस्मात् तेषामपि तत्स्वरूपत्वेनैकविज्ञानेन सर्वविज्ञानप्रतिज्ञापि सुष्ठ्वेव । अतो न कोऽपि दोषः शङ्क्यः । मतद्वयमपि सूत्रकारस्मतमित्युपन्यस्तम् ॥ २९ ॥

एकदेशिमते उपपत्त्यन्तरमाह ।

प्रतिषेधाच्च ॥ ३० ॥

एकमेवाद्वितीयं ब्रह्मेतिश्रुतावेकमेवेत्येवकारेणान्यनिषेधप्राप्तावद्वितीयमितिप्रतिषेधाद्धर्मप्रतिषेधोऽपि गम्यते । पेस्नेतिकथनाद्धर्माणां पुनरभिव्यक्तिः । एवकारेणैकब्रह्मविज्ञानेन सर्वविज्ञानप्रतिज्ञा संगृहीता । अतो ब्रह्मणि न कोऽपि विरोधोऽस्तीति सिद्धम् ॥३०॥

एवं धर्मधर्मिविरोधं परिहृत्य ब्रह्मणो धर्म्यन्तरपरिहारायाधिकरणान्तरमारभते । तत्र पूर्वपक्षः ।

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥ ३१ ॥

अतो ब्रह्मणोऽपि परम् वस्तुवस्त्वस्तीति । तत्र चत्वारो वैदिकहेतवः । अथ य आत्मा स सेतुर्विधृतिरिति सेतुव्यपदेशः । तत्र पारप्राप्त्यर्थं सेतुव्यपदेशात् तस्मादन्यत् प्राप्यमेव कल्प्यम् । फलाभावश्चेत् किमिदमुक्तं ब्रवीतितथा, यावान् वा अयमाकाशस्तावा-

नैषोऽन्तर्हृदय आकाश इत्युन्मानव्यपदेशः। तेन परिच्छेदो निरूपितः। तथा उभावस्मिन् द्यावापृथिवी अन्तरेव समाहिते इत्याधाराधेयसम्बन्धो निरूपितः। तथा, य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते, य एषोऽन्तरक्षिणि पुरुषो दृश्यत इत्यत्रादित्याक्षिस्थितयोः पुरुषयोः परस्परं धर्मातिदेश उक्तो धर्मिभेद एव सम्भवति। धर्म्यैक्ये तु स एवायमित्युच्येत। अतोऽस्य देशकालवस्तुस्वरूपपरिच्छेदाच्चतुर्विधपरिच्छेदरहितं फलरूपमन्यत् किञ्चिदस्तीति प्राप्ते ॥ ३१ ॥

उच्यते।

सामान्यात्तु ॥ ३२ ॥

तुः पक्षव्यावर्तकः। ब्रह्मणि संसारसागरोत्तरणोपायत्वसामान्यात् सेतुव्यपदेशः। निर्लेपायाकाशव्यपदेशः। कामादिदोहाय चतुष्पात्त्वमुक्तम्। अमृतत्वाय षोडशकलत्वं निरूपितम्। अतुलभत्वाय सम्बन्धकथनम्। दिव्यत्वज्ञापनायाक्षिस्थिते आदित्यधर्मातिदेशः। अतो गुणार्थमेव सेतुत्वादिवचनं, न तु तद्गतदोषार्थम्। अतो नातः परमन्यदस्तीति मन्तव्यम् ॥ ३२ ॥

तर्ह्यन्यसमानत्वेन कथनं किमर्थमित्याशङ्क्याह।

बुद्ध्यर्थः पादवत् ॥ ३३ ॥

तथा व्यपदेशो बुद्ध्यर्थो ज्ञानार्थः। तथोपासनार्थमित्यर्थः। अयुक्तत्वमाशङ्क्य दृष्टान्तमाह। पादवदिति। यथा भूतादीनां पादत्वज्ञानमुपासनार्थं तथेदमपीत्यर्थः ॥ ३३ ॥

ननु स एवायमित्यतिदेशेऽप्यक्षिस्थितस्य दिव्यत्वसिद्धौ धर्मातिदेशस्य वैयर्थ्यमित्याशङ्क्य, तयोक्तौ समानधर्मज्ञानं न स्यादित्यत्र हेतुमाह।

स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥

यथा, यदादित्यगतं तेज इतिवाक्यादादित्यचन्द्राग्निगततेजसामैक्ये स्थानभेदात् समानधर्मवत्त्वं नास्ति, तथा प्रकृते तयोक्तौ दिव्यत्वसिद्धावपि धर्मभेदः स्यादतो धर्मातिदेशः। आदिपदाद् यथैकस्यैव कालस्योपाधिविशेषसम्बन्धादुत्तरायणादुत्कृष्टधर्मवत्त्वं, दक्षि-

मायनाद्यपकृष्टधर्मवत्त्वं, तथेत्यपि दृष्टान्तः संगृह्यते॥ ३४॥
किञ्च।

उपपत्तेश्च॥ ३५॥

ब्रह्मणः परस्य निखिलप्रमाणविरोधादनुपपत्त्या ब्रह्मैव परमकाम्याप्पन्नं फलरूपं चेत्युपपन्नमित्यर्थः॥ ३५॥

तथाऽन्यप्रतिषेधात्॥ ३६॥

न तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुत्याऽन्यप्रतिषेधादन्यकल्पना निर्मूला। सेतुत्वादिकथनं तूक्तमेव॥ ३६॥
अथ प्रकरणमुपसंहरन् फलितार्थमाह।

अनेन सर्वगतत्वमायामशब्दादिभ्यः॥ ३७॥

अनेन ब्रह्मणोऽन्यस्य परत्वनिरासेन, आयामशब्दादिभ्यः, आकाशवत् सर्वगतश्च नित्यः, ज्यायान् दिवो ज्यायानाकाशात् तेनेदं पूर्णं पुरुषेण सर्वं, सर्वतःपाणिपादमित्यादिव्यापकत्ववाचकश्रुतिस्मृतिवाक्येभ्यः साक्षात्सर्वगतप्रतिपादकेभ्य एव सर्वगतत्वं सिद्ध्यति, नतु काणादानामिव कर्तृत्वाद्यनुपपत्त्येत्यर्थः। तस्माद् ब्रह्मणि श्रुतिरेव प्रमाणमन्यत्त्वभ्युच्चयमात्रपर्यवसन्नं, सिद्धसाधनत्वादिति भावः॥ ३७॥

एवं भगवतः सर्वोत्तमत्वनिरूपणेनोत्तमाधिकारिणां भजनीयत्वप्रयोजकं रूपमुक्त्वा फलेप्सूनां भजनप्रयोजकं फलदातृरूपं निरूपयति।

फलमत उपपत्तेः॥ ३८॥

अत ईश्वरादैहिकं पारलौकिकं वा फलं भवति। उपपत्तेः, सर्वस्य वशी सर्वस्येशान इति श्रुतौ वस्तुमात्रेशितृत्वोक्त्या तस्य फलदातृत्वोक्तेः। अन्यस्य स्वन्यदीयपदार्थदाने सामर्थ्यासम्भवान्न, दातृत्वं सम्भवतीति भावः॥ ३८॥

श्रुतत्वाच्च॥ ३९॥

स वा एष महानज आत्माऽन्नादो वसुदान इत्यादिश्रुतौ,

चकारेण, सुखं दुःखं भवो भाव इत्यारभ्य, भवन्ति भावा भूतानां मत्त एव पृथग्विधा इति स्मृतौ भगवतः सर्वफलदातृत्वं श्रूयतेऽपीत्यर्थः ॥ ३९ ॥

अत्र कर्मवादी प्रत्यवतिष्ठते ।

धर्मं जैमिनिरत एव ॥ ४० ॥

अत एव, श्रुतेर्युक्तिहेतोरुपपत्तेश्च जैमिनिः कर्मवादी धर्मं यागादिकं फलदातृत्वेन मनुते । अयं भावः । कर्मणः फलदातृपक्षेऽप्युपपत्तिश्रुती तुल्ये । एवञ्च भगवतोऽपि फलादिदाने कर्मसापेक्षत्वे असमर्थत्वम् । नैरपेक्ष्ये तु कर्मविधिवैयर्थ्यं, वैषम्यनैर्घृण्यप्रसक्तिश्च । अतः कर्मणैव फलम् । ईश्वरस्य फलदातृत्वबोधकवाक्यानि त्वर्थवादत्वेन नेयानीति प्राप्ते ॥ ४० ॥

उच्यते ।

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥

तुः पूर्वपक्षनिरासे । बादरायण आचार्य इतः पूर्वमुक्तमीश्वरमेव फलदातृत्वेन मनुते । कुतः? हेतुव्यपदेशात् । एष एव साधु कर्म कारयतीति श्रुतौ फलदानेच्छयेश्वरस्यैव कर्मकारणे हेतुत्वेन कथनात् । वैषम्यनैर्घृण्यदोषस्त्वात्मसृष्ट्या परिहरणीयः । कर्मद्वारा फलदानान्न कर्मविधिवैयर्थ्यम् । ननु स्वतः फलदानसमर्थस्येश्वरस्य फलार्थं कर्मकारणे को हेतुः, कार्यवैचित्र्यं च कथमित्याद्याशङ्का तु, कृतप्रयत्नापेक्षस्त्वितिसूत्रे निरस्ता । अतः फलार्थिभिरपि भगवानेव सेव्यो नान्य इति सिद्धम् ॥ ४१ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां तृतीयाध्यायस्य द्वितीयः पादः ॥

तृतीयाध्यायस्य तृतीयः पादः ।

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥

सर्वैर्वेदान्तैरनेकरूपनिरूपकैः प्रत्ययो ज्ञानं यस्य तादृशं ब्रह्म । कुतः । चोदना विधिवाक्यं, तस्याविशेषात् । यथा ज्योतिष्टोमे शाखाभेदेन धर्मभेदेऽपि ज्योतिष्टोमविधेरेकरूपत्वात् तदेकत्वं, तथाऽत्रापि शाखाभेदेष्वनेकशः एकमेव ब्रह्म निरूप्यते । शाखान्तरोक्तधर्माणामसति बाधे उपसंहार्यत्वात् ॥ १ ॥

भेदान्नेति चेदेकस्यामपि ॥ २ ॥

ननु धर्मभेदादेकत्वं नास्तीति चेत् तत्राह । एकस्यामपि, यथैकस्यामप्यतिरात्रव्यक्तौ षोडशिग्रहणाग्रहणरूपधर्मभेदेऽप्यतिरात्रं न भिद्यते, तथाऽत्रापि धर्मभेदो धर्मिभेदको नेत्यर्थः ॥ २ ॥

नन्वेवं सति शाखान्तरीयधर्मा उपसंहर्तव्याः स्युः । तथाऽवतारान्तरेऽवतारान्तरधर्मा अपीत्याशङ्क्याह ।

स्वाध्यायस्य तथात्वेन समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

स्वाध्यायस्य वेदस्य सम्बन्धी यः समाचारः सोमयागाद्यात्मकस्तस्मिंस्तथात्वेन स्वस्य शाखोक्तप्रकारेण नियमोऽन्यूनाधिककरणलक्षणोऽस्तीति शेषः । कुतः । तत्तच्छाखिनां स्वस्वशाखोक्तप्रकारेणैव कर्मकरणेऽधिकारात् । न्यूनाधिककरणे, यदस्य कर्मण इति दोषश्रवणाच्च । दृष्टान्तेनाप्येतत् साधयति । सववत् । यथा सवा होमविशेषा आथर्वणिकानामेव कार्यत्वेन नियम्यन्ते, नान्येषां, तथेत्यर्थः । उपासनायामपि रामकृष्णादिरूपेषु तत्तद्रूपोपासकस्य तत्तदवतारधर्मा एव भावनीया, न त्ववतारान्तरधर्मा अपि । ब्रह्मणः सर्वधर्मत्वेऽपि तदवतारे तेषां विरुद्धधर्मत्वात् ॥ ३ ॥

दर्शयति च ॥ ४ ॥

अवतारान्तरधर्माणामवतारान्तरभक्तस्य स्वोपास्ये विरोधादनुपसंहर्तव्यत्वेऽपि ब्रह्मणः सर्वधर्मवत्त्वाद् वेद्यैकत्वेन विद्यानामेकत्वं, सर्वे वेदा यत्पदमामनन्तीत्यादिना दर्शयति । चकाराद् भेददर्शननिन्दां, यदा ह्येवैष इतिश्रुत्युक्तां दर्शयतीत्यर्थः ॥ ४ ॥

ननु स्वाध्यायस्येतिसूत्रेऽवतारान्तरेऽवतारान्तरधर्माणामनुपसंहार इत्युक्तम् । श्रीरामोपनिषत्सु, यो वै ये मत्स्यकूर्माद्यवतारा इत्युक्त्वा श्रीरामे, तथा श्रीभगवति, नमस्ते रघुवर्यायेत्यादिषु श्रीकृष्णेऽवतारान्तरधर्माणामुपसंहारः कथं दृश्यत इत्याशङ्क्याह ।

उपसंहारोऽर्थाभेदाद् विधिशेषवत् समाने च ॥ ५ ॥

इदं सूत्रं योगविभागेन सामान्यविशेषोपासकपरं योज्यम् । तथाहि । नमस्ते रघुवर्यायेत्यादिषु य उपसंहारः, स त्वर्थस्य भगवल्लक्षणस्योभयत्राप्यवतारद्वयेऽपि धर्मैरभेदाच्छुद्धब्रह्मोपासकानां, तदभिन्नस्य तदभिन्नत्वमिति न्यायेन धर्माणां भेदाभावेन विरोधभानाऽसम्भवात् सर्वधर्माणामुपसंहार इत्यर्थः । च पुनरेकान्तिभक्तानां तु समानधर्मविशयं विधिशेषवत् तत्तदवतारोपासनविध्युक्तप्रकारवदविरुद्धधर्माणामुपसंहार इत्यर्थः । नतु विरुद्धधर्माणां, तेषु समानत्वाभावात् ॥ ५ ॥

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥

ननूपसंहारो धर्माणां भेदे सति भवति । तथाच भिन्नानां तेषां ब्रह्मणा भेदे स्वीकृतेऽनेकरसानां तेषामेकरसब्रह्मात्वस्वरूपत्वे ब्रह्मणोऽन्यथात्वं स्यात् । शब्दाद् एकत्वैकरसत्वनिरूपकश्रुतेर्ब्रह्मण एकरसत्वनिरूपकश्रुतेर्ब्रह्मण एकरसत्वेन निरूपणात् तद्विरुद्धमन्यथात्वमनेकरसत्वं स्यात् । ब्रह्मण एकरसत्वे चाङ्गीक्रियमाणेऽनेकरसधर्मैरभेदो न स्यादिति सूत्रार्द्धेनाशङ्क्य परिहरति । न अविशेषात् । यथैकरसत्वं ब्रह्मणः श्रुतितो निर्णीयते, तथा श्रुतित एव विरुद्धधर्मवत्त्वेन निर्णयविशेषान्न दोषः ॥ ६ ॥

प्रकारान्तरेण समाधत्ते ।

न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ७ ॥

ज्ञानप्रकरणे ज्ञानिनं प्रत्येकरसमदृश्यमग्राह्यमिति निरूपयति श्रुतिः। भक्तिप्रकरणेन भक्तियोगस्य बहुविधत्वाद् भक्तानुभवभेदेन भिन्नभिन्नप्रकारेणाथर्वणोपनिषदि निरूपयति। एवं प्रकरणभेदाद् स्वरूपस्यान्यथात्वं नास्तीत्यर्थः। तथाच ज्ञानिनः सर्वत्रैकरसत्वेन मानात् सर्वधर्माणामुपसंहारः। उत्तरतापिन्यां ज्ञानिप्रकरणे उपसंहारोक्तेः। भक्तस्य त्वनेकरसत्वेन मानात् तदसाधारणधर्माणामेवोपसंहार इति व्यवस्थितविकल्पाश्रयेण वा समाधानम्। अत्र दृष्टान्तः। परोवरीयस्त्वादिवत्। यथा परोवरीयस्त्वानामकस्तविशेषस्य दीक्षाप्रकरणे पठितत्वाद् दीक्षासहितस्यैव परोवरीयस्त्वम्। तां विनोक्तरीत्या मते तु न परोवरीयस्त्वम्। तथाऽत्रापीत्यर्थः ॥७॥

ननु ज्ञानिभक्तयोरपि ब्रह्मोपासकत्वरूपसंज्ञाया एकत्वात् तयोः प्रकरणभेद एव नास्तीति संज्ञैकत्वात् पूर्वसूत्रोक्तव्यवस्थाऽनुपपन्नेत्याशङ्क्य परिहरति।

संज्ञातश्चेत् तदुक्तमस्ति तु तदपि ॥ ८ ॥

उपास्यब्रह्मण एकत्वादुपासकस्यापि ब्रह्मोपासकत्वसंज्ञाऽविशिष्टेति सर्वधर्मोपसंहारः स्यादिति चेद्, एतच्छङ्कोत्तरं पूर्वमेवोक्तं, न वा प्रकरणभेदादिति। एकान्तभक्तस्य तत्स्वरूपैकनिष्ठत्वेन तत्र भक्त्यतिशयेनान्यधर्माणामनुपसंहारः। अनेकान्तभक्तस्य तु साधारणप्रकारेण श्रीरामादिस्वरूपेषु ब्रह्मत्वेन ज्ञानात् सर्वधर्मोपसंहारे बाधकाभाव इत्युक्तमित्यर्थः। संज्ञैकत्वेऽप्यान्तरनिष्ठाभेदादेकरूपोपासनेत्यर्थः। संज्ञैकत्वस्याप्रयोजकत्वमाह। अस्ति तु तदपि। परोवरीयस्त्वाद्युपासनेषु भिन्नेषूद्गीथोपासनेतिसंज्ञैकत्वेऽपि यथा धर्मभेदस्तथाऽत्रापीत्यर्थः ॥ ८ ॥

ननूपास्यरूपेषु बाल्यपौगण्डादिरूपा अवस्था उच्यन्ते। एवञ्च विग्रहे स्थूलाधिकाल्पान्मध्यमपरिमाणप्रसक्त्या सच्चिदानन्दत्वमनुपपन्नमित्याशङ्क्याह।

व्याप्तेश्च समञ्जसम् ॥ ९ ॥

सर्वतः पाणिपादान्तमित्यादिश्रुतेः साकारमेव व्यापकं ब्रह्म, सर्वरस इति श्रुत्या रसात्मकं च यादृग्रूपेण भक्तानां सम्यग्लीलारसानुभवो भवति तादृग्रूपं प्रकटीकृत्य विहरतीति नोक्तदोषः। तद्वस्त्वेव प्रमाणासिद्धं तादृशमिति मन्तव्यम् ॥ ९ ॥

ननु लीलाया नित्यत्वेन तत्सम्बन्धिभक्तानामपि नित्यत्वादेकस्य भक्तस्यानेकलीलासम्बन्धोऽनुपपन्नः। तथात्वे तु लीलाया अनित्यत्वं स्याद् भक्तस्य वाऽनेकत्वम्। तदुभयमपि प्रमाणविरुद्धमित्याशङ्क्याह।

सर्वाभेदादन्यत्रेमे ॥ १० ॥

लीलासम्बन्धिसर्वपदार्थानां भगवता सहाऽभेदादन्यत्राभिन्नलीलायामपि इमे एव भक्ता, न त्वन्ये। एवं लीलासम्बन्धिनां भगवद्रूपत्वात् भगवत इव व्यापकत्वेनैकस्यैव सर्वलीलासम्बन्धित्वं न विरुद्धमिति भावः। एतेन सच्चिदानन्दात्मकसर्गादिलीलाया अपि भगवल्लीलात्वेन नित्यत्वात् तत्सम्बन्धिजीवानां विसर्गलीलासम्बन्धित्वं न स्यात्। तत्सम्बन्धित्वे तु लीलाया अनित्यत्वं स्यादित्याशङ्का परिहृता। तत्रापि सर्वाभेदात् सर्गादिलीलामध्यपातिनां सर्वेषां जीवानां पदार्थानां च ब्रह्मणा सहाभेदाद् ब्रह्मणश्चैकत्वाद् व्यापकत्वाच्च पूर्वलीलातोऽन्यत्र उत्तरलीलायामपि इमे पूर्वलीलासम्बन्धिन एव पदार्था जीवाश्चेत्यर्थकथनात्। तदुक्तं निबन्धे, व्यापकत्वश्रुतिस्तस्य भगवत्वेन युज्यत इति ॥ १० ॥

ननु यथा लीलास्थितजीवानां भगवदभिन्नत्वेन व्यापकत्वमुक्तं, तथा साधकजीवानामपि ब्रह्मांशत्वेन भगवदभिन्नत्वात् पूर्णानन्दादिधर्मवत्त्वं स्यात्। न च तेषां तद्वत्त्वं वक्तुं शक्यम्। दुःखनाशार्थं भगवत्प्रार्थनदर्शनादित्याशङ्क्याह।

आनन्दादयः प्रधानस्य ॥ ११ ॥

पूर्णानन्दादयः प्रधानस्य भगवत एव धर्माः, न तु जीवस्य। भगवदभेदादेव ते धर्मा जीवे आविर्भवन्ति। साधकजीवानां तु भगवदभेदास्फूर्त्या पूर्णानन्दादिभगवद्धर्माविर्भावाभावाद् दुःखस्फूर्तिः। अतस्तन्नाशार्थं भगवत्प्रार्थनं तेषां युक्तमेव। श्रीभगवता सार्द्धं जीवा-

नामभेदप्रकारस्तु श्रीकृष्णचैतन्यमतेऽप्येवम्। तथाहि चैतन्यगुणोद्देशदीपिकायां धामपरिकरपरिच्छदभक्तशक्तिस्वरूपैः कृष्णस्य पञ्चतत्त्वात्मकत्वं निरूपितम्। सन्दर्भेऽपि, एकमेव तत्त्वं चतुर्धा विराजते स्वरूपतद्वैभवजीवप्रधानरूपेणेत्युक्तम्। अत्र वैभवशब्देन धामपरिकरपरिच्छदभक्तशक्त्यादीनां ग्रहणं ज्ञेयम्। तेषामपि तत्त्वतो व्यतिरिक्तत्वाभावात्। अतोऽनादित एव तत्तत्परिकररूपेण विराजता भगवता सार्द्धं भक्तानामभेदः। अतो यावत्पर्यन्तं साधकभक्तस्य सिद्धदेहात्मकेन भगवता सार्द्धमभेदो न स्फुरति, तावत् पूर्णानन्दस्फूर्तिः स्वस्मिन्न भवति। पूर्णानन्दादिधर्माणां भगवद्धर्मत्वात्। पूर्वोक्तप्रकारेण भगवदभेदस्फूर्तौ तु ते धर्मा जीवे स्वत आविर्भवन्ति। जीवस्य चाक्षरांशत्वादक्षरस्य गणितानन्दत्वाद् भगवदभेदस्फूर्तिं विना जीवे पूर्णानन्दास्फूर्तिर्युक्तैवेति ज्ञेयम्। सच्चिदानन्ददेहानां पूर्वसिद्धत्वं तु, अव्यक्तमूलं भुवताङ्घ्रिपेन्द्रेतिश्लोकसुबोधिन्यामुक्तम्। सन्दर्भेऽपि, वैकुण्ठेऽनादिभूता एव सच्चिदानन्दमया देहा वर्त्तन्त इत्युक्तम्॥ ११॥

नतु प्रियशिरस्त्वादिधर्माणामपि प्रधानधर्मत्वाऽविशेषात्तेषामप्युपसंहारः कर्तव्य इत्याशङ्क्याह।

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे॥ १२॥

प्रियशिरस्त्वादीनामप्राप्तिः। कुतः। प्रियमोदाद्युपचयापचयौ हि भेदे सम्भवतः। अन्तःकरणशुद्धितारतम्येन ह्यानन्दे प्रियत्वमोदत्वादयो धर्मा उपचयापचयभेदेन भासन्ते। यस्य त्वन्तःकरणशुद्धिर्जाता, तस्य तु निर्भेदमेकरसमखण्डमानन्दात्मकमेव ब्रह्म भासते। अतो न शुद्धाभेदज्ञानिनां प्रियशिरस्त्वादिधर्माणामुपसंहारः॥ १२॥

नतु निर्गुणे ब्रह्मणि सगुणधर्माणामनुपसंहारे तद्धर्माणां त्यागः स्यादित्यत आह।

इतरे त्वर्थसामान्यात्॥ १३॥

इतरे विरुद्धधर्मा भजनाधत्वमत्स्यत्वरघुवर्यत्वादयः, अर्थस्य ब्रह्मणः सामान्याद् धर्मिरूपेणोपसंहार्या, न तु धर्मरूपेण। यथा रघुवर्यादिधर्माणां धर्मिरूपत्वेन अर्थस्य सामान्यान्मत्स्यादिपूपसंहा-

रः। तथा निराकारे ब्रह्मणि साकारत्वादयः, पुरुषे शृङ्गपुच्छत्वादयो धर्मा नोपसंहार्याः, किन्तु धर्मिरूपा एव त इति बोध्याः॥ १३॥

आध्यानाय प्रयोजनाभावात्॥ १४॥

आध्यानाय हि गुणानामुपसंहारो यावता ध्यानसिद्धिस्तावतामेव गुणानामुपसंहारः। अन्येषां तु प्रयोजनाभावान्नोपसंहारः। तथा भक्तिमार्गीयाणां शुद्धान्तःकरणानामन्तःकरणशुद्धिरूपप्रयोजनस्याभावान्न पक्षपुच्छादीनामुपसंहारः। तावता परोक्षनादेगोकप्रियत्वादिनैव ध्यानसिद्धेः। एकान्तश्रीरामभक्तस्यापि श्रीरामोपासनोक्तधर्मैरेव चारितार्थ्येन न मत्स्योपासनोक्तधर्माणामुपसंहारः। कुतः। प्रयोजनाभावात्। यथा निर्गुणोपासकस्यापि स्वरूपेणैव चारितार्थ्ये न सर्वेषां गुणानामुपसंहारः॥ १४॥

आनन्दादीनां धर्मिरूपेणोपसंहारे पक्षादीनामनुपसंहारे हेत्वन्तरमप्याह।

आत्मशब्दाच्च॥ १५॥

आनन्द आत्मेत्यनेन आनन्दस्यात्मत्वेन कथनात् तेषामप्यानन्दरूपत्वादात्मस्वरूपेणैव मोदप्रमोदादीनामुपसंहारः कर्तव्यः, न तु पक्षपुच्छादिरूपेण, न चोपचयापचयरूपेण, न वा भेदेन। किन्त्वात्मरूपेणैवोपसंहर्तव्याः। अनेन निर्गुणोपासकैरानन्दादीनां धर्मत्वेनोपसंहारेऽनुपपत्तिः दर्शिता। आनन्दस्यात्मरूपत्वेन कथनाद् धर्मरूपत्वाभावात्॥ १५॥

ननु तैत्तिरीयेऽन्नमयादिष्वानन्दमयेऽपि, तस्यैष एव शारीर आत्मेत्युक्तम्। शारीराभिमानी शारीरो जीव एव। अतं, आनन्दो ब्रह्मेति व्यजानादिति ब्रह्मत्वकथनादानन्दमयस्य जीवत्वमपि न वक्तुं शक्यमत आनन्दादयोऽपि धर्मरूपा एवेति पूर्वमुक्तमानन्दस्य धर्मिरूपत्वमनुपपन्नमित्याशङ्क्याह।

आत्मगृहीतिरितरवदुत्तरात्॥ १६॥

तस्यैष एव शारीर आत्मेति यदितरवद् आत्मगृहीतिरन्नमयादिष्वात्मग्रहणं, तदुत्तरात् सर्वस्य उत्तर आनन्दमयस्तस्मादं-

तो: । तथाचान्नमयादिष्वप्यानन्दमयस्यात्मत्वेन कथनात् तत्प्रकारेणानन्दमयेऽपि, तस्यैव एव शारीर आत्मेतिकथनादानन्दमयस्य परमकाष्ठापन्नत्वेन ततोऽतिरिक्तब्रह्मणोऽभावान्न जीवत्वमित्यर्थः ॥१६॥

अन्वयादिति चेत् स्यादवधारणात् ॥ १७ ॥

नन्वन्नमयादिष्वन्योऽन्तर आत्मेतिकथनात् प्रत्येकं भिन्नेष्वन्नमयादिषु शारीर आत्मा जीवः शरीराभिमानी भिन्नो भिन्न उच्यते । आनन्दमये तु या तथोक्तिः सा तु तस्यान्वयाद् व्यापकत्वेन सर्वत्रान्वयात् सम्बन्धान्न तु जीवत्वेनेति सूत्रार्द्धेनाशङ्का परिहरति । स्यात् । आनन्दमय एवान्नमयादिशरीराभिमानी स्यान्न तु भिन्नो जीवः । कुतः । एव इत्येवकारेण तस्यैवात्मत्वेनावधारणान्निर्द्धारणादित्यर्थः ॥ १७ ॥

ननु तैत्तिरीयोपनिषत्सु, तस्माद्वा एतस्मादित्याकाशादिमहाभूतसृष्टिमुक्त्वाऽग्रे, ओषधीभ्योऽन्नम् अन्नात् पुरुषः स वा एष पुरुषोऽन्नरसमय इत्युक्तम्, भार्गव्यां विद्यायामपि, अन्नं ब्रह्मेति व्यजानादित्युक्तम् । तत्र, स वा एष पुरुष इत्यत्र, स एवेति प्रत्यभिज्ञानादन्नकार्यात्मक एव पुरुषः प्रतीयते । अग्रे तस्य ब्रह्मत्वेन ज्ञानकथनं तूपासनार्थमित्याशङ्क्याह ।

कार्याख्यानादपूर्वम् ॥ १८ ॥

अन्नकार्यभौतिकपुरुषस्याख्यानात् कथनाद् ब्रह्मत्वेन ज्ञानविषयं, स वा एष इत्यनेन प्रतिपाद्यमपूर्वं तदपेक्षाध्यात्मिकरूपं वदति श्रुतिरित्यर्थः । आध्यात्मिकपुरुषरूपनिरूपणात्, स वा एष इति न प्रत्यभिज्ञानम् । आधिभौतिकाध्यात्मिकभेदस्य स्पष्टत्वादित्यर्थः ॥

अथवा, बृहदारण्यके, आत्मेत्येवोपासीतेत्युपक्रम्य तस्य सर्वेभ्यः प्रियत्वमुक्त्वाऽग्रेऽन्यस्य प्रियत्वं निराकृत्य, ईश्वरो हि तथा स्याद् आत्मानमेव प्रियमुपासीतेति पठितम् । अत्रात्मपदेन जीवात्मनः प्रियत्वेनोपासनं विधीयते, उत ब्रह्मणः, ईश्वरपदादिति संशये, यथा श्रुत्यन्तरे पुत्रादीनामौपाधिकप्रियत्वकथनाज्जीवात्मन एव प्रियत्वमुच्यते तथेहापि प्रतीतेर्जीवात्मन एव प्रियत्वेनोपासनो-

केति प्राप्ते, उच्यते । कार्याख्यानादिति । प्राणमेव प्राणो भवतीत्या-दिपूर्वश्रुतावेकस्यैवात्मनः सर्वेन्द्रियकार्यैः कृत्वा आख्यानादपूर्वं जीवभिन्नमीश्वरमेव श्रुतिर्वदतीत्यर्थः । अत एवात्रेश्वरो हीत्यत्रेश्वरपदं सर्वस्मादन्तरमिति चोक्तम् ॥ १८ ॥

ननु भगवद्विग्रहे चक्षुरादीनां वैलक्षण्येन प्रतीतेरात्मनश्चैकरसत्वात् सर्वेन्द्रियकार्यकर्तृत्वं ब्रह्मणि न सम्भवतीत्याशङ्क्याह ।

समान एवञ्चाभेदात् ॥ १९ ॥

अप्यर्थे चः । एवमपि सति चक्षुःश्रोत्रादीनां वैलक्षण्येन भानेऽपि समान एकरूप एव भगवान् । कुतः । चक्षुरादीनां ब्रह्मत्वेन परस्परमभेदादित्यर्थः । तथाचानन्द एव ब्रह्मण्याकारसमर्पकस्तथा तथा भातीति न वैजात्यशङ्केति भावः ॥ १९ ॥

अथ यत्र कार्यार्थे जीवविशेषे भगवदावेशस्तद्भगवदाविष्टजीवोपासकेन सकलभगवद्धर्माणां तत्रोपसंहारः कर्तव्यो न वेत्याशङ्क्य सूत्रद्वयेन विकल्पमेव स्थापयति ।

सम्बन्धादेवमन्यत्रापि ॥ २० ॥

अन्यत्रापि भगवदाविष्टजीवेऽपि, एवं सकलब्रह्मधर्मोपसंहारेणोपासनं कार्यम् । कुतः । अयोगोलके वह्नेरिव तस्मिन् भगवदावेशलक्षणसम्बन्धादित्यर्थः ॥ २० ॥

निषेधपक्षमुपपादयति ।

न वाऽविशेषात् ॥ २१ ॥

यस्तु भगवदाविष्टं भक्तं ज्ञात्वैतद्भजनेनैवाहं कृतार्थः स्यामिति ज्ञात्वा तं भक्तं भजते, तस्य तद्भक्तभजनमेव परमपुरुषार्थसाधकमिति तत्र भगवद्धर्मोपसंहारे विशेषाऽभावात् स न कार्यः ॥ २१ ॥

दर्शयति च ॥ २२ ॥

उपसंहारो नाम तत्रानुपलभ्यमानानां धर्माणां तत्र भावनम् । तादृशभक्तेषु तु भगवान् सर्वधर्मान् प्रत्यक्षतो दर्शयतीति तद्भक्तानां नोपसंहारापेक्षेत्यर्थः ॥ २२ ॥

ननु तादृशभक्तेऽलौकिकभगवद्धर्मान् ऐश्वर्यादीन् दृष्ट्वा तद्भक्तैः स्वसेव्ये द्युलोकव्याप्त्यादयो धर्मा उपसंहर्तव्याः स्युरित्याशङ्क्य, नेत्याह।

सम्भृतिद्युव्याप्त्यपि चातः ॥ २३ ॥

सकलवीर्यसम्भृतिद्युव्याप्त्यादयोऽपि धर्मा नोपसंहर्तव्याः। अतः पूर्वोक्तविशेषाभावरूपहेतोरित्यर्थः ॥ २३ ॥

ननु तैत्तिरीयोपनिषत्सु, सहस्रशीर्षा पुरुष इत्यादिना पुरुषविद्या निरूप्यते। ब्रह्मप्रपाठकेऽपि, स वा एष पुरुषोऽन्नरसमय इत्यारभ्य, प्राणमयादय आनन्दमयान्ता निरूप्यन्ते। तेषु पुरुषविधत्वं चोच्यते। एवं चान्नमयादिषु पुरुषविधत्वश्रवणात् तेष्वपि सहस्रशीर्षवत्त्वाद्युपसंहारः कर्तव्य एवेत्याशङ्क्याह।

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥

पुरुषविद्यायां सहस्रशीर्षा इत्यत्र यथाऽनेकोपलक्षकसहस्रपदेन साकारव्यापकाधिदैविकब्रह्मस्वरूपं निरूप्यते, न तथा इतरेषाम् अन्नमयादीनां भौतिकानां पुरुषविधस्याध्यात्मिकस्य चाम्नानं निरूपणम्। तस्मात् तेषु सहस्रशीर्षवत्त्वाद्युपसंहारो न कर्तव्य इत्यर्थः ॥ २४ ॥

अतः परं भगवतो निर्दोषत्वं ज्ञात्वा भजनं कर्तव्यमिति ज्ञापनार्थमधिकरणान्तरमारभते।

वेधाद्यर्थभेदात् ॥ २५ ॥

बृहदारण्यके छान्दोग्ये च देवानां दैत्यपराजयार्थे यज्ञे वागादिषूद्गानसमये दैत्यैः कृतः पापवेध उक्तः। आसन्ये दैत्यैः क्रियमाणोऽपि पापवेधो नाभूदित्युक्तम्। तत्र को हेतुरित्याकाङ्क्षायामुच्यते। वागादिषु यः पापवेध, आदिपदाद् दैत्यैः पराजयश्चोक्त, सोऽर्थस्य भगवल्लक्षणस्य भेदात् सम्बन्धाभावादित्यर्थः। आसन्यस्य तु नित्यं भगवत्सम्बद्धत्वान्न दोषसम्बन्धः। एवञ्च यत्सम्बन्धाद्दोषसम्बन्धाभावोऽन्यस्य तस्य निर्दोषत्वे किं वाच्यमित्यर्थः ॥ २५ ॥

भगवत्सम्बन्धाभावे गुणहानिमप्याह।

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत् तदुक्तम् ॥ २६ ॥

हानौ जीवस्य भगवत्सकाशाद् विभागे ये जीवनिष्ठा धर्मास्तिरोहिता भगवदिच्छयाऽऽनन्दांशैश्वर्यादयस्ते भगवत्सम्बन्धे सति पुनराविर्भूता भवन्तीति, परमं साम्यमुपैतीतिश्रुतेरित्यर्थः । न तु सर्वथा सर्वभगवद्धर्मवत्त्वम् । ननु तैरेव धर्मैः साम्य, नान्यैरत्र किं नियामकमित्याशङ्क्याह । उपायनशब्दशेषत्वात् । उपायनं प्राप्तिः सा स्वधर्माणामेव नान्येषाम् । तथाचोपायनशब्देन कथनात् तैरेव धर्मैः साम्यमित्यर्थः । नन्वानन्दादिभि साम्ये ब्रह्मऽभेद एव स्यादित्याशङ्क्याह । कुशेत्यादि । कुशा औदुम्बर्यः समिधस्तत्सम्बन्धि यच्छन्दःस्तुत्युपगानं तद्वत् । तद्गानसम्बन्धिन्यभित्वा शूर नोनुम इत्यृचि, अच एवोपसंहृत्य भकारेण गानं क्रियते । नैतावता भकाराणाम् ऋगात्मकत्वं सम्भवति । तथात्रापीत्यर्थः । ननु तत्त्वमस्यादिवाक्यैर्जीवेऽभेदबोधनादत्राभेदोऽस्त्वित्याशङ्क्याह । तदुक्तम् । अभेदबोधनतात्पर्यं पूर्वमुक्तमित्यर्थः ॥ २६ ॥

सम्पराये तर्तव्याभावात् तथा ह्यन्ये ॥ २७ ॥

सम्यक् परस्य पुरुषोत्तमस्याऽऽयो लाभं येन स सम्परायो भक्तिमार्गस्तस्मिन् प्राप्तव्ये सति तर्तव्यस्य पापस्याभावाज्ज्ञानेनैव, भक्त्या न पापनाशः, नराणां क्षीणपापानामितिवाक्यात् पूर्वमेव पापानां नष्टत्वात् । ननु सर्वं पाप्मानं तरन्तीतिश्रुत्या भक्त्या पापनाशः कुतो नाङ्गीक्रियते, तत्राह । तथा ह्यन्ये । तस्याः श्रुतेर्ज्ञानमार्गीयविषयत्वाज्ज्ञानानन्तरं पापवन्तो भक्तिमार्गीयेभ्योऽन्य इत्यर्थः । ननु भक्तः पापनाशकत्वबोधकानां, केचित् केवलया भक्त्याऽघं धुन्वन्तीत्यादिवचनानां का गतिरिति चेत् । तत्र, यथा हि भानोदयो नृचक्षुषामित्युक्तरीत्या यथा सूर्येण स्वोदयात् पूर्वमेव तमो नाश्यते, न तु स्वोदयानन्तरमितिसूचनान्न दोषः ॥ २७ ॥

ननु तर्हि भरतस्य भक्त्युत्तरं मृगदेहारम्भकपापस्थित्यसम्भव इत्याशङ्क्याह ।

छन्दत उभयाविरोधात् ॥ २८ ॥

छन्दतो भक्तिमार्गे भगवतो विशिष्टफलदानेच्छातो वा भक्तेरनन्तरमपि पापनाशो भवति। नराणां क्षीणपापानामित्यादीनां, भरतस्य मृगदेहारम्भकप्रारब्धकर्मसत्त्वबोधकवचनानां चाविरोधादेवं ज्ञातव्यमित्यर्थः ॥ २८ ॥

गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥ २९ ॥

गतेर्ज्ञानस्यार्थवत्त्वं फलजनकत्वमुभयथा मर्यादापुष्टिभेदेन। अन्यथा एवमनङ्गीकारे, ज्ञानेनैव हि कैवल्यं, यमेवैष वृणुत इति वाक्ययोर्विरोधः स्यात् ॥ २९ ॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥

मुमुक्षोः सकाशाद् रहस्यभजनकर्तैवोपपन्न उपपत्तियुक्तः। कुतः। भगवल्लक्षणस्यार्थस्य पुरुषार्थस्य स्वाधीनत्वेनोपलब्धेः। अत्र दृष्टान्तः। लोकवत्। लोके यथा स्वाधीनपतिका भर्तारं स्वाधीनं फलत्वेन मनुते, न तु गृहवित्तादिकं तथेत्यर्थः ॥ ३० ॥

अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥३१॥

भगवतो धारणरसनभजनध्यानादीनां समुदितानामेव फलसाधकत्वमित्यनियमः। यतः सर्वासां धारणादिभक्तीनां फलं प्रत्यविरोधः, समुदितानामेव फलसाधकत्वं, न प्रत्येकमेवंलक्षणो विरोधो नास्ति। कुतः। शब्दानुमानाभ्याम्। चिन्तयंश्चेतसा कृष्णमिति श्रुतेः, केवलेन हि भावेनेतिस्मृतेश्चेत्यर्थः ॥ ३१ ॥

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥

यस्मिन्नंशे कार्यविशेषसाधनार्थं भगवता ये स्वकीयधर्माः स्थापितास्ते आधिकारिका उच्यन्ते। तेषां स्थितिर्यावदधिकारं यावत्कार्यम्। तस्मिन् कार्ये सम्पन्ने तान् धर्मान् भगवानाकर्षतीत्यर्थः। न तु यावत् तेषां जीवनं तावत् स्थापयति। तेषां कृतार्थता तु भक्त्यैवेति भावः ॥ ३२ ॥

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्या-मौपसदवत् तदुक्तम् ॥ ३३ ॥

अक्षरविषयकज्ञानानां मोक्षसाधनेषु योऽवरोधो गणना सा सामान्यतद्भावाभ्यां भवति । अत्र मुख्या मुक्तिः पुरुषोत्तमप्राप्तिरेव । ज्ञानिनां तु साक्षात् पुरुषोत्तमसम्बन्धाभावात् तत्सम्बन्ध्यक्षरसम्बन्धरूपा सामान्यमुक्तिर्भवति । सम्बन्धोऽत्राभेदसम्बन्धो बोध्यः । अत्राऽक्षरज्ञानस्य साक्षात् साधनत्वम् । भक्तानां तु ब्रह्मभावोत्तरं भगवद्भावेन पुरुषोत्तमप्राप्तिरूपा मुख्या मुक्तिः । अत्राऽक्षरज्ञानस्य परम्परासाधनत्वम् । अक्षरज्ञानेन ब्रह्मभावोत्तरं भगवद्भावात् । एवं मोक्षद्वयेऽप्यक्षरविषयकधियां सामान्यतद्भावाभ्यां साधनत्वमित्यर्थः । अक्षरब्रह्मपुरुषोत्तमयोर्ब्रह्मस्वरूपेण सामान्यम् । तन्वक्षरज्ञानत्वतामपि केषां चित् तत्रैव लयः, केषां चिद् भक्तिभावो भवतीत्यत्र किं नियामकं तत्राह दृष्टान्तेन । औपसदवत् । उपसदाख्ये कर्माणि यजमानः सर्वेष्वृत्विक्षु यं कामयेत, यज्ञयशसमृच्छेत् तं प्रथमं तानूनप्त्राख्यमाज्यं स्पर्शयेत् । तत्र यथा यजमानेच्छा नियामिका तथाऽत्र भगवदिच्छेत्यर्थः । ननु भगवत्सम्बन्धिश्रवणादीनां यथा भगवत्प्रापकत्वं, तथाऽक्षरज्ञानस्य कुतो नेत्याशङ्क्याह । तदुक्तम् । गीतासु, यदक्षरं वेदविदो वदन्तीत्युपक्रम्य, स याति परमां गतिमित्यन्तेनाक्षरज्ञानेन तस्यैव प्राप्तिर्नतु भगवत इत्युक्तम् ॥ ३३ ॥

इयदामननात् ॥ ३४ ॥

तैत्तिरीयोपनिषत्सु, आनन्दगणने अक्षरानन्द इयद् गणितत्वादेव इत्यामननात् कथनात् । अत्रानन्दतारतम्यकथनमानन्दानुभवयोग्यलयपूर्वदशापेक्षया । अग्रे ब्रह्मणि लये तु मोक्तुरभावात् तत्र निर्धर्मके ब्रह्मणि संख्याद्यभावाच्च नानन्दतारतम्यं सम्भवति । पूर्णपुरुषोत्तमस्यागणितानन्दत्वेन तदपेक्षयोत्कर्षनिरूपणं त्वाचिन्त्यशक्त्यायमेयम् ॥ ३४ ॥

अथ ज्ञानमार्गीयाणां यथा आत्मत्वेन निर्विशेषब्रह्मज्ञानं भव-

ति, तथा भक्तिमार्गीयस्यापि ज्ञानिवत् स्वात्मत्वेन पुरुषोत्तमज्ञानं भविष्यतीत्याशङ्क्य निषेधति।

अन्तरा भूतग्रामवत् स्वात्मनः ॥ ३५ ॥

भगवता भक्तिमार्गे स्वीयत्वेनाङ्गीकृतो य आत्मा स स्वात्मा, तस्य स्वात्मत्वेन पुरुषोत्तमज्ञानम् अन्तरा भजनेऽन्तरायरूपमिति भगवांस्तन्न सम्पादयतीत्यर्थः। एतद् दृष्टान्तेन साधयति। भूतग्रामवत्। तादृशभक्तविग्रहस्यालौकिकत्वाद् यथा तेषु लौकिको भूतग्रामो न सम्भवति तथेदं ज्ञानमपि ॥ ३५ ॥

अन्यथाऽभेदाऽनुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥ ३६ ॥

अन्यथा तादृशज्ञानस्य बाधकत्वे, एकादशस्कन्धे भक्तेषूद्धवादिष्वभेदज्ञानेनोपदेशानुपपत्तिरिति चेन्न। उपदेशान्तरवत्। यथा गायत्र्युपदेशेन संस्कृतं ब्राह्मणशरीरं वैदिककर्मोपयोगि भवति तथा ज्ञानोपदेशसंस्कृतो भक्तो भक्तिरसानुभवयोग्यो भवति। तदर्थमुपदेशो, नत्वभेदज्ञानार्थमित्यर्थः। ज्ञानिनां भक्तानां च लौकिकभावः सर्वथा निवर्तनीयः। तन्निवृत्तिं विनोभयोरपि फलप्राप्त्यसम्भवात्। तन्निवृत्तिस्तु ज्ञानेनैव भवति। यथा केवलसुवर्णार्थिनः सुवर्णेन कटककुण्डलार्थिनश्च सुवर्णपिण्डे धात्वन्तरभ्रमो निवर्तनीयस्तथाऽक्षरे लयप्रेप्सूनां ज्ञानिनां भगवल्लीलानुभवयोग्यानां भक्तानां च लौकिकभावो निवर्तनीयः। तन्निवृत्तिश्च ज्ञानेनैव भवतीति ज्ञानोपदेशोपयोगः ॥ ३६ ॥

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३७ ॥

भक्ता, अहं कृष्णः कृष्णोऽहमिति यद्विशिंषन्ति स व्यतिहारः। सोऽपीतरवज्ज्ञेयः। विप्रयोगोद्रेके यथाऽश्रुप्रलापादयो व्यभिचारिभावास्तथा व्यतिहारोऽपि। नैतावताऽभेदज्ञानस्य भक्तिफलत्वमित्यर्थः ॥ ३७ ॥

सैव हि सत्यादयः ॥ ३८ ॥

भक्तानां सत्यधर्मदमादिरूपा भक्तिरेवेति तस्य ज्ञानमार्गीय सत्यादिसाधनानि स्वत एव भवन्तीति न तदर्थं पृथक्प्रयत्नापेक्षेत्यर्थः ॥ ३८ ॥

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥

इतरत्र विहितभक्तेरन्यत्र कामाद्यौपाधिकभगवद्भावे कामाद्येव मुक्तिसाधनम् । किञ्चान्यमार्गे हेयत्वेनोक्तेभ्य आयतनादिभ्यो गेहादिभ्यस्तत्र मुक्तिर्भवति । भगवत्सेवासाधनत्वात् ॥ ३९ ॥

आदरादलोपः ॥ ४० ॥

वर्णाश्रमधर्माणां भगवद्धर्माणां च युगपत् करणे प्रसक्ते भगवद्धर्मेष्वादरश्रवणात् कर्मभिस्तेषामलोपः ॥ ४० ॥

उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥

कर्मभगवद्धर्मयोर्युगपत्करणे उपस्थिते, अत आदरादेतोस्तद्वचनाद् भगवद्धर्माणामलोपवचनाद् भगवद्धर्माणां कर्माङ्गत्वमेत्यर्थः ॥ ४१ ॥

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम् ॥ ४२ ॥

मम कर्मकरणेऽकरणे वा भगवदिच्छास्तीति निर्धारणाऽनियम आधुनिकानामतस्तैर्निष्कामतया कर्तव्यमेव । तद्दृष्टेः तस्या भगवदिच्छाया दृष्टिर्ज्ञानं यस्याऽम्बरीषोद्धवयुधिष्ठिरादेस्तस्य पृथग् जीवकृतकर्मफलाद्भिन्नमीश्वरकृतकर्मणो यत्फलं सन्मार्गरक्षालोकसंग्रहादिकं तदेव फलं, न तु स्वर्गादिकम् । पूर्वोक्तनिष्कामकर्तुस्तु अप्रतिबन्धः कर्मजप्रतिबन्धाभावः फलमित्यर्थः ॥ ४२ ॥

प्रदानवदेव तदुक्तम् ॥ ४३ ॥

तस्मात् स्वमुक्त्योत्कृष्टेत्यनेन भगवतोद्धवं प्रति सर्वाङ्गभावोपदेशः, स प्रदानवत् प्रकर्षेण दानमेव फलम् । न तु साधनसाध्यः सः । तदुक्तं, नायमात्मा प्रवचनेन लभ्य इतिश्रुत्या ॥ ४३ ॥

लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि ॥ ४४ ॥

वरणस्य लिङ्गं सर्वात्मभावस्तस्य भूयस्त्वात् सर्वतोऽधिकत्वात् तद्वरणमेव सर्वतः कालकर्मादिभ्यो बलीयः । तस्य प्रतिबन्धकं किमपि न भवतीत्यर्थः । ननु ज्ञानमार्गीयज्ञानेन प्रतिबन्धः स्यादित्याशङ्क्याह । तदपि । उक्तमिति शेष, अन्तरा भूतग्रामवत् स्वात्मन इतिसूत्रेण ॥ ४४ ॥

अथ सूत्रद्वयेन पूर्वपक्षमाह ।

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ ४५ ॥

छान्दोग्ये सनत्कुमारनारदसंवादे, यत्र नान्यत् पश्यतीत्यादिना वरणलिङ्गभूयस्त्व नोच्यते, किन्तु पूर्वविकल्पः स्यात् । पूर्वप्रपाठकोक्तद्वैनकेतुपाख्यानज्ञानस्यैव प्रकारभेदो निरूप्यते । आत्मप्रकरणादुभयोः प्रपाठकयोः । अत्र दृष्टान्त. । क्रियामानसवत् । बाह्या पूजा क्रियेत्युच्यते । आन्तरी मानसमित्युच्यते । परन्तु प्रकरणभेदात् पूजात्वाविशेष. । एवं प्रकारभेदेऽपि ज्ञानत्वाविशेष इत्यर्थः ॥ ४५ ॥

अतिदेशाच्च ॥ ४६ ॥

नामैवैतन्नामोपास्वेत्यृगादिविधा अनूद्य नामब्रह्मातिदेशादपि ज्ञानप्रकारविशेष एवायमिति प्राप्ते ॥ ४६ ॥

सिद्धान्तमाह ।

विद्यैव तु निर्द्धारणात् ॥ ४७ ॥

तु. पूर्वपक्षव्यावर्तकः । अत्र विद्यैव सर्वात्मभाव एव निरूप्यते । भूमैव सुखं, भूमा त्वेव विजिज्ञासितव्य इत्यानन्दात्मकपुरुषोत्तमस्यैव जिज्ञास्यत्वेन निर्द्धारणादित्यर्थः ॥ ४७ ॥

दर्शनाच्च ॥ ४८ ॥

दृश्यते च सर्वात्मभाववतां व्रजभक्तानां पूर्वं सर्वविस्मृतिभे-

गवास्पर्शादिनाग्रे सर्वसामर्थ्यम् । तदुक्तं ताभिरेव, चित्तं सुखेन भवताऽपहृतं गृहेष्वित्यादि । अत्रापि, तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण इतिश्रुतिवर्णनात् सर्वात्मभाव एवोक्त इतिभावः ॥ ४८ ॥

ननु तरति शोकमात्मविदित्युपक्रमाज्ज्ञानमेवात्र प्रतिपाद्यं, न सर्वात्मभाव इत्याशङ्क्याह ।

श्रुत्यादिबलीयस्त्वाच्च न बाधा ॥ ४९ ॥

एवमुपक्रमगतात्मवाक्यानुरोधात् सर्वात्मभावलिङ्गभूयस्त्वस्य न बाधा, वाक्यापेक्षया श्रुतिलिङ्गयोर्बलीयस्त्वात् । अतः श्रुतिलिङ्गानुरोधात् सर्वात्मभाव एवात्र प्रतिपाद्यो, न ज्ञानम् ॥ ४९ ॥

ननु स्वे महिम्नि प्रतिष्ठित इतिश्रुत्या न सर्वात्मभाव उच्यते, किन्तु ब्रह्मणः स्वाधारत्वमेव युक्तमिति प्रतिपाद्यत इत्याशङ्क्याह ।

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम् ॥ ५० ॥

भूमा कुत्र प्रतिष्ठित इतिप्रश्ने, स्वे महिम्नीत्युत्तरमुक्त्वा, स वा एष एवं पश्यन्नित्यनेन तच्छब्दस्य पूर्वपरामर्शित्वाद् भूमाधिकरणसर्वात्मभावादिभ्यो हेतुभ्यः सर्वात्मभाव एवात्र प्रतिपाद्यो, न ब्रह्मणः स्वाधारत्वमित्यर्थः । अन्यथा कुत्र प्रतिष्ठित इति प्रश्ने, न क्वापीत्येव वदेत् । ननु सर्वात्मभावस्यापि फलं मुक्तिरेवेत्याशङ्क्याह । प्रज्ञान्तरपृथक्त्ववत् । सर्वात्मभाववद्भक्तप्रज्ञातो भिन्ना प्रज्ञान्तरं मुमुक्षुभक्तस्य स्वकृतार्थताविषयकं ज्ञानम् । तस्य यथा पृथक्त्वं पृथक्फलसाधकत्वं कर्मज्ञानादिफलेभ्यः पार्थक्येन मोक्षसाधकत्वं, तथा सर्वात्मभाववद्भक्तप्रज्ञाया भगवल्लीलासाधकत्वं, न तु स्वकामनासाधकत्वम् । अतः सर्वात्मभावस्य भगवल्लीलासाधकत्वं, न तु मोक्षसाधकत्वम् । अत्र व्यासः स्वानुभवमेव प्रमाणयति । दृष्टश्च । एतादृशभक्तस्य स्वरूपानुभवातिरिक्तफलाभावोऽस्माभिरेव व्रजभक्तादौ दृष्टः । अत्र शब्दोऽपि प्रमाणमित्याह । तदुक्तम् । अहं भक्तपराधीन इत्यारभ्य, वशे कुर्वन्ति मां भक्त्येति भगवतोक्तमित्यर्थः ॥ ५० ॥

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥५१॥

ननु सर्वात्मभावनिरूपकसनत्कुमारनारदसंवादप्रपाठके तस्य सर्वेषु लोकेषु कामचारो भवतीत्युक्त्या सर्वात्मभाववद्भक्तस्याप्यन्यकामना दृश्यत इत्याशङ्क्याह । न । तर्हि कथमेवमुक्तं तत्राह । सामान्यादप्युपलब्धेः । तत्समानधर्मसम्बन्धादपि श्रुतौ तत्प्रयोग उपलभ्यते बहुशः । प्रकृतेऽपि विविधसुखप्रधानाल्लोकानां भगवत्सम्बन्धिसर्वसुखेषु कामचारो भवतीत्यभिप्रायेण तथोच्यते । ननु यथाश्रुतार्थः किमर्थं त्यज्यत इत्याशङ्क्याह । मृत्युवन्न हि लोकापत्तिः। यथा, न पश्यो मृत्युं पश्यतीति तादृशभाववतो मृत्युनिषेधः क्रियते तथा भगवत्स्वरूपातिरिक्तलोकान्तरसम्बन्धोऽपि न सम्भवतीत्यर्थः ॥ ५१ ॥

अत्र हेत्वन्तरमाह ।

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥५२॥

शब्दस्य आत्मन एवेदꣳ सर्वमितिपूर्वोक्तश्रुतिवाक्यस्य, परेण, सर्वमाप्नोति सर्वश इति वाक्येन ताद्विध्यम् एकरूपत्वमस्तीति, न लोकान्तरसम्बन्धो वक्तुं शक्य इत्यर्थः । नन्वात्मन एवेदꣳ सर्वमित्युक्तमेव, पुनः सर्वमाप्नोतीति किमर्थमुक्तं, तत्र हेतुमाह । तुः शङ्कानिरासे । हेतूनां बाहुल्ये दार्ढ्यं भवतीति पुनरनुबन्धः कृत इत्यर्थः ॥ ५२ ॥

एक आत्मनः शरीरे भावात् ॥ ५३ ॥

अत एवैके शाखिन आत्मनो भगवतो भक्तशरीरे भावाद्आविर्भावात् तेन सह कामोपभोगनिरूपिकां, सोऽश्नुते सर्वान् कामानितिश्रुतिं पठन्तीत्यर्थः ॥ ५३ ॥

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥

ज्ञानिनां हृदये परमव्योमाविर्भावस्य व्यतिरेकः । कुतः ? तद्भावाभावित्वात् । वरणाभावेन भगवद्भावस्याभावात् । ननु भगवतो ज्ञानविषयत्ववदाविर्भावोऽप्यस्तु तत्राह । न तूपलब्धिवत् ।

उपलब्धिदर्शने यथा साधनसाध्यं, तद्वद् भगवद्वरणं विना हृदये परमव्योमाविर्भावाभावेन भगवदाविर्भावो न भवतीत्यर्थः । तस्य साधनान्तरासाध्यत्वात् ॥ ५४ ॥

तत्र निदर्शनमाह ।

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥

हि यतः प्रतिवेदम् अङ्गावबद्धा ऋत्विजो होत्रौद्गात्राद्रिप्रतिवेदनियतकर्मकरणार्थमवबद्धा वृता यजमानेन ते यथा सर्वशाखीयकर्मकरणसमर्था अपि तत्राधिकाराभावात् सर्वशाखासु न प्रभवन्ति, तथात्र भगवतस्तादृशवरणाभावाज्ज्ञानिनां हृदि परमव्योमाविर्भावो न भवतीत्यर्थः ॥ ५५ ॥

ननु केषांचित् कर्मज्ञाननिष्ठानामपि कृपया भक्तिमार्गे वरणं दृश्यत इति श्रुतिविरुद्धदृष्टान्तवैषम्यमित्याशङ्क्याह ।

मन्त्रादिवद्वाऽविरोधः ॥ ५६ ॥

यथैक एव कश्चिन्मन्त्रोऽनेककर्मसु विनियुज्यते, कश्चिद् द्वयोः, कश्चिदेकत्रैव, तथा शास्त्रे विधानात् । एवं भगवदिच्छया जीवोऽपि कश्चित् कर्मनिष्ठां प्राप्य वरणेन भक्तिनिष्ठां प्राप्नोति, कश्चित्तु ज्ञाननिष्ठामेव प्राप्य, कश्चित्तु प्रथमत एव भक्तौ व्रियत इति विरोधो नेत्यर्थः ॥५६॥

ननु लिङ्गभूयस्त्वादितिसूत्रे सर्वात्मभावस्य सर्वतोऽधिकत्वं यन्निरूपितं, तन्नोपपद्यते । सर्वात्मभावबद्भक्ते यथा सर्वत्र भगवद्भाव उक्तस्तथा लौकिकनायकस्यापि, सा सा सा सा जगति सकल इत्यादिषु सर्वत्र नायिकाभानदर्शनादतो लौकिकरसतुल्यत्वादस्य सर्वोत्कृष्टत्वमित्याशङ्क्याह ।

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥५७॥

भूम्नः सर्वात्मभावस्य ज्यायस्त्वं सर्वोत्कृष्टत्वं ज्ञेयम् । नचोक्तं लौकिकरसतुल्यत्वं दोषः । क्रतुवदिति । यथा दर्शपूर्णमासादियागेषु दोहनाभिश्रयणादिकर्मणां लौकिककर्मतौल्येऽपि न लौकिकत्वम् अलौकिकप्रमाणैकसमधिगम्यत्वात । तथास्यापि भावस्य तथात्वं ज्ञेयम् । तत्रोपपत्तिमाह । तथाहीत्यादि । तथाहि, श्रा·

त्मनः प्राण इत्यादिश्रुतिः सर्वात्मभाववतः सर्वं भगवत एवेति ब्रूते इति दर्शयति । लौकिकनायकप्राणानां तु तत्त्वजन्यत्वान्न सर्वात्मभाववद्भक्तप्राणादितौल्यम् । अतोऽस्य सर्वतो ज्यायस्त्वे कोऽपि दोषो न शङ्क्यः । इदं भक्त्यादीनामप्युपलक्षणम् । तेषामपि प्रतीत्या लौकिकक्रियारूपत्वेऽपि भगवद्विषयत्वादलौकिकप्रमाणबोधितत्वाच्चालौकिकत्वमेवेति ज्ञेयम् ॥ ५७ ॥

एवं सर्वात्मभावस्वरूपं विचार्य प्रकान्त उपासनानिर्णय उपसंहारे निरूपयति ।

नाना शब्दादिभेदात् ॥ ५८ ॥

सर्वेषु श्रीरामाद्यवतारेषु नानैवोपासना कार्या, न तु सर्वावतारविशिष्टस्यैकस्य ब्रह्मणः । तत्तत्स्वरूपसम्बन्धिशब्दानां मन्त्राणां विधायकशब्दानाम् आदिपदादाकारचरित्राणां च भेदादित्यर्थः ॥ ५८ ॥

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥

पार्थक्येन कर्तव्यानामुपासनानां विकल्पो, न त्वग्निहोत्रदर्शपूर्णमासादिवत् समुच्चयः । कुतः । अविशिष्टफलत्वात् । एकोपासनेनैव मोक्षात्मकफलसिद्धावन्योपासनस्याविशिष्टफलत्वात् । तेनापि मोक्षस्यैव सिद्धेः ॥ ५९ ॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥

यास्तु काम्योपासना भिन्नभिन्नफलिकास्ता यथाकामं समुच्चीयेरन् । यस्य यत्फलकामना तेन तावदुपासना कर्तव्या । पूर्वहेतोरविशिष्टफलत्वस्याभावात् फलगतविशेषस्य विद्यमानत्वात् । यत्र पुनरेकोपासनस्यैव स्वकामितानेकफलसाधकत्वं तत्र तेनैव कार्यसिद्धौ, न वा उपासनानां समुच्चयो नास्तीत्यर्थः ॥ ६० ॥

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥

एकफलसाधकानामुपासनानां भिन्नभिन्नस्थलेष्वाम्नातानां भिन्नाङ्गयुक्तानामङ्गेषु यथाश्रयभाव, यदङ्गं यत्राम्नातं तदङ्गविशिष्टं

तदेवोपासनं कार्यं, न त्वन्यत्राम्नातानामन्यत्रोपसंहारः कार्यः ॥ ६१ ॥

कुतः ?

शिष्टेश्च ॥ ६२ ॥

तदङ्गानां तत्रैव शासनादन्यत्रोपसंहारे प्रमाणाभावात् ॥ ६२ ॥

समाहारात् ॥ ६३ ॥

ज्ञानमार्गे सर्वावतारधर्माणां ब्रह्मणि समाहारात् सर्वधर्मविशिष्टब्रह्मोपासनं कार्यम् । तद्ब्रह्मैवावताररूपमित्येकस्मिन्नवतारेऽवतारान्तरधर्माणामप्युपसंहारे बाधकं नास्तीत्यर्थः ॥ ६३ ॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

ऐश्वर्यवीर्यादिगुणानां सर्वावतारेषु साधारण्यं श्रूयत इत्येकस्मिन्नवतारे सर्वावतारधर्मोपसंहारो युक्त इत्यर्थः ॥ ६४ ॥

नन्वेवमुपासनं किं नित्यं ? न, किन्त्वैच्छिकमित्याह ।

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥

एकस्मिन्नवतारे सर्वावतारयुक्तोपासनं न वा, तथा रुचिश्चेत् कर्तव्य, न तु नियमतः । तेषां रूपाणां नियततया तत्सहभावश्रवणाभावात् ॥ ६५ ॥

दर्शनाच्च ॥ ६६ ॥

उपासनस्य फलं दर्शनम् । तत्तु स्वधर्मविशिष्टैकावतारस्य भवति, न तु सर्वावतारधर्मविशिष्टस्य । अतो दर्शनाद्धेतोर्भक्तिमार्गीयस्य स्वधर्मविशिष्टैकावतारोपासनं युक्तमित्यर्थः । सर्वोपासनानां फलं दर्शनमिति सूत्रकृताऽन्ते तदेवोक्तम् ॥ ६६ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ ३ ॥

तृतीयाध्यायस्य चतुर्थः पादः ।

पुरुषार्थोऽतःशब्दादिति बादरायणः ॥ १ ॥

पुरुषार्थो भगवानेव । अतःशब्दात्, अतः परं नान्यदणीयस॰ हीयनःपदर्शादिनश्रुतिवाक्यादित्यर्थः ॥ १ ॥

अत्र कर्मवादी प्रत्यवतिष्ठते ।

शेषत्वात् पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॥२॥

विष्णोरिज्यत्वेन कर्मशेषत्वात् कर्माङ्गदेवतास्वरूपज्ञानं यागे फलातिशयहेतुरिति पुरुषसम्बन्ध्यर्थवादरूपं वेदान्तेष्वात्मनिरूपणम् । यथाऽन्येषु द्रव्यगुणकर्मस्वर्थवादः । यस्य पर्णमयी जुहूर्भवतीत्यादि द्रव्यनिरूपणार्थमर्थवादः । यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते इति संस्कारेऽर्थवादः । यत्प्रयाजाऽनुयाजा इज्यन्त इत्यादि कर्मनिरूपणेऽर्थवादः । तद्वत् । अतो विष्णुस्तुतेरर्थवादरूपत्वेनाङ्गप्रशंसाद्वारेण कर्मण एव प्रशंसारूपत्वात् कर्मण एव फलसाधकत्वं न भगवज्ज्ञानस्येत्यर्थः ॥ २ ॥

ननु तमेव विदित्वा मुनिर्भवतीत्यादिश्रुतौ ज्ञानवतः सर्वत्यागकथनात् पूर्वोक्तं न युक्तमित्याशङ्क्याह ।

आचारदर्शनात् ॥ ३ ॥

वसिष्ठप्रभृतीनां ब्रह्मज्ञानिनामग्निहोत्राद्याचरणदर्शनान्न ज्ञानस्य कर्मबाधकत्वं सम्भवतीत्यर्थः ॥ ३ ॥

तच्छ्रुतेः ॥ ४ ॥

जनकादीनां ब्रह्मविदां 'जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे' इत्यादिकर्मकरणनिरूपकश्रुतेर्हेतोर्न ज्ञानस्य कर्मबाधकत्वम् ॥४॥

समन्वारम्भणात् ॥ ५ ॥

तं विद्याकर्मणी समन्वारभेते इति श्रुतौ ज्ञानकर्मणोः साहित्येन फलारम्भकत्वदर्शनान्न पूर्वोक्तम् ॥ ५ ॥

तद्वतो विधानात् ॥ ६ ॥

वशिष्ठो ब्रह्मेत्यनेन ज्ञानवतो ब्रह्मत्वेन वरणकथनाज्ज्ञानस्य कर्माधिकारसम्पादकत्वमेव । बाधकत्वं तु सुदूरनिरस्तम् ॥ ६ ॥

ननु यदहरेवेत्यादिश्रुत्या त्यागस्यापि विधानात् कर्मतत्त्यागयोरैच्छिको विकल्पोऽङ्गीकार्यो नाङ्गाङ्गिभाव इत्याशङ्क्याह ।

नियमाच्च ॥ ७ ॥

यावज्जीवमग्निहोत्रविधाननियमाद्, आश्विनं धूम्रललाममित्यादिश्रुतौ कर्माकरणे प्रायश्चित्तविधानाच्च कर्मकरणनियम एव श्रुतेरभिमतो, न तु तत्त्याग इत्यर्थः । त्यागविधेः कर्माशक्तविषयकत्वं व्यवस्थापनीयमितिभावः । अतो ब्रह्मज्ञानस्य कर्मशेषत्वेन निरूपणात् कर्मैव फलसाधकत्वात् कर्तव्यं, न तु तत्त्यागे केवलज्ञानात् फलं सिद्ध्यतीति जैमिनिमते प्राप्ते ॥ ७ ॥

उच्यते ।

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥८॥

तुः पक्षव्यावर्तनार्थः । स वा अयमात्मा सर्वस्य वशीत्यादिश्रुत्या भगवान् सर्वापेक्षयाऽधिक उपदिश्यतेऽतः कर्मसाम्यमपि न वक्तुं शक्यम् । तदङ्गत्वं तु दूरपरास्तम् । अत्र विश्वासार्थमाचार्यः स्वानुभवं प्रमाणयति । बादरायणस्यैवं तद्दर्शनात् । एवं कर्मादिभ्य आधिक्येनैव तस्य भगवतो भक्तिमार्गस्य च तत्सम्बन्धिसर्वात्मभावस्य च दर्शनाद् अनुभवादित्यर्थः ॥ ८ ॥

आचारदर्शनादित्यस्योत्तरमाह ।

तुल्यं तु दर्शनम् ॥ ९ ॥

यथा जनकादीनां कर्मकरणाचारस्तथा शुकभरतादीनां कर्मत्यागाचारः । तथाचाचारदर्शनस्य तुल्यत्वान्न ज्ञानं कर्माङ्गमित्यर्थः ॥ ९ ॥

ननु जनको ह वैदेह इति जनकस्य कर्मकरणनिरूपकश्रुतिमाहात्म्यात् कर्मकरणाचारदर्शनं त्यागाचारदर्शनादधिकबलमित्याशङ्क्याह ।

असार्वत्रिकी ॥ १० ॥

ब्रह्मविदां सर्वेषामेव कर्मकरणनिरूपणाभावात् कुत्र चिज्जनकादौ कर्मकरणनिरूपिका श्रुतिरसार्वत्रिकी। य एतद्ध स्म वै इति कर्मत्यागनिरूपिका श्रुतिर्दृश्यते। अतो न सर्वेषां कर्मकरणनियम इत्यर्थः ॥ १० ॥

ननु तेषां ब्रह्मवित्त्वेऽप्येकेषां कर्मत्याग एकेषां कर्मकृतिरिति विभागे किं नियामकमित्याशङ्क्याह।

विभागः शतवत् ॥ ११ ॥

तत्रैतस्यानन्दस्यान्यानि भूतानि मात्रा उपजीवन्तीतिश्रुतेर्भगवदानन्दस्य सर्वत्र विद्यमानत्वेऽपि मानुषाद्यधिकारभेदेन तत्तदानन्ददानाद् यथा मानुषानन्दादारभ्याक्षरानन्दपर्यन्तं शतोत्तरमानन्दोत्कर्षरूपो विभाग उक्तस्तथा प्रकृतेऽपि येषु भगवदनुग्रहोत्कर्षेणान्यभावराहित्यं सर्वथा लौकिकभावराहित्यं व्यसनावस्थेति यावत्, तेषु सर्वथा कर्मत्यागः। येषु भगवदनुग्रहस्य न्यूनत्वं, तेषु लौकिकभावसद्भावाद् व्यसनावस्थाया अभावेन कर्मत्यागोऽपि नास्तीति विभाग उपपद्यत इति भावः। व्यसनावस्थायामेव कर्मपरित्याग इति तु भक्तिवर्द्धिन्यादिग्रन्थे निर्णीतम्। अत्र निर्गुणब्रह्मणो यद्वर्णितानन्दत्वमुक्तं, तत्तु लयात्पूर्वानुभवमादाय। यतः पुरुषाधिकारतारतम्येनानन्दभोगे तारतम्यं शतसंख्यया सूचितम्। ब्रह्मणि लये तु भोक्तृत्वाभावान्नानन्दतारतम्यम्। अग्रे त्वानन्दमात्रावशेषात् संख्या नास्ति। तर्हि पूर्णत्वं स्यादिति चेत्, पूर्णत्वस्यापि धर्मत्वेन निर्धर्मके तदसम्भवात्। पूर्णत्वं तु सधर्मकत्वात् पुरुषोत्तम एव। तस्य ब्रह्मानन्दापेक्षयाऽऽधिक्यं त्वचिन्त्यशक्त्यावसेयम् ॥ ११ ॥

तद्धेतो विधानादित्यस्योत्तरमाह।

अध्ययनमात्रवतः ॥ १२ ॥

वेदाध्ययनमात्रवतः कर्मण्यधिकारो, न तु ब्रह्मविदोऽपीत्यर्थः॥१२॥

यच्चोक्तमग्निहोत्रादिविधायकश्रुतिषु कर्मकरणनियमदर्शनं तत्त्यागे बाधकमिति, नियमाच्चेतिसूत्रेण, तत्राह।

नाविशेषात् ॥ १३ ॥

न कर्मणा न प्रजयेत्यादिश्रुतिषु मोक्षप्राप्तौ त्यागदर्शननियमाविशेषान्न कर्मनियमो बाधक इत्यर्थः ॥ १३ ॥

अथाग्रहेण, ब्रह्मिष्ठो ब्रह्मा भवतीत्यत्र ब्रह्मिष्ठपदेन ब्रह्मज्ञानवानेवोच्यते, न वेदाध्ययनमात्रवानित्युच्येत, तत्रापि ब्रूमः ।

स्तुतयेऽनुमतिर्वा ॥ १४ ॥

दर्शपूर्णमासावेतादृशौ यत्र ब्रह्मविदपि ब्रह्मत्वरूपार्त्विज्याधिकारीति दर्शपूर्णमासस्तुतये, न तु तत्र तस्याधिकारोऽभिप्रेतः । ब्रह्मज्ञाने कर्मापक्षयात्कर्षस्य पूर्वमुपपादितत्वात् ॥ १४ ॥

नन्वेष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयानितिश्रुत्या ब्रह्मविदः कर्मकरणे प्राप्तगुणदोषयोर्निषेधः क्रियते । तथा च तस्य कर्मकरणमावश्यकमित्याशङ्क्याह ।

कामकारेण चैके ॥ १५ ॥

कामकारेण परानुग्रहार्थमिच्छामात्रेण यत्करणं तेन प्राप्तयोर्गुणदोषयोर्निषेधार्थमिदं वाक्यमेके शाखिनः पठन्ति । न त्वेतत्कथनेन करणनियमप्रसक्तिरित्यर्थः । परानुग्रहार्थमिच्छामात्रेण यत्कर्मकरणं, न तस्माद्गुणदोषयोः प्रसक्तिः । इदन्तु, पृथग्ध्यप्रतिबन्धः फलमित्यनेन पूर्वमुक्तम् । तादृशकर्मणो भक्तित्वमेव, न कर्मत्वमित्यग्रे, स्तुतिमात्रमितिसूत्रे व्युत्पादयिष्यते । ब्रह्मविदो हि यज्ञाङ्गदेवानां भगवद्गुणत्वं ज्ञात्वा यजनं कुर्वन्तीति, न तत् कर्मरूपं भवति । भूतभावोद्भवकरो विसर्गः कर्मसंज्ञित इति सन्दर्भोक्तकर्मलक्षणव्याप्तेः । अत एव सन्दर्भेऽप्युक्तं, तदीयाराधनं तु गुणा एवेति । तस्मात् कर्मत्वाभावादेव कर्मसम्बन्धिगुणदोषयोरप्राप्तिः । किन्तु भगवदीयाराधनरूपा भक्तिरेव सेति ज्ञेयम् ॥ १५ ॥

उपमर्दं च ॥ १६ ॥

एके शाखिनस्तत् केन कं पश्येदित्यादिनाऽखण्डब्रह्मज्ञाने कर्मतदधिकारादीनामुपमर्दं च पठन्तीति ज्ञानस्य कर्मोद्गत्वं सुदूर

निरस्तं वेदितव्यम् । अखण्डब्रह्मभानं तु ब्रह्मण्येव, नत्विदं ब्रह्मेति सखण्डम् । तत्रोद्देश्यत्वेन प्रपञ्चस्यापि भानात् सखण्डत्वम् ॥ १६ ॥

ऊर्ध्वरेतःसु च शब्दे हि ॥ १७ ॥

यदहरेव विरजेत् तदहरेव प्रव्रजेदिति श्रुत्या प्रव्रजनविधाना-दूर्ध्वरेतःसु सन्न्यासिषु कर्माभावोऽङ्गीकार्य इति कर्मशेषत्वं ज्ञाने न सम्भवति । नन्वेवमग्निहोत्रादिकर्मशेषत्वाभावेऽपि ज्ञाने सन्न्यासाश्रमीणकर्मशेषत्वमस्त्वित्याशङ्क्याह । शब्दे हि । ज्ञानस्वरूपं च शब्दैकगम्य, न युक्तिगम्यम् । श्रुतौ तु तमेवं विद्वानमृतो भवतीति ज्ञानस्य मोक्ष एव फलं श्रूयते । अतो न सन्न्यासाश्रमीणकर्मशेषत्वमपीत्यर्थः । ननु ज्ञानेनैव मोक्षे सन्न्यासवैयर्थ्यमिति चेद्, ब्रह्मविद्व्यतिरिक्तसङ्गस्य भगवद्भावविस्मारकत्वेन त्यागस्य भगवद्भावपोषकत्वेनोपयोगात् फलोपकार्यन्तरङ्गान्तःकरणशुद्धिसम्पादकत्वाच्च ॥१७॥

अत्र पूर्वपक्षमाह ।

परामर्शं जैमिनिरचोदना चापवदति हि ॥१८॥

किं प्रजया करिष्याम इत्यादिश्रुतौ ब्रह्मप्राप्तिं विना प्रजादिसर्वपदार्थानां वैयर्थ्यकथनात् सकलश्रुतिभिर्मोक्ष एव फलत्वेन परामृश्यते । तं परामर्शं कर्मस्वानन्त्यवादी जैमिनिरपवदति बाधत इत्यर्थः । यतो, वीरहा वा एष देवानामितिश्रुत्या कर्मत्यागस्य निन्दितत्वेन प्रव्रजननिरूपकश्रुतेरन्धपङ्ग्वादिविषयकत्वं मनुते । तथा सिद्धस्वरूपब्रह्मनिरूपणश्रुतिषु ब्रह्मज्ञानस्याविधेयत्वेन तच्चोदनापी फलत्वेन मोक्षपरामर्शमपवदतीत्यर्थः । अतो जैमिनिसम्मत्या विधिसम्बन्धेन च कर्मैवाऽनुष्ठेयं, न तु मोक्षसाधनत्वेन तत्त्यागादिकमिति प्राप्ते ॥ १८ ॥

उच्यते ।

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

जैमिनेर्गुरुर्बादरायणोऽनुष्ठेयं कर्मापवदतीति मन्यत इत्यन्वयः । कुतः । साम्यश्रुतेः । यथा, वीरहेतिश्रुत्या कर्मत्यागकर्तुर्निन्दा श्रूयते, एवं भगवज्ज्ञानरहितस्यापि निन्दा, असुर्या नामेतिश्रुत्योच्यते । वस्तु-

तस्तु, तमेतं वेदानुवचनेनेतिश्रुत्या कर्मणां ज्ञानसापेक्षतोक्तेस्तेषां ज्ञानसाम्यं तच्छेषित्वं च दूरापास्तमिति मन्तव्यम् ॥ १९ ॥

एवं सति पूर्वकाण्डवैयर्थ्यमायातीत्याशङ्क्याह ।

विधिर्वा धारणवत् ॥ २० ॥

कर्मणां विधिर्भक्तिसाधनत्वेनैव कर्मानुष्ठेयमिति तात्पर्येणोच्यते । धारणवत् । यथा योगशास्त्रे समाधिसिद्ध्यर्थं मानस्या मूर्तेर्धारणं साधनत्वेन विधीयते तद्वत् । समाधिसिद्धौ तु, ततः किञ्चन न स्मरेदित्यादिवाक्येभ्यो यथा धारणात्यागस्तथा भक्तिसिद्धौ तु कर्मणां त्याग इति भावः ॥ २० ॥

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

नन्वेष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयानितिश्रुत्या ज्ञानिनि विहितनिषिद्धकर्मणोः फलाजनकत्वेन साम्यमुक्तमिति ज्ञानस्य कर्मशेषत्वं नास्तीति यदुक्तं, तन्नोपपद्यते । यत इयं श्रुतिर्ज्ञानस्य स्तुतिमात्रम् । किञ्चानया श्रुत्या ज्ञानिनोऽपि कर्मोपादानात् कर्मकृतिस्वीकारात् । यदि ज्ञानिनां कर्मकरणं न स्यात् तदा तत्कृतगुणदोषाप्राप्त्या निषेधोऽनुपपन्नः स्यात् । प्राप्तिपूर्वकत्वान्निषेधस्य । मात्रपदेन यत्किञ्चिद्गुणदोषसम्बन्धस्तेषामस्त्येवेति सूचितम् । तथाच ज्ञानिनोऽपि कर्मकरणप्रसक्त्या कर्मशेषत्वं ज्ञानस्यायातीति चेन्नैष दोषः । ज्ञानिनः कर्मफलासम्बन्धस्यापूर्वत्वादन्यतः प्राप्त्यभावाद् विधेयत्वमेव, न तु स्तुत्यर्थं तत्कीर्तनम् । नच निषेधस्य प्राप्तिपूर्वकत्वनियमः । सूर्ये नमःकार्याभाव इत्युक्त्या नमःकार्यप्राप्तिबोधासम्भवात् । ननु लोकसंग्रहार्थं तेषामपि कर्मकरणं, तन्निर्धारणानियम इत्यत्रोक्तं, तत्कथमुक्तं ज्ञानिनां कर्मकरणाप्रसक्तिरिति । उच्यते । तादृशानां यत् कर्मकरणं, तद् भक्तिरूपमेव । अत एव तत्रोक्तम्, अप्रतिबन्धः फलमिति । तस्माद् भगवदिच्छया ज्ञानिना कृतस्य कर्मणो भगवदभिप्रेतार्थकरणेन भक्तिरूपत्वेन नित्यधीनतया कृतत्वेन धर्मत्वाभावाद् देवानां भगवदीयत्वेन भजनात् सम्यगेवोक्तं ज्ञानिनः कर्मकरणाप्रसक्तिरिति ॥ २१ ॥

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २२ ॥

ननु ब्रह्मविद्यानिरूपकाणां, भृगुर्वै वारुणिरित्युपाख्यानानां; पारिप्लवे शंसतीतिश्रुत्या कर्माङ्गशंसनशेषत्वमुच्यते । शंसने च शब्दमात्रप्राधान्येन तदर्थस्य मन्त्रार्थवदप्रयोजकत्वात् कथं ज्ञानस्य कर्मप्राधान्यमिति चेन्न । कर्मापेक्षया ज्ञानस्य विशेषितत्वाद् विशिष्टतया कथनान्न ज्ञानस्य कर्मशेषत्वमित्यर्थः । नच ज्ञानस्य विशिष्टत्वेन कथनमाख्यानेष्वेवेति शङ्क्यम् । आख्यानातिरिक्तश्रुतौ, ब्रह्मविदाप्नोति परमित्यादौ ज्ञानोत्कर्षकथनात् ॥ २२ ॥

नन्वेवमाख्यानश्रुतीनां विद्याप्रतिपादकत्वं न स्यादित्याशङ्क्याह ।

तथा चैकवाक्यतोपबन्धात् ॥ २३ ॥

यथा केवलश्रुतीनां विद्याप्रतिपादकत्वं, तथैवाख्यानश्रुतीनामित्यर्थः । नह्याख्याननिरूपणस्य कोपयोगस्तत्राह । एकवाक्यतोपबन्धात् । आचार्यवान् पुरुषो वेदेतिश्रुत्यैकवाक्यताज्ञानार्थमुपाख्यानरीत्या गुरुशिष्यकथोपबन्धात् । तथाच विद्याया माहात्म्यनिरूपणार्थमाख्यानपूर्वकं निरूपणमित्यर्थः ॥ २३ ॥

पुरुषार्थोऽतःशब्दादित्यारभ्य ज्ञानस्य कर्मानपेक्षत्वं फलसाधने उक्तमिति तदेवोपपादयन्नरमाह ।

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २४ ॥

यतो ज्ञानी ज्ञानेन स्वयं यज्ञात्मको जातोऽत एव जरामर्याग्निहोत्रेऽग्नीन्धनाद्यनपेक्षोक्ता, तस्यैवं विदुषो यजमानस्येत्यादितैत्तिरीयकश्रुतौ ॥ २४ ॥

नन्वेवं कर्मकाण्डवैयर्थ्यमित्याशङ्क्य कर्मणां ज्ञाने फलोपकारित्वाभावेऽपि स्वरूपोपकारित्वमस्त्येवेत्याह ।

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २५ ॥

सर्वेषां कर्मज्ञानभक्तीनां पुरुषोत्तमज्ञानेऽपेक्षाऽस्ति । अन्यथा यज्ञादिनिरूपकश्रुतिवैयर्थ्यं स्यात् । अत एतन्निर्णये सैव श्रुतिः प्रमाणमित्यर्थः । ननु यज्ञादिविधायकश्रुतिबलात् कर्मणामेव ज्ञानद्वारा फलसाधकत्वमस्त्वित्याशङ्कां दृष्टान्तेन निरस्यति । अश्ववत् । यथा इष्टफलसाधकदेशव्यवधायकदेशातिक्रमेऽश्वस्य साधनत्वं, न तु

तद्देशस्थितफलाभावापि । तथा कर्मणां ज्ञानोत्पत्तिप्रतिबन्धकान्तःकरणदोषनिरास उपयोगो, न तु ज्ञानफलसिद्धावपीत्यर्थः ॥ २५ ॥

ननु तस्मादेवंविच्छान्तो दान्त इत्यादिना शमादीनामेव ज्ञानसाधनत्वमुच्यते, न तु यज्ञादेरित्याशङ्क्याह ।

शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ २६ ॥

आत्मन्येवात्मानं पश्येदिति ज्ञानमार्गीयज्ञानाङ्गतया शमदमादिविधेर्हेतोर्ज्ञानी शमदमाद्युपेतः स्यात् । ज्ञानमार्गे तेषामवश्यानुष्ठेयत्वात् । अन्यथा ज्ञानमवकीर्येत । अतस्तस्मादेवंविदितिश्रुतौ शमदमादीनामुक्तिः । कर्मणां तु बहिरङ्गत्वादनुक्तिरिति ज्ञेयम् । भक्तिमार्गे तु स्वत एव शमदमादयो भवन्ति, तथापि ज्ञानमार्गे तेषामावश्यकत्वाज्ज्ञानी तद्युक्तः स्यादेवेत्यर्थः ॥ २६ ॥

ननु शमादीनां सत्त्वशुद्ध्यर्थमपेक्षणात् तत्र चाहारशुद्धौ सत्त्वशुद्धिरितिश्रुत्याऽऽहारशुद्धेरन्तरङ्गसाधनत्वात् तद्विरुद्धसर्वान्नभक्षणस्य, चाक्रायणे छान्दोग्योपनिषत्सु श्रवणात् सत्त्वशुद्धेर्ज्ञानस्यान्तरङ्गसाधनत्वमित्याशङ्क्य सर्वान्नानुमतिश्रुतिव्यवस्थामाह ।

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २७ ॥

आहारदौर्लभ्येन प्राणात्यये प्राप्ते सर्वान्नानुमतिः श्रूयते, न त्वाहारसुलभत्वे । यतश्छान्दोग्योपनिषत्सु चाक्रायणे तथा दर्शनादित्यर्थः । एवञ्च ज्ञानिनोऽप्यनापदि विहितत्यागाच्चित्तमालिन्यं जनयतीति सत्त्वशोधकशमादिकमवश्यमनुष्ठातव्यमित्यर्थः ॥ २७ ॥

अबाधाच्च ॥ २८ ॥

आपदि सर्वान्नभक्षणेन चित्तदोषासम्भवाज्ज्ञाने बाधाभावाच्च न दोष इत्यर्थः ॥ २८ ॥

अपि स्मर्यते ॥ २९ ॥

आपद्यविदुषोऽपि दुष्टान्नभक्षणे पापाभावो, जीवितात्ययमापन्न इत्यादिना स्मर्यते यत्र तत्र विदुषस्तथान्नभक्षणे दोषाभावे किं

शकत्व्यमित्यर्थः। यतस्तस्य ज्ञानाग्निरेव दोषसत्त्वेऽपि नाशकोऽस्तीतिभावः ॥ २९ ॥

शब्दश्चातोऽकामकारे ॥ ३० ॥

यतो ज्ञानिनो ज्ञानाग्निरेव सर्वकर्मदहनसमर्थोऽस्तस्य पूर्णदशायां यथेष्टाचरणेऽपि न दोषः। परं तु साधनदशायां कामनिवर्तकः शब्द, एवंविच्छान्तो दान्त इत्यादिरूपः श्रूयते। अतः साधनदशायां शमदमाद्यनापदि शिष्टाऽन्नभक्षणं सर्वथा तेनानुष्ठेयमितिभावः ॥ ३० ॥

ननु ज्ञानाग्निः सर्वकर्माणीतिस्मृत्या ज्ञानस्य सर्वकर्मनाशकत्वकथनाज्ज्ञातज्ञानस्याश्रमकर्माणि न कर्तव्यानीत्याशङ्क्याह।

विहितत्वाच्चाश्रमकर्मापि ॥ ३१ ॥

यथाऽनापदि शिष्टान्नभक्षणमेव कर्तव्यं, तथा विहितत्वादाश्रमकर्मापि कर्तव्यमित्यर्थः। अन्यथा विहितत्यागजनितदूषणे चित्तमालिन्यं स्यादितिभावः ॥ ३१ ॥

ननु कृतस्यापि कर्मणो ज्ञानेन नाशात् किमर्थमपार्थकर्म ज्ञानिना कर्तव्यमित्याशङ्क्याह।

सहकारित्वेन च ॥ ३२ ॥

शमदमादीनां ज्ञानान्तरङ्गसाधनानां सहकारीण्याश्रमकर्माणि। अत आश्रमकर्मरहितैः शमदमादिभिर्ज्ञानं स्थिरीकर्तुमशक्यमतस्तान्यपि कर्तव्यानीत्यर्थः ॥ ३२ ॥

एवं ज्ञानमार्गीयाणां ज्ञानस्थैर्यसाधनान्युक्त्वा भक्तिमार्गीयाणां भक्तिसाधनानि श्रवणादीन्यवश्यकर्तव्यानीत्याह।

सर्वथापि त एवोभयलिङ्गात् ॥ ३३ ॥

यद्यपि भक्तानां श्रवणकीर्तनादीनि कर्तव्यान्येव, तथापि वर्णाश्रमधर्मादिसाधनानां श्रवणादीनां च युगपदुपस्थितौ सर्वथापि त एव श्रवणादय एव कर्तव्याः। नानुध्यायेद् बहून् शब्दान्, अन्या वाचो विमुञ्चथेतिलिङ्गात्। श्रृण्वन्ति गायन्तीत्यादिस्मृतिलिङ्गाच्चेत्यर्थः ॥ ३३ ॥

अनभिभवं च दर्शयति ॥ ३४ ॥

युगपदुपस्थितौ प्राधान्येन भगवद्धर्मा एव कर्तव्या इत्यत्र गमनान्तरमुच्यते । यतः, सर्वं पाप्मानं तरतीत्यादिश्रुतिः कर्माकरणजदोषैर्भक्तस्यानभिभवं दर्शयतीत्यर्थः ॥ ३४ ॥

अन्तरा चापि तु तद्दृष्टेः ॥ ३५ ॥

भगवद्धर्मेभ्य आश्रमधर्मा न्यूना इत्युक्तमुच्यते । अपि तु तद्दृष्टेः, तस्मिन् भगवति दृष्टिरन्यभावराहित्यपूर्वकं भगवद्भावो व्यसनावस्थेतियावत् सा विद्यते यस्य तस्य वर्णाश्रमधर्मा अन्तरा फलप्राप्तौ बाधका इत्यर्थः । व्यसनावस्थापन्नस्य भक्तस्य निरन्तरं भगवद्भावनायुक्तत्वेन भगवद्धर्मकर्मकरणयोर्युगपत्स्थित्यसम्भवाद् यौगपद्ये कर्मणां त्याग आवश्यकः । अत एव तादृशव्यसनावस्थापन्ना भक्ता निरपेक्षा इत्युच्यन्ते । तानुद्दिश्यैव, मद्भक्तो ह्यनपेक्षः सलिङ्गानाश्रमांस्त्यक्त्वेति भगवतोक्तम् । सापेक्षा अपि भक्ता द्विविधाः, स्वार्थे फलापेक्षा लोकसंग्रहापेक्षाश्च । व्यसनदशापन्नानां स्वार्थापेक्षा नास्त्येव । लोके विषमदृष्टेरभावाल्लोकसंग्रहापेक्षापि नास्ति । अतस्तेषां सर्वथा निरपेक्षत्वम् ॥ ३५ ॥

अपि स्मर्यते ॥ ३६ ॥

अपिशब्देनाश्रमधर्माणामन्तरायत्वे किं वाच्यं, यतो ज्ञानान्तरङ्गसाधनानां वैराग्यादीनामप्यन्तरायत्वं न ज्ञानं न च वैराग्यमित्यादिना स्मर्यते ॥ ३६ ॥

ज्ञानादिभ्यो भक्तेः साधनत्व उत्कर्षमुक्त्वा फलतोऽप्युत्कर्षमाह ।

विशेषानुग्रहश्च ॥ ३७ ॥

ज्ञान्यपेक्षया भक्ते विशेषानुग्रहः, अहं भक्तपराधीन इत्यादिना स्मर्यते ॥ ३७ ॥

भक्त्युत्कर्षकथने फलितार्थमाह ।

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३८ ॥

अतः पूर्वोक्तोदाहृतश्रुतिभ्य इतरद् मुक्तेरपि भक्तिमार्गेतदी- यत्वमेव ज्यायः । हेत्वन्तरमप्याह । लिङ्गाच्चेति । मुक्तानां देहेन्द्रिया- द्यभावेन केवलमात्मस्वरूपेणैव ब्रह्मानन्दानुभवः । भक्तानां त्व- लौकिकदेहेन्द्रियादिभिः सर्वोत्कृष्टभजनानन्दानुभव इति तदीयत्वमे- व सर्वोत्कृष्टमित्यर्थः ॥ ३८ ॥

ननु भक्तिमार्गेऽप्यपि मोक्षसाधनत्वेन तत्र तदीयत्वस्य सा- धनोत्कृष्टावस्थारूपत्वेन मोक्षान्तरङ्गसाधनत्वमेव । एवञ्च तदीयत्वं न सर्वोत्कृष्टमित्याशङ्क्याह ।

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात- द्रूपाभावेभ्यः ॥ ३९ ॥

तद्भूतस्य पुष्टिमार्गे तदीयत्वं प्राप्तस्य जैमिनेरप्यतद्भावस्त- द्भावराहित्यं न कदाचिदपि । दृढतया कर्ममार्गनिष्ठत्वेन भ- क्तिसम्बन्धाभावसूचनार्थं जैमिनेर्ग्रहणम् । एवञ्चान्यस्य भक्तिलेशा- भावतः का वार्ता, यदि भगवत्कृपया जैमिनेरपि तदीयत्वं स्यात् तद्भा- वतिरोधानं कदापि न भवतीति, न तदीयत्वस्य मोक्षसाधनत्वशा- ङ्कालेशोऽपीत्यर्थः । तत्र नियमादयो हेतवः । सदा पश्यन्ति सूरय इति सदापदोक्त्या भक्तानां भगवद्दर्शनं नित्यमेवेति नियम उक्तः । सोऽश्नुते इति श्रुत्या मुक्तस्य ब्रह्मस्वरूपानुभव उच्यते । स च पर- मफलरूप इति तदीयत्वस्य फलरूपत्वात् साधनरूपाभावउक्तः । फलं हि साधनादुत्तमं भवति । तदीयत्वापेक्षयान्यस्योत्कृष्टस्याभा- वादपि न तदीयत्वस्य निर्विशेषमोक्षफलकत्वमित्यर्थः ॥ ३९ ॥

ननु ध्रुवादिभक्तानां ध्रुवादिलोकसम्बन्धिभोगस्य भगवदी- यत्वस्य फलं ब्रह्मादिलोकाधिकार एवेत्याशङ्क्याह ।

न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ४० ॥

भगवदीयस्य भगवानाधिकारिकफलं न ददाति । कुतः । आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुनेतिस्मृतिवाक्येन तत्र पतनानि- रूपणात् । किञ्च तादृशभक्तस्य निरन्तरं भक्त्यनुभवेनाकाङ्क्षा- भावेन तादृशफलस्यायोगात् सम्बन्धोऽपि न ददातीत्यर्थः ।

भृत्यादीनां तु कार्यविशेषार्थं तदिच्छानुरोधेन च दानं, नैतावता सर्वभक्तेभ्यस्तद्दानमिति नियमः ॥ ४० ॥

उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥ ४१ ॥

एके भक्ता आधिकारिकफले पतनमात्रे न दोषः, किन्तूपपूर्वं पतनं भक्तिसम्बन्धाभावादिति वदन्ति । परमत्राधिकारसमाप्तौ भगवदनुग्रहाशापि सम्भवति । मुक्तौ तु तदसम्भवान्महापतनमेवेति भावः । एवं मुक्तिस्वरूपं निरूप्य भक्तिमार्गोत्कर्षार्थमाह । भावमशनवत् । भक्तिमार्गे तु साक्षात्प्रभुसम्बन्धाभावेऽपि भगवदानन्दभोगवन्मन्यते । ननु साक्षाद्भगवत्स्वरूपानुभवो जीवस्य न सम्भवतीत्याशङ्क्याह । तदुक्तम् । सोऽश्नुते सर्वान् कामान्, सह ब्रह्म समश्नुत इत्यादिश्रुतिषु तथोक्तमित्यर्थः ॥ ४१ ॥

नतूत्कृष्टभगवद्भावे भगवत्स्वरूपानुभवे वा सम्पन्ने गृहत्यागः कर्तव्यो न वेति संशये फलस्य सिद्धत्वान्न कर्तव्यो गृहत्याग इति प्राप्ते, उच्यते ।

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४२ ॥

उभयथापि भगवद्भावमात्रे स्वरूपानुभवे वा गृहाद् बहिर्गमनं त्यागः कर्तव्यः । त्वं तु सर्वं परित्यज्येति स्मृतेरुद्धवविदुरादीनां तथैवाचाराच्चेत्यर्थः ॥ ४२ ॥

नन्वेवं पुष्टिमार्गीयफलस्य त्यागात्मकसाधनजन्यत्वमायातीत्याशङ्क्याह ।

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४३ ॥

पुष्टिभक्तस्य स्वामिनो भगवत एव फलश्रुतेर्न साधनत्वेन विहितत्वेन च त्यागः कर्तव्यः । साधनदशायां गृहादीनां भगवद्भावबाधकत्वाभावेनापेक्षितो त्यागो भवतीति शेषः । अत्रैविचारकतात्पर्येण भक्तिमार्गसिद्धान्तकरणात् मयाप्युक्तम् ॥ ४३ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४४ ॥

औडुलोमिराचार्यस्तु स्वीयानां भगवल्लीलार्थमेव प्रकटितत्वेन

लीलोपयोगस्य तेषां त्यागं विनाऽसम्भवाद् भक्तस्य सर्वत्यागपूर्वकं भगवत्सन्निकटगमनं तद्वार्त्विज्यम् ऋत्विक्कर्मैव मनुते। यथा ऋत्विजां कर्मणि प्रयासो यजमानकार्यार्थं तथाऽत्रापि भगवल्लीलासम्पादनार्थमेव तेषां त्यागादिकमित्यर्थः। भक्तानाम् ऋत्विक्त्वनिरूपणस्य तात्पर्यान्तरमाह। तस्मै हि परिक्रीयते। तस्मै यजमानाय स्वकार्यकारणार्थम् ऋत्विक् परिक्रीयते वरणेन स्वीक्रियत इत्यर्थः। एवं प्रकृते स्वीयतल्लीलासम्पादनार्थं वृता भक्तास्तल्लीलानुभवविरोधिगृहादिकं त्यक्त्वा भगवत्सन्निकटं गच्छन्तीत्यर्थः॥ ४४॥

श्रुतेश्च॥ ४५॥

भक्तिरस्य भजनमित्यादिश्रुतिरूपप्रमाणादप्ययं सिद्धान्तो ज्ञेयः॥ ४५॥

ननु वरणश्रुतिर्भगवत्प्राप्तौ वरणातिरिक्तसाधनान्तरं निषेधति। तस्मादेवंविदित्यादिश्रुतिस्तु साधनान्तराणि निरूपयति। एवं श्रुतिविप्रतिषेधे प्राप्ते मर्यादापुष्टिभेदेन तयोर्व्यवस्थामाह।

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्॥ ४६॥

जीवानां भगवदङ्गीकारो मर्यादापुष्टिभेदेन द्विधा। तत्र श्रुतौ शमदमादिसहकार्यन्तरविधिर्मर्यादापक्षेणोच्यते। पुष्टिमार्गे तु वरणातिरिक्तसाधनानपेक्षणात् तद्वतो भगवद्विषयकपरमस्नेहवतस्तृतीयं साधनं मानसिकम्। कायिकवाचनिकमानसिकभेदेन त्रिविधसाधनेषु मानसिकस्याऽर्हितत्वात् तद्ग्रहणम्। तथाच तादृशस्य भक्तस्य मानसिकसाधनमपि विध्यादिवज्ज्ञेयम्। यथा स्नेहवतो भक्तस्य भगवत्कार्ये प्रवृत्तौ विधिरर्थवादो वाऽप्रयोजकः। तस्य स्नेहत एव प्रवृत्तिसम्भवात्। तथा मनसैवाप्तव्यमिति श्रुतिबोधितं मानसिकं साधनं भगवद्भावाप्रयोजकमित्यर्थः। भगवदङ्गीकारबलेन तस्य स्वत एव प्राप्तिसम्भवात्। भगवति मनोनिवेशस्तु भावस्वाभाव्यादेव, न तु विधिबलेन। एवं मानसिकसाधनस्य पुष्टावप्रयोजकत्वकथनेन कायिकवाचनिकयोरप्रयोजकत्वमर्थादेव सिद्धम्॥ ४६॥

ननु बहिरस्तुभयथेत्यादिना पूर्णाभावयुक्तस्य गृहत्यागावश्यकत्वमुक्तम्। तच्छान्दोग्योपनिषदुक्तोपसंहारविरुद्धम्। तत्रान्ते, कुटुम्बे शुचौ देशे स्वाध्यायमधीयान इति गृहस्थाश्रमस्यैव कथनादित्याशङ्क्य तत्तात्पर्यमाह।

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥

त्यागे वाङ्मनसयोरेव भगवति विनियोगः। गृहस्थाश्रमे तु कुटुम्बसाहित्येन सेवाकरणात् सर्वेन्द्रियाणां भगवद्विनियोग, परिजनकृतार्थता चाधिका सम्पद्यत इति गृहिणोपसंहारः कृत इत्यर्थः। मर्यादामार्गीयगृहिव्यवच्छेदार्थं तुः। पूर्वोक्तत्यागावश्यकत्वं तु व्यसनदशायामेव। तादृशाधिकारस्य दुर्लभत्वेन पूर्वं गृह एव स्थित्वा भजनं कर्तव्यमित्यत्रोक्तम्। पूर्णाधिकाराभावे त्यागधर्माणामनिर्वाहात् कर्मत्यागेन विकर्मजदोषप्रसक्तेश्च ॥ ४७ ॥

किञ्च।

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

सन्न्यासिनो यथा मौनानीहादयो धर्मा उपदिष्टास्तथात्र गृहिण इतरेषामप्युपदेशः कृतः। आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्येत्यादिना। अत. सन्न्यासिधर्मापेक्षयाऽत्राधिकधर्माणामुपदेशाद् गृहिणोपसंहारो युक्तः॥ ४८ ॥

ननु तत्र शुचौ देशे स्वाध्यायमधीयान इतिकथनात् कथं सर्वेन्द्रियाणां भगवत्सेवापरत्वं सम्भवतीत्याशङ्क्याह।

अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

यतो भगवता महान्तयं सम्बन्धे प्राप्य वर्तते। अतो गृहस्थाश्रमधर्मैर्वेदाध्ययनादिभिर्भगवद्भावमनाविष्कुर्वन् भगवद्भजनं कुर्यादित्याशयेन शुचौ मे धर्मा उक्ता इत्यर्थः ॥ ४९ ॥

वैदिककर्मकरणे तात्पर्यमुक्त्वा लौकिकतत्करणसमयमाह।

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

यथा भगवद्भावगोपनार्थं वैदिककर्मकरणं, तथा लौकिकत्या-

ध्यनावश्यकत्वात् करणम् । परं तु भगवत्कार्याप्रतिबन्धेनैहिकमपत्योत्पादनतत्संस्कारादिकं कार्यम् । ननु तेषां बाध एवास्त्वित्याशङ्क्याह । तद्दर्शनात् । धार्मिकान् विन्द्यादिति श्रुतौ धार्मिकपुत्रविधानदर्शनाद् गृहस्थाश्रमतद्धर्माणां बाधाभावेऽपि भगवत्सेवासमयाऽप्रतिबन्धेन तेषां करणमित्यर्थः ॥ ५० ॥

नन्वेवंप्रकारेण भजनं कुर्वतो भक्तिमार्गीयस्य भगवद्रसानुभवात्मकं फलं भवति, न वेत्याशङ्क्याह ।

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ५१ ॥

एवम्भूतस्य गृहिणो जीवन्मुक्तस्य मुक्तेर्यत्फलं भगवद्रसानुभवस्तस्यानियम एव । अत्र हेतुमाह । तदवस्थेत्यादि । न स पुनरावर्तत इति श्रुत्या मोक्षावस्थाया एव नियमः क्रियते । न तु पुष्टिमार्गीयफलस्य । जीवन्मुक्तिदशा तु तस्यौत्सर्गिक्येवेति भावः । अतस्तथेत्यर्थः । अत्र भक्तस्य भगवद्रसानुभवानियम उक्तः, स तु भक्तिमार्गीयसर्वाभिप्रायेण । तत्र शुद्धपुष्टिभक्तस्य परमानुग्रहभाजनत्वान्मुक्तेर्यत्फलं भगवद्रसानुभवस्तदेव तादृशसाधनसम्पत्तौ नियमेन भवति। येषां भक्तानां शुद्धपुष्टिमार्गीयसाधनं न सम्पन्नं, तेषां तु साधनाभावादेव न विलक्षणभगवत्सम्बन्धात्मकं फलं भवति, मोक्षस्तु भवत्येव सर्वेषामित्यभिप्रायेण मुक्तिफलानियम उक्तो, न तु शुद्धपुष्टिसाधनसम्पत्तावपि न मुख्यं फलं भवतीत्यभिप्रायेणेति ज्ञेयमिति ॥

यद्वा, नन्वेवंरीत्या भक्तिमार्गीयगृहिणो भगवद्रसानुभवात्मकं फलमेतज्जन्माव्यवधानेन भवति न वेत्याशङ्क्याह । एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः । एवम्भूतस्य गृहिणो जीवन्मुक्तस्य मुक्तेर्यत्फलं भगवद्रसानुभवस्तस्यानियम एव । एतज्जन्मोत्तरं जन्मान्तरव्यवधानेन वेत्यनियम इत्यर्थः । जन्मान्तरव्यवधानं तु तेषां तदिच्छानुरोधिभगवदिच्छातो भवति । तादृशभक्तानामेव तादृशीच्छा भवति, यदस्माकं जन्मान्तरं भवतु । तेनास्माकं भगवज्जनरसानुभवो भवतु । लोकानां शिक्षणेनास्माभिः कृतार्थता सम्पादनीया तदुपर्यनुग्रहोऽपि सम्पद्यतामित्याकारकतदिच्छानुरोधेन भ-

गवदिच्छया तेषां जन्मान्तरं भवति। परं तज्जन्म मुक्तिरूपं तु.खाऽस्पृष्टं, न तु बन्धरूपम् । न कर्मबन्धनं जन्म वैष्णवानां च विद्यते । विधात्रनुचरत्वं च मोक्षमाहुर्मनीषिणः । यथा सौमित्रिभरताविति पाद्मोक्ते । आर्तभक्तानां त्वेतादृशीच्छा न भवति, तेषां भगवद्विप्रयोगस्य सोढुमशक्यत्वादिति ज्ञेयम् । अनियमे हेतुमाह । तदवस्थावधृतेस्तदवस्थावधृतेः । न स पुनरावर्तत इति श्रुत्या मोक्षावस्थाया एव नियमः क्रियते, न तु पुष्टिमार्गीयफलस्य । जीवन्मुक्तदशा तु तस्यौत्सर्गिक्येवेतिभावः । अतस्तथेत्यर्थः । आवृत्तिरध्यायसमाप्तिसूचिका ॥ ५१ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां तृतीयाध्यायस्य चतुर्थः पादः ॥ ३ ॥ ४ ॥

समाप्तश्चायं तृतीयोऽध्यायः ।

अथ चतुर्थाध्यायस्य प्रथमः पादः ।

तुरीयेऽध्याये फलं विचारयंस्तस्यान्तरङ्गसाधनरूपश्रवणादिषु विचारयति । तत्र, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यनेन विहितं श्रवणादिकं सकृत् कर्तव्यमसकृद्वेति संशये सकृत्करणेऽपि शास्त्रार्थसम्पादनसम्भवात् सकृदेव कर्तव्यं, नासकृद् गौरवादिति प्राप्ते, उच्यते ।

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

श्रवणादीनामावृत्तिरेव श्रुतितात्पर्यविषयः । कुतः । असकृदुपदेशात् । छान्दोग्ये श्वेतकेतूपाख्याने, ऐतदात्म्यमिदं सर्वमित्यारभ्य तत्त्वमसीत्यन्तोपदेशवाक्यस्य नवकृत्व उपदेशात् ॥ १ ॥

अत्रैव प्रमाणान्तरमाह ।

लिङ्गाच्च ॥ २ ॥

श्रुतेरनुमापकत्वात् स्मृतिर्लिङ्गमित्युच्यते । तथाच, 'यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः । तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्तम्' इतिस्मृतेरपि श्रवणादीनामावृत्तिरेव फलसाधिकेति ज्ञेयम् । अत्र चक्षुर्यथैवेति दृष्टान्तेनापि श्रवणादीनामावृत्तेर्दृष्टद्वारैव फलसाधकत्वं सूचितम् । अतः श्रवणादिकमसकृत् कर्तव्यमिति सिद्धम् ॥ २ ॥

एवं श्रवणादीनामावृत्तौ ज्ञानिनां फलं विचारयति ।

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

ज्ञानिनो हि भगवन्तमात्मरूपेणोपासते । एवं निरन्तरमुपासने क्रियमाणेऽनेकजन्मभिस्तेषां हृदये तथैव भगवान् स्फुरति । तदा स्वानन्दांशस्याप्याविर्भावात् स्वाभेदेनैव तमनुभवन्ति । एवं स्थितौ किञ्चित्कालविलम्बेन प्रारब्धक्षये तत्रैव प्रविशन्ति । एतदेवाह । आत्मेति तूपगच्छन्ति । आत्मेत्युपासनात् तमेवोपगच्छन्ति प्राप्नुवन्तो-

र्थः । एतादृशाः सर्वोपकारिण इति परार्थमपि ज्ञानं भगवता तेषु दत्तमित्युक्तमाधिकारिण्युपस्थिते ज्ञानमुपदिशन्त्यपीत्युपदेशोऽपि तेषां फलानुभवमध्यपातीत्युपदिशन्ति चेत्युक्तम् ॥ ३ ॥

ननु ब्रह्मणा आत्मत्वेन ज्ञानमुपासनार्थं, गुरौ भगवत्त्वेन ज्ञानमपीति तस्य फलत्वमनुपपन्नमित्याशङ्क्याह ।

न प्रतीकेन हि सः ॥ ४ ॥

प्रतीकेन अन्यस्यान्यरूपेणोपासनेन स मोक्षो न भवति । अतस्मिंस्तद्बुद्धिरूपे प्रतीके भेदज्ञानस्य विद्यमानत्वात् । भेददृष्ट्याभिमानेनेतिवाक्ये भेददर्शनस्य संसारप्राप्तिफलकत्वनिरूपणात् ॥ ४ ॥

ननु सर्वं खल्विदं ब्रह्म, आत्मैवेदं सर्वमित्यादौ सर्वत्र ब्रह्मदृष्टिः प्रतीकात्मिका मोक्षसाधनत्वेनोक्ता । अतः प्रतीकोपासनस्य निर्विशेषब्रह्मप्राप्तिलक्षणमोक्षस्य साक्षादसाधनत्वकथनमनुपपन्नमित्याशङ्क्याह ।

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

सर्वस्य वस्तुनो ब्रह्मात्मकत्वेन तत्र ब्रह्मदृष्टेः प्रतीकत्वाभावेन ज्ञानाधिकारोत्कर्षात् सा स्वत एव भवतीत्यर्थः । पूर्वोक्तवाक्येषु त्वनुवादमात्रं, न विधानम् । अतः प्रतीकोपासनस्य न साक्षान्मुक्तिसाधनत्वमिति सम्यगेव ॥ ५ ॥

ननु छान्दोग्ये, प्राचीनयोग्यकं त्वमात्मानमुपास्से इत्यादित्यमेव भगवो राजन्निति होवाचेति, पुनरिन्द्रद्युम्नमङ्के, वायुमेव भगवो राजन्नित्यादावाकाशाऽऽपप्रभृतय आत्मत्वेनोपासनाविषया उक्ताः । तथैवासौ वा आदित्यो देवमध्वित्युपक्रम्य उच्यते, य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्त इति । यद्यपि, सर्वं खल्विदं ब्रह्मेति श्रुतौ सर्वानुवादेन ब्रह्मण्येवोक्तत्वान्न प्रतीकत्वं, तथाप्यत्र तु प्रत्येकमादित्यादौ ब्रह्मत्वोक्तेः प्रतीकत्वमेव । तदुपासनेन फलकथनात् प्रतीकोपासनाया अपि फलसाधकत्वं सूचितम् । एवञ्च पूर्वत्र सर्वं खल्विदं ब्रह्मेतिवाक्ये वस्तुतः सर्वस्य ब्रह्मत्वं नाभिप्रेतं, किन्तु तथा प्रतीकोपासनम् । एवं तत्रापि फलदर्शनात् प्रतीकोपासनस्य फलासाधकत्वकथनमनुपपन्नमित्याशङ्क्याह ।

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

भगवतः स्वरूपभूतशक्त्यात्मकादित्यादौ या ब्रह्मत्वमतय उक्तास्ताः साकारव्यापकस्य ब्रह्मणः प्रत्येकमङ्गमपि तथोपासितं फलदमिति ज्ञापनार्थम् । युक्तं चैतत् । ब्रह्मण आनन्दमात्रकरपादमुखोदरादेरङ्गमपि तादृशमिति नात्र प्रतीकोपासनमित्यर्थः ॥ ६ ॥

एवं सूत्रषट्केन श्रवणाद्यावृत्तौ ज्ञानिनां सर्वत्र जगति प्रत्येकपदार्थेषु च भगवद्रूपत्वेन भानलक्षणफलमुपपाद्याग्रिमसूत्रषट्केन पुष्टिभक्तानां भगवत्स्वरूपाविर्भावात्मकं फलं तत्प्राप्तौ साहजिकमुत्कटस्नेहात्मकं साधनं चाह ।

आसीनः सम्भवात् ॥ ७ ॥

उत्कटस्नेहात्मकसाधनसम्भवाद् भगवांस्तदधीनः सँस्तद्गृहमासीनो भवति ॥ ७ ॥

एवं बहिःसंश्लेषमुक्त्वान्तरपि तदाह ।

ध्यानाच्च ॥ ८ ॥

उत्कटभावेन निरन्तरस्मृतिरूपध्यानादपि हृदि प्रकटः सन्नासीनो भवतीत्यर्थः ॥ ८ ॥

एवमेतादृशभक्तेच्छयैव बहिरन्तश्च भगवत्प्राकट्यमित्युक्त्वा लीलाविष्करणमपि भक्तभावाधीनमित्याह ।

अचलत्वं चापेक्ष्य ॥ ९ ॥

भक्तेच्छामपेक्ष्याचलत्वं, चकाराच्चलत्वमपीत्यर्थः ॥ ९ ॥

स्मरन्ति च ॥ १० ॥

केचन भक्ताः स्वरूपदर्शननिरपेक्षास्तत्स्मरणानन्दमनुभवन्तस्तेनैव विस्मारितापवर्गान्तफलास्तिष्ठन्ति । चकाराद्गुणकीर्तनादिपराणां ग्रहणम् । तदुक्तम् । अथ ह वाव तव महिमामृतसमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकान्तिन इति ।

अनेन श्रवणजन्यभगवत्परत्वमुक्तम् । अथवा ' अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज । साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रिय ' इत्यादिस्मृतयः पूर्वोक्ते भगवतो भक्तवश्यत्वे प्रमाणत्वेनोक्ता एतेन सूत्रेण ॥ १० ॥

ननु बहिर्भगवदाविर्भाववतो भक्तस्यान्तःसदाविर्भाववतश्च न्यूनाधिकभावोऽस्ति, न वेति विशयेऽन्तर्भगवदाविर्भावस्योत्कृष्टत्वात् तद्वतो भक्तस्याधिक्यमितिप्राप्ते, उच्यते ।

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

यत्र भक्तेष्वेकाग्रता एकस्मिन् प्रकटे भगवत्स्वरूपे ग्राहकचित्तधारा, न त्वन्तर्बहिर्विशेषस्तत्र भक्तेषु बहिर्भगवदाविर्भावयुतस्यान्तस्तदाविर्भावयुतस्य च भावे तद्विषये स्वरूपे च विशेषाभावान्न्यूनाधिकभावो नास्तीत्यर्थः । तथाच भक्तेष्वेकाग्रतैवाधिक्यसम्पादिका, न तु बहिराविर्भावोऽन्तराविर्भावो वेतिभावः ॥ ११ ॥

ननु पूर्वमन्तःप्रकटस्य भगवत उत्कटभावाद्यदा बहिराविर्भावस्तदा भक्तस्य पूर्वमिदं स्वरूपमन्तरन्वभूवमधुना बहिरनुभवामीति ज्ञानं भवति, न वेति संशयेऽन्तरनुभवबहिरनुभवयोरत्यन्तवैलक्षण्यात् तादृशज्ञानं भवत्येवेति प्राप्ते, उच्यते ।

आप्रायणात् तत्रापि हि दृष्टम् ॥ १२ ॥

प्रायणं हि सतामहमितिवाक्यात् प्रायणं नाम परमपुरुषार्थरूपं पारलौकिकं फलमुच्यते । एवं सति प्रायणं मर्यादीकृत्य तेषां सैवावस्था नित्या । भगवत्स्वरूपे आन्तरत्वबाह्यत्वानुसन्धानरहिताः केवलस्वरूपैकनिष्ठास्तिष्ठन्तीत्यर्थः । ननु प्रायणानन्तरं भगवति सायुज्यं भविष्यतीत्याशङ्क्याह । तत्रापि हि दृष्टमिति । तत्रापि प्रायणेऽपि पूर्ववद्भगवता सममालापाऽवलोकनर्धामचरणकमलस्पर्शादिकं दृष्टमेव तस्य फलं भवति, नत्वपूर्वं सायुज्यादिकम् । यतोऽयं कृपाविषयोऽतो युक्तमेव तथेति हिशब्दार्थः ॥ १२ ॥

आवृत्तिरसकृदुपदेशादितिसूत्रषट्केन पूर्वं ज्ञानिनां ज्ञानमिश्रभक्तानां च श्रवणाद्यावृत्त्या सर्वत्र जगति भगवद्रूपत्वेन ज्ञानमुक्तम् । जातज्ञानानां तेषामेवाधुना सूत्रत्रयेण जीवन्मुक्तिदशा निरूप्यते।

तत्र मर्यादाभक्तेर्ज्ञानपूर्वकत्वानियमाज्ज्ञानात् पूर्वं सञ्चितकर्मणो सत्त्वात् तदुत्तरमपि कर्मकरणदर्शनाच्च तेषां कर्मणां भोगैकनाश्यत्वनियमान्मुक्तिरनवसरपराहतेत्याशङ्कायामाह ।

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

तस्य ब्रह्मज्ञानस्याधिगमे प्राप्तौ सत्याम् उत्तराघस्याऽश्लेषः पूर्वाघस्य विनाशश्च भवतीत्यर्थः । कुतः । तद्व्यपदेशात् । यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त इतिश्रुतेः । 'यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा' इतिस्मृतेश्चेत्यर्थः ॥ १३ ॥

ननु पापस्य शास्त्रे निन्दितत्वात् तन्निवृत्तिर्ज्ञानेन भवतु, सुकृतस्य तु शास्त्रोक्तसाधनजन्यत्वात् तन्नाशो भोगेनैवेति तथैव मुक्तिरनवसरपराहतेति विशेषाशङ्कायां पूर्वोक्तन्यायमेवातिदिशति ।

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

इतरस्य पुण्यस्याप्येवं पूर्वस्याश्लेष उत्तरस्य विनाश इत्यर्थः । उभे हैवैष तरतीतिश्रुतेः, ज्ञानाग्निः सर्वकर्माणीतिस्मृतेश्च तद्व्यपदेशादित्यर्थः । ननु तादृशज्ञानितो मर्यादामार्गीयत्वात् कदाचिद् भरतजयादिवत् सङ्गदोषेण भगवद्भावात् पाते सति विहितनिषिद्धकर्मसम्बन्धे पूर्वोक्तदोषनादवस्थ्यमित्याशङ्क्य सूत्रैकदेशेन परिहरति । पाते त्विति । एवमसंश्लेष इत्यनुवर्त्यते । मर्यादामक्तौ भगवद्भावाच्च्युतिः पात इत्युच्यते । अप्यर्थे तुः । तथाच, न कर्हिचिन्मत्पराः शान्तरूपे नङ्क्ष्यन्तीतिवाक्यात् तेषां पातो न सम्भवति । तथापि भगवदिच्छया मर्यादामार्गीयत्वात् भगवांश्चेत् तथा करोति, तथाप्युत्तरसुकृतदुष्कृतकर्मणोरसंश्लेष एवेत्यर्थः ॥ १४ ॥

ननु देहस्य कर्मजत्वाद् भक्तिमिश्रज्ञानेन कर्मनाशाद्देहनाशे सति ज्ञानितः पयत्वनानुपपत्तिर्जिज्ञासोश्च तादृशगुरोरभावेन गुरूपसत्त्याद्यसम्भवेन मार्गोच्छेदापत्तिश्चेत्याशङ्क्य परिहरति ।

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

पूर्वं पूर्वसूत्राभ्यां ज्ञाननाश्यत्वेन प्रोक्ते सुकृतदुष्कृतकर्मणी ते अनारब्धे भोगायतनानारब्धं कार्यं याभ्यां तादृशे एव नश्यते, नाशिते। ननु ज्ञानं सर्वकर्मदहनेऽसहायशूरमिति पूर्वमुक्तं, तत कथमुच्यतेऽनारब्धकार्यकर्मनाशकमिति । तत्राह । तदवधेः । तत् ज्ञानेनारब्धकार्यकर्मादहनम् अत्रधेः कार्यमात्रस्य पूर्वावधिरूपभगवदिच्छात इत्यर्थः । तथाचाखिलकर्मदहनसर्वसमर्थस्यापि ज्ञानस्य भगवदिच्छया प्रतिबन्धात् प्रारब्धकार्यविषये सङ्कोच इत्यर्थः ॥ १५ ॥

ननु जीवन्मुक्तानां प्रारब्धकर्मभोग एव कर्तव्यो, न त्वन्यदप्यग्निहोत्रादि । दृश्यते च जनकादीनां तत्करणम्।अतः कृतस्य कर्मणः फलावश्यम्भाव इत्याशङ्क्य तेषां कर्मकरणप्रयोजनमाह ।

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

तुशब्दः पक्षव्यावर्तकः । तेषामग्निहोत्रादिकरणं तत्कार्यायैव प्रारब्धकर्मनाशायैव । तेषामग्निहोत्रादिकारकं प्रारब्धमस्तीति तद्भोगार्थं कर्म क्रियते, न त्वपूर्वफलार्थम् । कुतः । तद्दर्शनात । यथाकारी यथाचारी तथा भवति, साधुकारी साधुर्भवति पापकारी पापो भवति, पुण्यः पुण्येन कर्मणा भवति, पापः पापेनेतिश्रुतिदर्शनात् । एतच्छ्रुत्या पूर्वपुण्यस्य कर्मणोऽग्रिमपुण्यकर्मजनकत्वमुक्तमिति तद्भोगार्थमेवाग्रिमकर्मकरणमित्यर्थः । एवं मर्यादामार्गस्य मर्यादयैव मोक्षप्रतिबन्धो मर्यादयैव ज्ञानेन तन्नाश इति निरूपितम् ॥१६॥

पूर्वम्, आसीनः सम्भवादिति सूत्रषट्केन पुष्टिभक्तानां भगवदाविर्भावात्मकं फलमुक्तम्।अधुना तेषामेव ज्ञानिवैलक्षण्येन भगवत्कृपया भोगं विनैव प्रारब्धाप्रारब्धकर्मनाशपूर्वकं सद्य एव भगवद्भोगात्मकं फलमुच्यते सूत्रत्रयेण ।

अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥

एकेषां पुष्टिभक्तानामुभयोः प्रारब्धाप्रारब्धयोर्भोगं विनैव नाशो भवति। कुतः । अतः श्रुतेरित्यर्थः । यतः कर्मणो ज्ञाननाश्यत्वनिर्णायकाया ज्ञानिनः प्रवचनादिनिरूपणेन ज्ञानानाश्यप्रारब्धाद्यपक्षेपकश्रुतेर्भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यत इत्यादिरूपाया अन्यापि श्रुतिः पठ्यते । तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां

द्विषन्तः पापकृत्यामिति ॥ १७ ॥

ननु ब्रह्मज्ञानेनानाश्यस्य प्रारब्धस्य भोगैकनाश्यस्य पुष्टिमार्गीये भक्ते कथं कृपया नाश इत्यसम्भावनां निराकर्तुं कैमुतिकन्यायेनाह ।

यदेव विद्ययेति हि ॥ १८ ॥

भगवज्ज्ञानशक्तेरंशभूता जीवनिष्ठा विद्या । एवञ्च यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवतीतिश्रुत्या भगवच्छक्त्यात्मकविद्यासम्बन्धाज्जीवकृतकर्मणो वीर्यवत्तरत्वं यत्र तत्र साक्षाद्भगवत्कृपया प्रारब्धनाशे किमु वक्तव्यमित्यर्थः ॥ १८ ॥

एवं पुष्टिमार्गे प्रतिबन्धाभावमुपपाद्य फलप्राप्तिं निरूपयति ।

भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यते ॥ १९ ॥

इतरे स्थूललिङ्गशरीरे क्षपयित्वा त्यक्त्वा । अथ भगवल्लीलानुभवयोग्यालौकिकदेहसम्पत्त्यनन्तरं भोगेन सम्पद्यते । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेतिश्रुतेरित्यर्थः ॥ १९ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां चतुर्थाध्यायस्य प्रथमः पादः ॥ ४ ॥ १ ॥

चतुर्थाध्यायस्य द्वितीयः पादः ।

पूर्वपादान्ते, इतरे क्षपयित्वेत्यनेन पुष्टिभक्तः स्थूललिङ्गशरीरे क्षपयित्वा भगवदानन्दं प्राप्नोतीत्युक्तम् । तत्र सर्वेन्द्रियाणां युगपदेव भगवति लयः, प्रणाड्या वेति संशये प्रणाड्यैवेति वक्तुं प्रणाडीमाह ।

वाङ् मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

भक्तस्योत्कटभावेन भगवदिच्छया भगवदाविर्भावेन तद्दर्शने जाते, दृग्भ्यां प्रपश्यन् प्रपिबन्निवाभेकश्चुम्बन्निवास्येन भुजैरिवाश्लिष्यन्निति रीत्या सर्वेन्द्रियैः स्वरूपानुभवेच्छायां प्रथमं तेन सहालापेच्छा भवति । ततो मानसिकभावेन भगवदाविर्भावो जात इति मनसि प्रभुनैकट्यमस्तीति तेन सम्बन्धे तत्प्राप्तिर्भविष्यतीति पूर्वं वाग् मनसि सम्पद्यते लीयत इत्यर्थः । कुतः । तद्दर्शनात् । पूर्वोक्तरीत्या तद्दर्शनानन्तरमेवम्भावजननाद् दर्शनस्य हेतुत्वम् । अत एव छान्दोग्ये वाङ् मनसि सम्पद्यत इति श्रुतिः । दर्शनाभावे वेण्वादिशब्दश्रवणेनापि सर्वेन्द्रियैः स्वरूपानुभवेच्छा जन्यत इति शब्दाच्चेत्युक्तम् ॥ १ ॥

अत एव सर्वाण्यनु ॥ २ ॥

अत एव दर्शनाच्छब्दाच्च हेतोः सर्वाणीन्द्रियाणि, अनु वागल्पानन्तरं मनसि सङ्गतानि भगवदानन्देन सम्पद्यन्त इत्यर्थः ॥२॥

तन्मनः प्राण उत्तरात् ॥ ३ ॥

सर्वेन्द्रिययुक्तं मनः प्राणे सम्पद्यते । कुतः । उत्तरात् । श्रुतिवाक्यादित्यर्थः । स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयत इत्युक्त्वाऽग्रे हेतुमाह, प्राणबन्धनं हि सोम्य मन इति । अतस्तथेत्यर्थः ॥ ३ ॥

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

स सर्वेन्द्रिययुक्तमनःसहितः प्राणोऽध्यक्षे प्रकटे भगवति सम्पद्यत इत्यर्थः। कुतः। तदुपगमादिभ्यः। तस्य भगवत उपगमोऽभ्युपगमः पुष्टिमार्गेऽङ्गीकारः। आदिपदाद् भगवद्वशीकरणसमर्थः स्नेहो भगवत्प्राप्तिप्रतिबन्धकरदार्थत्यागस्तत्प्रसादानुकूलं भजनं च संगृह्यते ॥ ४ ॥

एवं पुष्टिभक्ते सर्वेन्द्रियलयप्रकारो निरूपितः। ज्ञानिनः, तदधिगमेत्यादिसूत्रत्रयेण जीवन्मुक्तिदशा निरूपिता। अधुना तस्येन्द्रियाणां लयोऽपेक्षित इति तल्लये प्रकारान्तरमाहैकेन सूत्रेण।

भूतेषु तच्छ्रुतेः ॥ ५ ॥

मर्यादाभक्तानामिन्द्रियाणि भूतेषु लीयन्ते। कुतः। तच्छ्रुतेः। यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयत इति श्रुतेः॥५॥

ननु मर्यादामार्गीयो भक्तो ज्ञानी च भवतः।पूर्वोक्तनिर्णयस्तु ज्ञानिविषय एव। मर्यादाभक्तं तु कदाचिद् भगवान् पुष्टावङ्गीकरोतीत्याशङ्क्याह।

नैकस्मिन् दर्शयतो हि ॥ ६ ॥

एकस्मिन् ज्ञानिनि नियमेन मर्यादायामङ्गीकार इति नियमो न, किन्तु मर्यादाभक्ते ज्ञानिनि चोभयोरेव मर्यादायामङ्गीकार इति नियम इत्यर्थः। न तु कदाचिन्मर्यादाभक्तं पुष्टावपि प्रवेशयतीत्यर्थः। कुतः। दर्शयतो हि। यतो याज्ञवल्क्यार्तभागौ तथैव दर्शयतः। तथाहि। यत्रायं पुरुषो म्रियत उदस्मात् प्राणा उत्क्रामन्त्याहो नेत्यार्तभागप्रश्ने याज्ञवल्क्योऽत्रैव समवलीयन्त इत्युक्तवान्, यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येतीत्यारभ्य रेतश्च निधीयत इत्यन्तमुक्तवान्। ततः क्वायं पुरुषो भवतीति प्रश्ने, उभाभ्यां विचारितमुत्तरमुच्यते, तौ ह यदूचतुः कर्म हैव तदूचतुरित्यादिना। अत्र प्राणानामत्रैव लयोक्त्या मुक्तिविषयेयं श्रुतिरिति युक्तम्। अमुक्तस्य

प्राबल्यासम्भवात्। तथाच मुक्तस्य कर्मणि स्थितेरसम्भवात् क-मवद्भेन मर्यादैव ग्राह्या। तथाच मुक्तिविषयौ ज्ञानिमर्यादाभक्तौ कर्मणि मर्यादायामेव तिष्ठतो, न तु कदाचित् पुष्टावपीति तयो-रभिप्रायो ज्ञायते। तथाच ज्ञानिमर्यादाभक्तयोरुभयोर्मर्यादायामङ्गी-कारनियमो, न त्वेकस्मिन्नपीति भावः॥ ६॥

नन्वेवं मर्यादापुष्टयोर्नियतविषयत्वे किं नियामकमित्याकाङ्क्षा-यां तयोः स्वरूपमेव तादृशमित्याह।

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥७॥

मर्यादामार्गे हि साधनक्रमेणैव मुक्तिः, पुष्टिमार्गे तु श्रवणाद्य-तिरिक्तज्ञानकर्मादिसाधनं विनैव मुक्तिप्राप्तिरिति नियतम्। तदा-ह। आसृत्युपक्रमात् समाना। सृतिर्जीवानां भगवतः पृथग्भूय संसरणम्। तस्या उपक्रममारभ्य मर्यादीकृत्य मोक्षपर्यन्तं साधनेनै-व मुक्तिरेवरूपा मर्यादा समाना मध्ये नान्यथा भवतीत्यर्थः। एवं पुष्टिमार्गे अमृतत्वं चानुपोष्य। अत्रोपोषणपदं साधनमात्रोपलक्ष-कम्। तथाच साधनमात्रमकृत्वा केवलकृपया अमृतत्वमपि तन्मार्गे नियतमित्यर्थः॥ ७॥

नन्वेवमपि मर्यादामार्गीयशुद्धजीवस्य मोक्षसम्भवाद् याज्ञ-वल्क्यार्तभागाभ्यां कर्म हैव तत्प्रशशंसतुरित्यनेन तन्मुक्तेः कर्मत्वेन कथनं कुत इत्याशङ्क्याह।

तदाऽपीतेः संसारव्यपदेशात् ॥ ८ ॥

तदा पुष्टिफलदशायाम् अपीतेर्मर्यादामार्गीयमोक्षस्य संसा-रव्यपदेशात् तन्मुक्तौ भगवत्स्वरूपानन्दानुभवाभावात् संसारतुल्य-त्वेनेत तात्पर्यं तथा निरूपितमित्यर्थः॥ ८॥

ननु पुष्टिमार्गीय तत्त्वमेतादृशं यत्र मुक्त्यात्मकफलस्यापि संसारत्वेन गणना, तर्हि तस्यैवाप्यवर्हितत्वात् स्तुतेर्युक्ततया मुक्ति-साधकवाक्यानां प्रतारकत्वापत्तिरित्याशङ्क्याह।

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

पुष्टिमार्गीय तत्त्वं सूक्ष्मं दुर्ज्ञेयमित्यर्थः। तस्यानुभवैकवेद्य-

त्यादनुभवस्य च दुर्लभाधिकारिविषयत्वादन्याविषयमेव तत् । मोक्षस्य च शुद्धाधिकारिमात्रविषयत्वात् स्तुतेरबाधितविषयत्वात् नेदावैदकप्रमाणस्य न प्रतारकत्वमिति भावः । नन्वेवमतिनिगूढपुष्टितत्त्वमङ्गीव किं मानमित्याशङ्क्याह । प्रमाणतश्च तथोपलब्धेः । यतो वाचो निवर्तन्ते अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति श्रुतौ पूर्वार्द्धेन मनोवागगम्यत्वेन दुर्ज्ञेयत्वमुक्त्वोत्तरार्द्धेन विद्वानिति तत्सत्ता बोध्यते । अतस्तद् दुर्ज्ञेयत्वेनैव श्रुतिबोधितमिति तामङ्गीव न विवदितव्यम् । चकारात् तादृशभक्तानुभवोऽपि मानमिति सूच्यते ॥ ९ ॥

नन्वेतादृशपुष्टितत्त्वसत्त्वे यथा ब्रह्मविदः स्वमार्गीयं तत्त्वमुपदिशन्ति, तथैतेऽपि कुतो नोपदिशन्तीत्याशङ्क्य तत्र निदानमाह ।

नोपमर्देनातः ॥ १० ॥

ऐश्वर्यभावे ह्युपदेशनम् । तेषां तु विरहदशा सभगवत्सङ्गमदशा चेति दशाद्वयम् । तत्र विरहे तद्भावेनान्यभावानामैश्वर्यभावादीनामुपमर्देनोपदेशो न सम्भवति । सङ्गमे तु अतः पुर प्रकटानन्दात्मकप्रभुस्वरूपाद्धेतोस्तदानन्दानुभवनिमग्नचित्तत्वेनान्येभ्यः सख्यादिभ्योऽप्युपदेशो न सम्भवतीत्यर्थः ॥ १० ॥

ननु रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवतीतिश्रुते रसात्मकभगवत्स्वरूपानुभवेनानन्दिनानां तेषामानन्दतिरोधानात्मकविरहदुःखं न सम्भवतीत्याशङ्क्याह ।

अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥

अस्यैव आनन्दात्मकभगवत एव धर्म ऊष्मा विरहताप इत्यर्थः । नन्वानन्दात्मकस्य दुःखरूपो धर्मः कथमित्याशङ्क्याह । उपपत्तेरिति । शृङ्गारस्थायिभावात्मकप्रभुस्वरूपस्यान्तरनुभावकत्वात् सोऽपि सुखस्वरूप एवोपपद्यते, न तु दुःखात्मकः । निर्वेदग्लान्यादिरूपव्यभिचारिभावात् तथा भानमात्रमित्यर्थः ॥ ११ ॥

ननु, न पश्यो मृत्युं पश्यति नरो तद्दुःखमित्यादिश्रुतेर्निर्वेदग्लान्यात्मकदुःखस्याप्यसम्भव इत्याशङ्क्य श्रुतेस्तात्पर्यमाह ।

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

अत्र श्रुतौ शारीरमेव दुःखं प्रतिषिध्यते, न तु शृङ्गाररसव्यभिचारिभावात्मकं, रोगसहपाठादिति भावः ॥ १२ ॥

स्पष्टो ह्येकेषाम् ॥ १३ ॥

एकेषां शाखिनां प्रभुस्वरूपप्राप्त्यनन्तरं दुःखनिवृत्तिरूपोऽर्थः स्पष्टः पठ्यते, रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवतीत्यादिना ॥ १३ ॥

स्मर्यते च ॥ १४ ॥

भगवद्भावस्य मरणहेतुत्वं, तेनैव जीवनं, तद्भावस्याखिलदुर्लभत्वं च श्रीभागवते स्मर्यते । ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः । ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहमित्यारभ्य धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चनेति भगवद्वचनेन । एताः परं तनुभृतो भुवि गोपवध्वो गोविन्द एव निखिलात्मनि रूढभावाः । वाञ्छन्ति यं भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनन्तकथारसस्येति श्रीमदुद्धववचनेन ॥ १४ ॥

नन्वेवं भगवदाविर्भावतद्दर्शनेन विरहोत्कण्ठ्य, ततः प्रभुप्राकट्येन पूर्णानन्ददानमित्यादिकं वैकुण्ठेऽपि दुर्लभं कुत्र दृष्टमित्याकाङ्क्षायामाह ।

तानि परे तथा ह्याह ॥ १५ ॥

तान्युक्तानि वस्तूनि परे वैकुण्ठादप्युत्कृष्टे श्रीगोकुले श्रीगोवर्द्धने वसन्तीति शेषः । तथाहि, ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयास इत्यादिका श्रुतिराह ॥ १५ ॥

ननु परमकृपया कमपि भक्तं नित्यलीलायां प्रवेशयति चेत् तदा कश्चित्काले तत्र स्थापयित्वा ततस्तं वियोजयति, उत तत्रैव स्थापयति नित्यमित्याशङ्कायां सिद्धान्तमाह ।

अविभागो वचनात् ॥ १६ ॥

अत्र भक्तस्याविभाग एव ततः । कुतः । वचनात् । तद्विष्णोः

परमं पदं सदा पश्यन्ति सूरय इतिश्रुतेरित्यर्थः। एवं पुष्टिभक्तफलानुभवप्रकारो निरूपितः॥ १६॥

भूतेषु तच्छ्रुतेरित्यनेन ज्ञानिन इन्द्रियाणां भूतेषु लयो निरूपितः। अधुना निरिन्द्रियस्य तस्योत्क्रमणप्रकारं पञ्चसूत्रैराह।

तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया॥ १७॥

स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीतिश्रुतेस्तस्यात्मन ओकः स्थानं हृदयं तदग्रं प्रथमं ज्वलति। पूर्वमप्रकाशमानमपि तदा प्रकाशते। तेन प्रकाशितं द्वारं गमनमार्गो यस्य तादृश उत्क्रामति। तस्य हैतस्य हृदयस्याग्रं प्रद्योतत इत्यादिश्रुत्याऽप्ययमेवार्थ उक्तः। इदं सर्वं जीवसाधारणं निष्क्रमणम्। विदुषस्तु मार्गे विशेषमाह। शताधिकया। एकशततम्या, शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका, तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्तीतिश्रुत्युक्तया निष्क्रामति। यतः स हार्दानुगृहीतो हृदयस्थितेन भगवताऽनुगृहीतः। तदनुग्रहे हेतुः। विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्चेति। ब्रह्मविद्यासामर्थ्याद्। तस्या विद्यायाः शेषभूता अङ्गभूता या गतिः प्रव्रजनरूपा तत्र या भगवतोऽनुस्मृतिः स्मरणं तत्संबन्धाद् यो भगवदनुग्रहस्तेन तया निष्क्रामतीत्यर्थः॥ १७॥

नन्वोकोऽग्रज्वलनादेः सर्वसाधारण्येऽपि यथा हार्दानुग्रहाद्विदुष एव सुषुम्णयोत्क्रमणमुक्तं, तथाऽथैतैरेव रश्मिभिरूर्ध्वमाक्रामतीतिश्रुत्युक्तं रश्मिद्वारमाक्रमणं सर्वसाधारणं, विदुष एव वेति संशये सिद्धान्तमाह।

रश्म्यनुसारी॥ १८॥

विद्वानेव रश्मिद्वारा गच्छतीत्यर्थः॥ १८॥

ननु विदुष उत्क्रमणे यथा हार्दानुग्रहकृतो विशेषस्तथा दिवायनात्मककालविशेषकृतोऽपि भविष्यतीति शङ्कां निराकुर्वन्नहोरात्रकृतविशेषमाशङ्क्य निराकरोति।

निशि नेति चेन्न सम्बन्धस्य यावद्देहभावि-
त्वाद्दर्शयति च ॥ १९ ॥

निशि विदुष उत्क्रमणं नेति चेन्न । कुतः । सम्बन्धस्य यावद्देहभावित्वात् । अनुग्रहहेतुभूतो यो गत्यनुस्मृतिसम्बन्धस्तस्य यावद्देहभावित्वात् तज्जन्यानुग्रहस्य सत्त्वात् तद्बलेन कालस्याप्रयोजकत्वमित्यर्थः । यत श्रुतिरेव दर्शयति । एतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्तीति ॥ १९ ॥

अतोऽयनकृतोऽपि विशेषो नास्तीत्याह ।

अतश्चायनेऽपि दक्षिणे ॥ २० ॥

उत्क्रमणनियमो विदुषो नास्तीत्यर्थः ॥ २० ॥

ननु श्रीभगवद्गीतास्वनावृत्तिमार्गमुपक्रम्याग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्, तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना इत्युक्त्या विदुषोऽपि कालविशेषापेक्षास्तीत्याशङ्क्याह ।

योगिनः प्रति स्मर्यते स्मार्ते चैते ॥ २१ ॥

अयं कालनियमो योगिन प्रति स्मर्यते, न ब्रह्मविदं प्रति । यत एते योगसाङ्ख्ये स्मार्ते । श्रौतस्य तु ज्ञानमार्गस्यासहायशूरत्वान्नान्यसापेक्षत्वमिति भावः ॥ २१ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां चतुर्थाध्यायस्य
द्वितीयः पादः ॥ ४ ॥ २ ॥

चतुर्थाध्यायस्य तृतीयः पादः ।

पूर्वपादे ब्रह्मविद उत्क्रमणप्रकारमुक्त्वा मोक्षमार्गमस्मिन् पादे विचारयति । तत्र श्रुतावर्चिरादिमार्गेण गमनमुक्तम् । तज्ज्ञानमार्गीयमर्यादाभक्तयोरुभयोरुत ज्ञानिन एवेति संशये निर्णयमाह ।

अर्चिरादिना तत्प्रथितेः ॥ १ ॥

अर्चिरादिमार्गेण प्रायशो ज्ञानमार्गीय एव गच्छति कश्चित्तु मर्यादाभक्तोऽपि । तस्य प्रायः सद्यो मुक्तेरेव सम्भवादिति भावः । कुतः । तत्प्रथितेः । तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्तीत्यादिना ज्ञानमार्गीयस्यैव तत्रोत्कर्षकथनात् ॥१॥

नन्वर्चिरादिमार्गनिरूपकच्छान्दोग्यश्रुतौ वायुलोको न पठ्यते । कौषीतकिश्रुतौ स्वाग्निलोकानन्तरं स पठ्यत इत्युभयश्रुत्यैक्ये एवार्चिरादिमार्गः प्रतिपाद्यत इति वायुलोकोपसंहारावश्यकत्वे छान्दोग्ये कुत्र तस्योपसंहार इत्याकाङ्क्षायामाह ।

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

छान्दोग्ये मासेभ्यः संवत्सरं संवत्सरादादित्यमित्यत्र संवत्सरादुत्तरं वायुलोको निवेशयितव्यः । कुतः । अविशेषविशेषाभ्याम् । अर्चिरारभ्य संवत्सरान्तानां भूसम्बन्धित्वेनाविशेषात् तन्मध्ये वायुर्न निवेशनीयः । भूलोकादुपर्यन्तरिक्षलोकस्तदुत्तरं द्युलोकः । एवञ्च, वायुरन्तरिक्षस्याधिपतिरिति श्रुतेः, सूर्यो दिवोऽधिपतिरिति श्रुतेरेतयोः पौर्वापर्ये विशेषो हेतुरस्तीति सूर्यलोकात्पूर्वं वायुलोको निवेशनीय इत्यर्थः ॥ २ ॥

तडितोऽधि वरुणः सम्बन्धात् ॥ ३ ॥

चन्द्रमसो विद्युतमित्यत्रोक्तविद्युल्लोकात् परतो वरुणलोको निवेशनीयः । कुतः । सम्बन्धात् । तडितो जलसम्बन्धित्वाद् घनशब्दपातित्वात् सम्बन्धः ॥ ३ ॥

वरुणाच्चाधीन्द्रप्रजापती ॥ ४ ॥

वरुणलोकात् परमिन्द्रलोकः प्रजापतिलोकश्च निवेशनीयः । अत्र सम्बन्धादित्यनुवर्तते । एवं चेन्द्रस्य सर्वदिक्पालेषु मुख्यत्वात् प्रजापतेः सर्वदेवाधिपतित्वात् सम्बन्धोऽस्तीति भावः ॥ ४ ॥

ननु श्रुतौ विद्युल्लोकानन्तरं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयतीत्युक्त्वा, यावद्वचनं वाचनिकमितिन्यायेन येषां विद्युदनन्तरमेव ब्रह्मप्राप्तिस्तेषामातिवाहिकसम्बन्धो, येषां तु तदनन्तरं वरुणेन्द्रप्रजापतिलोकप्राप्तिस्तेषां तत्सम्बन्धो न भविष्यतीत्याशङ्क्याह ।

आतिवाहिकास्तल्लिङ्गात् ॥ ५ ॥

एकस्मिन्नेव मार्गेऽन्यलोकानामुपसंहारान्मार्गभेदे प्रमाणाभावात् प्रजापतिलोकोत्तरमातिवाहिका उपसंहर्तव्याः । कुतः । तल्लिङ्गात् । तत्पुरुषोऽमानव इत्यत्र पुरुषस्य ब्रह्मसम्बन्धित्वं लिङ्गमुच्यते । एवञ्च यथान्यलोकप्राप्तिर्विद्याबलात्र तथा ब्रह्मप्राप्तिः, किन्तु तदीयपुरुषसम्बन्धेनैवेति ज्ञाप्यते ॥ ५ ॥

ननु देवयानमार्गे प्राप्तानां तेषामिह न पुनरावृत्तिरस्तीत्यादिश्रुतिभ्योऽवश्यं ब्रह्मविदेन सद्यो मुक्तिं परित्यज्य तत्तल्लोककामना कुतः । अथ च, यत् कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्, सर्वं तद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा, स्वर्गापवर्गं मद्धाम कथञ्चिद् यदि वाञ्छतीति भगवद्वाक्याद् भक्तस्याप्येतद्विषयिणी वाञ्छा फलं च सम्भवति । तद्भक्तिरसं हित्वा कुत इत्याकाङ्क्षायामाह ।

उभयव्यामोहात्तत्सिद्धेः ॥ ६ ॥

देवयानमार्गस्यापि भगवतैव सृष्टत्वाद्धीनाधिकारिणां तदयोग्यत्वादुत्तमाधिकारिणां चेत् तत्कामना न स्यात् तदा मार्गवैयर्थ्यं स्यात् । एवञ्च स्वकृतमार्गसाफल्याय भगवानेव काँश्चन ज्ञानिनो मर्यादाभक्ताँश्च व्यामोहयतीति तत्कामनातस्तेषां तत्फलभोग इत्यर्थः ॥ ६ ॥

ननु विद्युल्लोकाद् वरुणादिलोकप्राप्तिर्यस्य भवति तस्य वैद्युतः पुरुष एव ब्रह्मप्रापक, उत स्वत एव ब्रह्म प्राप्नोतीतिसंशये निर्णयमाह ।

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ७ ॥

नहि ब्रह्मप्राप्तिः स्वतो भवति, किन्तु ब्रह्मसम्बन्धिपुरुषसामर्थ्येन । एवञ्च यतो ब्रह्मप्राप्तिस्ततस्तत्सम्बन्धिपुरुषेणैव । कुतः । तच्छ्रुतेः । तान् वैद्युतात् पुरुषो मानस एत्य ब्रह्मलोकानामयतीति श्रुतेः । अत्र वैद्युतलोकमागच्छतीति वैद्युत उक्तो, नतु तल्लोकवासित्वेन । एत्येतिकथनात् । अत एव भगवन्मनोऽभिलषितं भक्तं प्रापयतीति मानस उक्तः ॥ ७ ॥

अत्र स एतान् ब्रह्म गमयतीत्यत्र ब्रह्मपदेन कार्यब्रह्मलोक, उत परब्रह्मैवेतिसंशये परब्रह्मणो व्यापकत्वाद् गन्तव्यत्वानुपपत्तेर्ब्रह्मलोकपरमिति बादरिमतमुपन्यस्यति ।

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ८ ॥

स एतान् ब्रह्म गमयतीत्यत्र कार्यं ब्रह्मोच्यते । कुतः । अस्य गन्तुस्तत्रैव गमनमुपपद्यते, न तु परब्रह्मणि व्यापकत्वादितिभावः॥८॥

विशेषितत्वाच्च ॥ ९ ॥

ब्रह्मलोकान् गमयतीतिश्रुतौ बहुत्वेन लोका विशेषिताः । तेषु ब्रह्मलोकेषु पराः परावतो वसन्तीतिश्रुतौ वासकर्तृत्वेन गन्तारो विशेषिता इति कार्यं ब्रह्मैव ग्राह्यं, न परं ब्रह्म तस्यैकत्वात् ॥ ९ ॥

तर्हि तत्र ब्रह्मपदप्रयोगे को हेतुरित्याशङ्क्याह ।

सामीप्यात्तु तद्व्यपदेशः ॥ १० ॥

तल्लोकप्राप्तौ लोकान्तरप्राप्तिं विनैव परब्रह्मप्राप्तिरिति ब्रह्मसामीप्याद् ब्रह्मत्वेन व्यपदेशः कृतः ॥ १० ॥

नन्वाब्रह्मभुवनाल्लोकाः पुनरावर्तिन इति वाक्यात् ततः पुनरावृत्तिः श्रूयते । श्रुतौ तु, तेषामिह न पुनरावृत्तिरस्तीत्युच्यते । अतः परब्रह्मैवात्र ग्राह्यमित्याशङ्क्याह ।

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ ११ ॥

कल्पावसाने कार्यब्रह्मलोकस्यात्यये नाशे तदध्यक्षेण चतुर्मुख-

ब्रह्मणा सह अतो ब्रह्मणः परमीश्वरं प्राप्नोतीत्यतोऽपुनरावृत्तिश्रुतेर्न विरोधः । कुतः । अभिधानात् । वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद् यतयः शुद्धसत्त्वाः । ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे ' इति श्रुतौ तथाभिधानादित्यर्थः ॥ ११ ॥

स्मृतेश्च ॥ १२ ॥

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमितिस्मृतेः पूर्वोक्त एवार्थः ॥ १२ ॥

एवं प्राप्ते सिद्धान्तमाह ।

परं जैमिनिर्मुख्यत्वात् ॥ १३ ॥

स एतान् ब्रह्म गमयतीति ब्रह्मपदेन परं ब्रह्मैवेति जैमिनिराचार्यो मन्यते । कुतः । मुख्यत्वात् । ब्रह्मपदस्य मुख्या वृत्तिः परब्रह्मण्येव, गौणी त्वन्यत्र । तथा च मुख्यसम्भवे गौणार्थस्यायुक्तत्वात् ॥ १३ ॥

दर्शनाच्च ॥ १४ ॥

स एतं देवयानं पन्थानमापद्येत्यादिश्रुतौ, स प्रजापतिलोकं स ब्रह्मलोकमिति प्रजापतिलोकात् पार्थक्येन ब्रह्मलोककथनदर्शनादित्यर्थः ॥ १४ ॥

न च कार्ये प्रतिपत्त्यभिसन्धिः ॥ १५ ॥

ब्रह्मविदाप्नोति परमित्युक्त्वा तद्विवरणवाक्ये, सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्यनेन भगवता सह सर्वकामोपभोगलक्षणा प्रतिपत्तिरुच्यते । सा कार्यब्रह्मलोके न सम्भवतीत्यर्थः । अतोऽत्र परमेव ब्रह्म प्राह्यमिति भावः ॥ १५ ॥

क्रममुक्त्यधिकारिणः प्रारब्धभोगानन्तरममानवपुरुषप्रापिताः परं ब्रह्म प्राप्नुवन्तीत्युक्तम् । अथार्चिरादिलोकप्राप्तान् सर्वानेवामानवः पुरुषो ब्रह्म गमयत्युत कांश्चिदेवेति विचारे, ब्रह्मप्रापणार्थमेव तस्य नियुक्तत्वादर्चिरादेर्ब्रह्मलोकमार्गत्वात् तत्र गतान् सर्वानेव ब्रह्म प्रापयतीति प्राप्ते, उच्यते ।

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च ॥ १६ ॥

उपास्यरूपाणि वस्तुनोऽब्रह्मरूपाणि, तेषु ब्रह्मत्वेनोपासनं वेदबोधितत्वात् सफलमिति ज्ञात्वा य उपासते ते प्रतीकालम्बनाः। एवमपि वेदबोधितत्वेनोपासनायाः कृतत्वात् तेषामर्चिरादिलोकप्राप्तावपि तानमानवः पुरुषो ब्रह्म न नयति, किन्तु तद्भिन्नान्। ये वस्तुतः सर्वं ब्रह्मेति ज्ञात्वा तत्त्वेनोपासते तानेव नयतीति बादरायण आचार्यो मनुते। कुतः। उभयथा दोषात्। वस्तुनो ब्रह्मरूपेऽब्रह्मत्वनिश्चय उपासनार्थे, तत्र ब्रह्मत्वज्ञानं चेत्युभयथा दोषात् तेषां न ब्रह्मप्राप्तावधिकार इति, न तान् प्रापयतीत्यर्थः। योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चौरेणात्मापहारिणेति तादृशभावनाया निषिद्धफलकथनात्। एवं ज्ञानमार्गीये भेदद्वयं निरूप्य भक्तिमार्गीयव्यवस्थामाह। तत्क्रतुश्च। स भगवद्भजनलक्षणः क्रतुर्यस्य स तत्क्रतुः। स तु भक्तिबलात् स्वयमेव परं ब्रह्म गच्छतीत्यर्थः ॥ १६ ॥

पूर्वम्, अविभागो वचनादित्यनेन पुष्टिभक्तस्य लीलापरिकरादविभागो भवतीति फलमुक्तम्। तस्यैव ज्ञानिफलाद्विशेषं वक्तुमधिकरणारम्भः। तत्र सर्वाण्युपास्यरूपाणि शुद्धब्रह्मरूपाण्येवेति तदुपासकानां परप्राप्तिरेवेत्युक्तम्। तत्र ज्ञानमार्गीयाणामुपासकानां भक्तिमार्गीयाणां चाविशेषेणैव परप्राप्तिर्भवत्युत कश्चन विशेषोऽस्तीति संशये, उभयोरपि ब्रह्मोपासकत्वाविशेषेणैव भवतीति प्राप्ते, उच्यते।

विशेषं च दर्शयति ॥ १७ ॥

श्रुतिरिति शेषः। सा च 'ब्रह्मविदाप्नोति परमिति, नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्य' इति च। एवंच यस्य वरणविशिष्टब्रह्मज्ञानं तस्य परब्रह्मप्राप्तिर्यस्य तु केवलब्रह्मज्ञानं तस्याऽक्षरप्राप्तिरिति विशेषो बोध्यः ॥ १७ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां चतुर्थाध्यायस्य तृतीयपादः ॥ ४ ॥ ३ ॥

चतुर्थाध्यायस्य चतुर्थः पादः ।

पूर्वपादान्ते परफ्युक्तब्रह्मविदः पुष्टिमार्गीयस्य परप्राप्तिरुक्ता। तत्र स सायुज्यं प्राप्य भगवदानन्दमनुभवत्युत देहेन्द्रियादिसङ्घातं प्राप्य भेदेनानुभवतीति संशये, न स पुनरावर्तत इति, तेषामिह न पुनरावृत्तिरस्तीति च श्रुतेस्ततो जन्माभावात् सायुज्यं प्राप्यैवानुभवतीति प्राप्ते, उच्यते ।

सम्पद्याविर्भावः स्वेन शब्दात् ॥ १ ॥

सम्पद्य ब्रह्म प्राप्य स्थितस्य जीवस्य भगवदत्यन्तानुग्रहवशात् तस्य स्वरूपानन्ददित्सायामाविर्भावो, न तु जन्म । सोऽपि स्वेन भगवत्सामर्थ्येन, न तु कर्मादिना । तथाचोक्तश्रुत्योः प्राकृतजन्माभावनिषेधकत्वं, न तु स्वरूपात्मकालौकिकदेहेन्द्रियादिना प्राकट्यनिषेधकत्वम् । कुतः । शब्दात् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेतिश्रुतेरित्यर्थः । भगवता सहानेकविधकामाशनं देहेन्द्रियादिकं विना न सम्भवतीति भगवद्दत्तालौकिकदेहेन्द्रियादिकं प्राप्य तत्स्वरूपानुभवं करोतीत्यर्थः ॥ १ ॥

ननु कामभोगानाममुक्तकर्तृकत्वात् तत्प्रतिपादिका श्रुतिरमुक्तविषयेत्याशङ्क्याह ।

मुक्तप्रतिज्ञानात् ॥ २ ॥

ब्रह्मविदाप्नोति परमित्यनेन मुक्तं प्रतिज्ञाय तद्विचरणं सोऽश्नुते सर्वान् कामानित्यनेन क्रियते । अतो मुक्तप्रतिज्ञानादेनोः पुष्टिमार्गीयमोक्षरूपत्वं कामाशनस्य, न तु लौकिकत्वमित्यर्थः ॥ २ ॥

ननु कामभोगस्य गुणाधीनत्वात् परब्रह्मणो गुणातीतत्वात्, सह ब्रह्मणेत्यत्र ब्रह्मपदं कार्यब्रह्मपरमिति न तत्प्राप्तेर्मोक्षरूपत्वमित्याशङ्क्याह ।

आत्मा प्रकरणात् ॥ ३ ॥

सह ब्रह्मणेत्यत्र ब्रह्मपदेन आत्मा व्यापको मायागुणसम्ब-

न्धरहित एवोच्यते । कुतः । प्रकरणात् । ब्रह्मविदाप्नोति परमित्यस्य गुणातीतप्रतिपादकत्वात् तत्प्रकरण एव सोऽश्नुत इत्यस्य पाठात् परं ब्रह्मैवात्र प्रतिपाद्यं, न कार्यं ब्रह्मेत्यर्थः ॥ ३ ॥

ननु ब्रह्मविदाप्नोति परमिति भिन्नं वाक्यं, सोऽश्नुत इयम् ऋग् भिन्ना । अतो नैकं प्रकरणमिति ब्रह्मपदेन प्राकृतगुणसहितमेवात्रोच्यत इत्याशङ्क्य परिहरति ।

अविभागेन दृष्टत्वात् ॥ ४ ॥

पूर्ववाक्येन सहाविभागेनैवेयम् ऋक् पठिता । कुतः । दृष्टत्वात् । तदेषाभ्युक्तेत्यनेन, ब्रह्मविदितिवाक्योक्तार्थप्रतिपादकत्वेनैव ऋगुक्तेति दृष्टत्वादित्यर्थः । अतः पूर्वोत्तरवाक्ययोरेकार्थप्रतिपादकत्वात् परब्रह्मैवात्र प्रतिपाद्यत इति ॥ ४ ॥

मुक्तो जीवो भगवदनुग्रहाद् बहिराविर्भूय गुणातीतेन पुरुषोत्तमेन सह सर्वकामोपभोगं करोतीति पूर्वमुक्तम् । तत्र बहिराविर्भूय प्राकृतेन शरीरेण भुङ्क्ते, किंवाऽप्राकृतेनेति संशये भोगायतनस्य प्राकृतस्यैव दृष्टत्वात् प्राकृतेनैव भुङ्क्त इति प्राप्ते, उच्यते ।

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

ब्राह्मेण ब्रह्मसम्बन्धिना सच्चिदानन्दात्मकेन शरीरेण, ब्रह्मणा सर्वान् कामानश्नुत इति जैमिनिराचार्यो मन्यते । कुतः । उपन्यासादिभ्यः । ब्रह्मविदाप्नोति परमित्युपन्यस्य सोऽश्नुत इतिकथनात् । किञ्च, परप्राप्तेः पुष्टिमार्गीयमोक्षरूपत्वेन लौकिकशरीरेण तद्भोगासम्भवाद् अक्षरब्रह्मणः पुरुषोत्तमाधिष्ठानत्वात् तदात्मकशरीरेण भगवदानन्दं भुङ्क्त इति युक्तम् । कर्मवादिनो जैमिनेरप्यत्र सम्मतिरस्त्यन्येषां किमुतेति सूचनार्थं जैमिनिग्रहणम् ॥ ५ ॥

औडुलोमिस्तु मुक्तो जीवश्चिन्मात्ररूपेणाऽलककरचरणादिभावं भगवद्विग्रहे प्राप्य भगवदानन्दमनुभवति, न तु पृथग्लौकिकविग्रहेणेत्याह ।

चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

चिति, स यथा सैन्धवघन इतिश्रुत्युक्तचिद्रूपे ब्रह्मणि तन्मा-

त्रेण चिन्मात्रेण रूपेण कामान् भुङ्क्ते, न त्वलौकिकदेहेन्द्रियादिना। कुतः । तदात्मकत्वात् । जीवस्य तदात्मकत्वादित्यौडुलोमिराचार्यो मन्यते । इत्यथौडुलोमिमते अलौकिकदेहादिकं विनैव चिन्मात्ररूपेणालकादिवद् भगवत्प्राप्तिरेव मोक्ष इति सिद्धम् ॥ ६ ॥

परमाचार्या बादरायणस्त्वौडुलोम्युक्तं चिन्मात्रेणैव जीवस्य भगवत्प्राप्तिर्मोक्ष इत्यत्र चिन्मात्रेणैवेति नियमांशं खण्डयित्वाऽलौकिकदेहेन्द्रियादिभिर्भक्तानां भगवता सह कामाशनं मोक्षो, ज्ञानमिश्रभक्तानां तु चिन्मात्रेणैव रूपेण भगवद्विग्रहेऽलकादिरूपप्राप्तिरेव मोक्ष इति ज्ञानिभक्तशुद्धभक्तव्यवस्थया सिद्धान्तमाह ।

एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

परमाचार्यो बादरायणोऽलौकिकविग्रहेणापि भोगेऽविरोधं मनुते । कुतः । एवमप्युपन्यासात् । ब्रह्मविदाप्नोति परमित्यत्रैवमपि विग्रहवत्त्वेनाप्युपन्यासात् । तथाहि । ब्रह्मविदाप्नोतीत्युक्त्वा परप्राप्तौ ब्रह्मविदः स्वातन्त्र्यं बोध्यते । तदेव, ब्रह्मणा सहेत्यृचोपन्यस्तम् । एवञ्च कामभोगेषु ब्रह्मणः साहित्यं भक्तस्य मुख्यत्वमित्युक्तं भवति । तच्चालौकिकविग्रहेणैव समञ्जसं भवति, नान्यथेति युक्तमलौकिकदेहेन्द्रियादिमत्त्वम् । अत्रैवमप्युपन्यासादित्यपिशब्दोक्त्या चिन्मात्रेण रूपेण भगवद्विग्रहेऽलकादिभावप्राप्तिरित्यौडुलोमिमतं ज्ञानमिश्रभक्तविषयमिति सूचितम् । अपिशब्देन तन्मतस्याप्यङ्गीकारसूचनात् । किञ्च, भक्तविविधभावदृष्ट्या विविधभोगचतुरेण चेत्यर्थकाधिपश्चितेत्युक्त्याऽलौकिकदेहेन्द्रियादिमत्त्वं प्राप्यते । ननु विग्रहस्य जन्यत्वेन लौकिकत्वाद् ब्रह्मणा सह भोगो न सम्भवतीत्याशङ्क्याह । पूर्वभावादिति । भक्तस्य भगवत्प्राप्तेः पूर्वमेव भगवद्भोगानुकूलविग्रहाद्यर्थं भावान्न कृत्रिमत्वमित्यर्थः । एवञ्च भगवत्स्वरूपानन्दानुभवयोग्यशरीराणि नित्यानि सन्ति । येष्वनुगृह्य स्वरूपानन्ददानेच्छा ताञ्जीवांस्तत्र योजयतीतिभावः ॥ ७ ॥

ननु भक्तिमार्गीयेष्वपि कतिपयेषु स्वरूपानन्ददानं, न सर्वेष्वित्यत्र किं नियामकमित्याशङ्क्य तदाह ।

सङ्कल्पादेव च तच्छ्रुतेः ॥ ८ ॥

भजनानन्ददानार्थं सङ्कल्पादेव हेतोस्तद्विषय एव तदानन्दमनुभवति । कुत एतज्ज्ञातं, तदाह । तच्छ्रुतेः । नायमात्मेत्यारभ्य, यमेवैष वृणुते तेन लभ्य इति श्रुतेः । अत्र भगवत्प्राप्तिं प्रति वरणातिरिक्तस्यासाधनत्वोक्त्या वरणमात्रलभ्यत्वोक्त्या च वरणात्मकसङ्कल्पप्राप्यत्वं वदति श्रुतिः । सूत्रे एवकारेण सङ्कल्पातिरिक्तसाधनाप्राप्यत्वं ज्ञाप्यते । चकारात् कृपार्जिततफलप्राप्त्यनुकूलपरमार्तिः संगृह्यते ॥ ८ ॥

उक्तमर्थं सूत्रान्तरेण द्रढयति ।

अत एव चानन्याधिपतिः ॥ ९ ॥

येषां साधनं फलं च प्रभुस्वरूपातिरिक्तं नास्ति, तेऽनन्याः । तेषामाधिपतिर्यतः । येषां साधनात्मना फलात्मना च हृदि भगवानेव स्फुरति, नान्यस्तेषामाधिपत्यमपि स्वयमेव करोति । अन्यत्र तु विभूतिरूपैराधिपत्यं करोति, न स्वयम् ॥ ९ ॥

पूर्वमप्रतीकालम्बनान्नयतीतिसूत्रेणाप्रतीकालम्बनानां ज्ञानिनामक्षरप्राप्तिरुक्ता । तत्राक्षरस्य साकारनिराकारभेदेन द्वैरूप्याज्ज्ञानिनां साकाराक्षरप्राप्तिर्निराकाराक्षरप्राप्तिर्वेति संशये निराकाराक्षरप्राप्तिरिति बादरिमतेनाह ।

अभावं बादरिराह ह्येवम् ॥ १० ॥

बादरिराचार्यो मुक्त्यवस्थायां देहाद्यभावं मनुते । कुतः । आह ह्येवम् । यतो ब्रह्मविदो मुक्तिनिरूपिका श्रुतिर्यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्युपक्रम्य, यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदिति निरूपा तस्य द्वितीयज्ञाननिषेधमाह । एवञ्च तस्य कामभोगवार्ता तु दूरे, कामभोगाक्षेप्यदेहस्तु सुतरामेव न सम्भवतीति बादरिमतम् ॥ १० ॥

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

जैमिनिराचार्यो मुक्तस्य पुंसो देहादभावं सत्तां मनुते । ननु पूर्वोक्तबाधकवाक्यानां का गतिरित्याशङ्क्याह । विकल्पामननात् । ब्रह्मविदाप्नोति परमितिश्रुत्या ब्रह्मज्ञानस्य परप्राप्तिहेतुत्वमुक्तम् । ना-

यमात्मेति श्रुत्या चरमैकलभ्यत्वमुक्तम् । सोऽश्नुते सर्वान् कामानितिश्रुत्या परप्राप्तिर्विवृता । इहैव समवलीयन्ते, ब्रह्मैव सन् ब्रह्माप्येतीत्यपि श्रुत्यन्तरम् । एवञ्च मिथोऽविरोधाय पुष्टिमार्गेऽङ्गीकृतो भगवता सहालौकिकदेहेन्द्रियादिकं प्राप्य कामानश्नुते । ज्ञानमार्गीयस्तु, ब्रह्मैव सन् ब्रह्माप्येतीत्युक्त्याऽक्षरे लयं प्राप्नोतीति व्यवस्थितावेकरूपाश्रयणान्मुक्तस्याप्यलौकिकदेहेन्द्रियादिसत्त्वे बाधकं नास्तीत्यर्थः । तत्केन कं पश्येदित्यपि ब्रह्मज्ञानदशानिरूपणमिति ज्ञेयम् ॥ ११ ॥

जैमिनिमते साकाराक्षरात्मकविग्रहप्राप्तिर्भक्तानां, निराकाराक्षरे लयस्तु ज्ञानिनां मोक्ष इत्युक्ते;साकारनिराकारभेदेनाक्षरे भेदशङ्का स्यात् । तन्निवारणायाचार्य एकमेवाक्षरं जीवानामधिकारभेदेन द्वादशाहवद् द्विरूपेणास्तीत्याह ।

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

भगवता सह, सोऽश्नुत इतिश्रुत्युक्तकामभोगसाधनस्याक्षरस्य भक्तान् प्रति भगवद्रसभोगार्थं शरीररूपेणाविर्भावेन भोगायतनत्वाच्छरीरत्वम् । भक्तदेहेन्द्रियादीनामक्षरात्मकत्वात् । ज्ञानिनां तु भौतिकत्वाभावमात्रेण निराकारत्वेन स्वस्मिँल्लयसम्पादकत्वादशरीरत्वमपीति बादरायण आचार्यो मन्यते । अतः श्रुतेरित्यर्थः । स तु तस्य ह वा एतस्यैवं पश्यत इत्यारभ्य, आत्मन एवेदं सर्वमित्यन्ता । तेन प्राकृतशरीरराहित्यं सिद्ध्यति । नन्वेकस्यैव विरुद्धमशरीरत्वं शरीरत्वं च कथमित्याशङ्क्य वैदिकदृष्टान्तेन समाधत्ते । द्वादशाहवत् । यः कामयेत प्रजायेयेति, स द्वादशरात्रेण यजेतेति विधानाद् यागत्वम्, द्वादशाहमृद्धिकाया उपेयुः, य एवं विद्वांसः सत्रमुपयन्तीति च विधानात् सत्रत्वं यथा द्वादशाहस्य तथा प्रकृतेऽपि ज्ञेयम् । प्रमाणसिद्धत्वादिति भावः ॥ १२ ॥

ननु श्रीकृष्णाद्यवतारस्वरूपमानन्दमयमेवेति तत्र प्रमाणेषु प्रतिपादितम् । परन्तु तत्राऽप्यवतारसमकालैः पुरुषैः प्राकृतविधावस्थाविशेषा दृश्यन्ते । तत् कुत इत्याशङ्क्य परिहरति ।

तन्वभावे सन्ध्यवदुपपत्तेः ॥ १३ ॥

तद्दर्शनस्य वास्तवत्वनिरासकस्तु शब्दः । तत्र प्राकृततुच्छाऽवस्थादर्शनम्, अभावे प्राकृतत्वस्याभाव एव भवति, न तु प्राकृत्याऽवस्थाऽस्त्र सन्ति । नन्वविद्यमानविषयस्य कथं दर्शनं स्यादत आह । सन्ध्यवदिति । सन्ध्यं तृतीयस्थानमितिश्रुतेः सन्ध्ये स्वप्ने यथाऽविद्यमानानेव मायिकान् पदार्थान् पश्यति निद्रामोहित एवं येष्वासुरेषु भगवतः स्वरूपाज्ञापनेच्छा तेषु मायया स्वरूपेऽविद्यमानानेव धर्मान् भासयतीति नानुपपन्नं किञ्चित् । ते तु, प्रवृत्तिं च निवृत्तिं च जना न विदुरासुरा, इत्यारभ्य, मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिमित्यन्तेन गीतायामुक्ताः ॥ १३ ॥

भावे जाग्रद्वत् ॥ १४ ॥

अप्राकृतलीलापदार्थस्य यत् तत्त्वेन दर्शनं तद् भावे विषयसद्भावे भवति । तद्दर्शनं सविषयकमेव, न तु मायिकविषयकम् । तत्र दृष्टान्तः । जाग्रद्वत् । जाग्रद्दशासामयिकज्ञानं सत्यविषयकमेव भवति, निद्रामोहितस्य तु विपरीतं, तद्वदित्यर्थः ॥ १४ ॥

ननु सोऽश्नुते सर्वान् कामान् सह ब्रह्मणेत्यत्र भक्तस्य भगवता सह कामभोग उपपादितः । परन्तु भगवतः पूर्णज्ञानक्रियाशक्तिमत्त्वेन भक्तस्य ततो न्यूनत्वे न सम्भवति । तत्रापि प्राधान्यं सुतरामेव न सम्भवतीत्याशङ्क्याह ।

प्रदीपवदावेशस्तथाहि दर्शयति ॥ १५ ॥

न हि तदा भक्तस्य स्वसामर्थ्येन प्राधान्येन भगवता सह भोगः, किन्तु भगवदावेशेन । प्रदीपवत् । यथा प्रदीपः स्नेहयुक्तवर्त्यन्तरे सम्बद्धः स्वेतरामपि स्वसमानां करोति, तथा भगवानपि फलदानार्थं भक्ते सम्बद्धस्तमपि स्वसमानसामर्थ्यं करोतीत्यर्थः । अत्र प्रमाणमाह । तथाहि दर्शयति । श्रुतिरितिशेषः । सा तु भक्तौ सह म्रियमाणो विभर्ति, एको देवो बहुधा निविष्ट इति च ॥ १५ ॥

ननु न तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येत्, न तत्र कश्चन न तद्वेत्ति कश्चनेति श्रूयते । ब्रह्मणा सह कामभोगोऽपि, सोऽश्नुत इति श्रूयते । एवञ्च श्रुतिविप्रतिषेधनिराकरणाय निर्गुणं ब्रह्म, न तद्श्नोतीतिश्रुतेर्विषयः । सोऽश्नुत

इतिश्रुतेस्तु प्राकृतगुणसहितं ब्रह्म विषय इति व्यवस्थायां सवसामञ्जस्यमिति प्राप्ते, उच्यते ।

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥१६॥

स्वाप्ययः स्वमपीतो भवतीतिश्रुत्युक्ता सुषुप्तिः । सम्पत्तिर्ब्रह्मसम्पत्तिरूपकरीत्या पुष्टिमार्गीयो मोक्षः । तयोरन्यतरापेक्षमुभयश्रुत्याविष्कृतम्, उक्तार्थमित्यर्थः । एवञ्च प्रस्थापदशायां ब्रह्मस्वरूपस्य सम्यगनुभवाभावात् तद्विषयिणी न तद्वक्तीति निषेधिका श्रुतिः । सम्पत्त्यात्मकपुष्टिमार्गीयमोक्षे तु स्वरूपस्यानेकधाऽनुभवात् तन्निरूपिका, सोऽश्नुत इत्यादिश्रुतिरिति न प्राकृतगुणयुक्तत्वनिर्गुणत्वभेदेन व्यवस्थाकल्पनमुचितमित्यर्थः । परास्य शक्तिर्विविधैव श्रूयत इत्यादिश्रुत्याऽचिन्त्यानन्तशक्तिमति स्वतः सर्वभवनसमर्थे ब्रह्मणि गुणानां प्रयोजनाभावात् ॥ १६ ॥

ननु ब्रह्मणा सह कामभोगे लौकिकव्यापारसाहित्यमस्ति न वेति संशये भोगस्य लौकिकव्यापारसाहित्यदर्शनादस्तीति प्राप्ते, उच्यते ।

जगद्व्यापारवर्ज्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥

भगवता सह भोगो जगद्व्यापारवर्जं भवति । जगत्सम्बन्धी लौकिको यो व्यापारस्तद्रहित इत्यर्थः । कुतः । प्रकरणाद् असन्निहितत्वाच्च । ब्रह्मविदाप्नोतीत्यस्य मुक्तिप्रकरणस्थत्वात् तत्र लौकिकव्यापारो न सम्भवति । लीलायाः प्रकृतिकालाद्यतीतत्वाच्च लौकिकं जगत् ततो दूरतरमिति न तत्र लौकिकव्यापारसम्भावना सन्निधानाभावात् ॥ १७ ॥

ननु मुक्तिप्रकरण एव छान्दोग्ये, सर्वं ह पश्यतीति सर्वविषयज्ञानकथनात् पूर्वोक्तं लौकिकव्यापाराद्युक्तं नोपपद्यत इति सूत्रार्थेनाशङ्क्य समाधत्ते ।

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः॥१८॥

देशकालभेदेनानेकविधायां लीलायामधिकृतो यो भक्तस्तस्य यानि तत्तल्लीलानुभवार्थं नानारूपाणि तान्याधिकारिकाणि । तेषां

मण्डले समूहः । तत्र स्थितं वस्तुमात्रमाधिकारिकमण्डलस्थम् । स एष सर्वं ह पश्यतीत्यनेन दर्शनोक्तिर्न तु लौकिकवस्तुनः । अत एवात्र, सर्वमाप्नोति सर्वशः, स एकधा भवतीत्यादि च पठ्यते । अतः, सर्वं ह पश्यतीति श्रुत्याऽप्यलौकिकलीलाविषयकसर्वज्ञानकथनान्मुक्तिदशायां न लौकिकव्यापारसम्भावनापीति भावः ॥ १८ ॥

ननु तत्तद्देशकालविशिष्टलीलाया नित्यत्वात्, श्वस्त्वद्गृहमायास्य इति भगवदुक्तौ भक्तानां तदाकाङ्क्षया स्थितिरनुपपन्ना । तत्तद्देशकालभगवदागमनस्य नित्यत्वेन तदापि सत्त्वात् भगवतोऽप्येवं कथनासम्भवाच्चेत्याशङ्क्याह ।

विकारावर्ति च तथा हि स्थितिमाह ॥ १९ ॥

अस्मिञ्छास्त्रे । भगवल्लीलायाः प्रकृतित्वेन कथनात् तद्विरुद्धोऽर्थो विकारशब्दवाच्यो भवति । यथाऽऽम्रादिफलेषु विकारेण रसनाशो भवतीति लोके दृष्टं, तद्वदत्रापि भगवतः श्वस्त्वद्गृहमायास्य इति भक्तविशेषं प्रति कथनसमयेऽपि तद्गृहागमनलीलाया नित्यत्वेन तस्मिन् काले सत्त्वेऽपि तदा तस्या अनुभवे भगवदागमनप्रतीक्षाहेतुविप्रयोगरसस्य नाशो भवतीति तस्मिन् काले स्वगेहे भगवत्स्थित्यनुभवो विकारो भवति । एवञ्च भक्तानां पूर्वोक्तरीत्या भगवदुक्त्यनन्तरं यत्तदागमनप्रतीक्षात्मकं ज्ञानं तद् विकारावर्ति भवति । मद्गेहे पूर्वं भगवानागतोऽभूद्, अधुना पुनरप्यायास्यतीति भूतभविष्यत्स्वगेहस्थित्यनुभवविषयकमपि ज्ञानं न भवति विरहौत्कण्ठ्यानापत्तेः । किन्तु कदा आयास्यतीति केवलं प्रतीक्षैव तदा भवति । इदं सङ्क्षेपत उक्तम् । यद्रसनाशकं भवति तादृशं ज्ञानं तस्य न भवति, पोषकमेव भवतीति लौकिकभिन्नं लीलानुभवात्मकमेव तज्ज्ञानम् । एवञ्च तल्लीलाविशिष्टधर्माः सर्वदा तद्गेहे सत्त्वेऽपि तदा तस्य ज्ञानं न भवतीत्यर्थः । भक्तानामपि सर्वज्ञत्वेऽपि यादृशं रसाभासजनकं तादृशमाच्छाद्य रसपोषकं ज्ञानं प्रकटयति । अत्र प्रमाणं प्रदर्शयति । तथा हि स्थितिमाह । सर्वमाप्नोति सर्वश इति श्रुतिरेकस्यैव भक्तस्य सर्वशः सर्वैः प्रकारैः सर्वं लीलारसमाप्नोतीति कथयन्ती पूर्वोक्तरीत्यैव तस्य लीलायां स्थितिमाह । अतो लीला

स्वरूपमेवेदमलौकिकं तादृशमिति वैदिकैस्तथैव मन्तव्यमिति भावः। अलौकिकेऽर्थे प्रमाणमेवानुसर्तव्यं, न लौकिकी युक्तिः ॥ १९ ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

प्रत्यक्षानुमाने श्रुतिस्मृती भगवत्सम्बन्धिनि लीलापदार्थे युक्त्यगम्यत्वं दर्शयतः । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च । नैषा तर्केण मतिरापनेया । अलौकिकास्तु ये भावा न तांस्तर्केण योजयेदिति च । अतो लीलायां लौकिकयुक्तिविरोधो न दूषणं, प्रत्युत भूषणमेव । तदुक्तं, न हि विरोध उभयं भगवत्यपरिगणितगुणगणे ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणाशयदुरवग्रहवादिनां विवादानवसर इत्यादि ॥ २० ॥

एतादृशलीलाविशिष्टप्रभुस्वरूपमेव परमफलत्वेन वेदान्तश्रुतितात्पर्यविषय इति सूचयति ।

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

सोऽश्नुते सर्वान् कामान् सह ब्रह्मणेतिश्रुतौ भोगे भगवतो भक्तसाम्यमुच्यते । एतच्च पुरुषोत्तम एव सम्भवति । यतो भक्ते सख्यं दत्त्वा तत्कृतात्मनिवेदनमङ्गीकुर्वन् कृपया तं प्राधान्येन स्वरूपानन्दमनुभावयति । अन्यथा भक्तस्य स्वरूपानन्दानुभवो न भवेत्। एतादृशपरमकृपालुः पुरुषोत्तम एव परमं फलमिति सिद्धम् । मात्रपदेन न तत्समश्चाभ्यधिकश्च दृश्यत इतिश्रुतेर्भगवतः सर्वात्मना न भक्तसाम्यमिति ज्ञापितम् ॥ २१ ॥

एवं भगवत्स्वरूपानुभवस्य पुष्टिमार्गीयपरमफलत्वं निरूप्याक्षरप्राप्तिशालिनः फलत्वं निरूप्य तदनुभवानन्तरं कर्ममार्गवत् पुनरावृत्तिः स्यादित्याशङ्कोभयोरप्यपुनरावृत्तिं सूत्रावृत्त्या निरूपयन्नुपसंहरति ।

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

अत्र सूत्रावृत्त्या ज्ञानिनां भक्तानां चानावृत्तिरुच्यते । अक्ष-

लोकमभिसम्पद्यते, न स पुनरावर्त्तत इत्यादिशब्दस्तु ज्ञानिनामनावृत्तिमाह । भक्तिमार्गे तु यमेवैष वृणुते तेन लभ्य इतिश्रुतवरणस्य नित्यत्वेनानावृत्तिरपि नित्या बोध्या । किञ्च, कालेन हि पुनरावृत्तिः । न यत्र कालोऽनिमिषां परः प्रभुरिति वाक्याद् भगवल्लीलायां कालप्रभावादपि न पुनरावृत्तिरिति ॥ २२ ॥

सम्राट्श्रीजयसिंहाज्ञां प्राप्य व्रजनाथभट्टेन ।
अणुभाष्यभास्करस्य मरीचिकेयं कृता जयतात् ॥ १ ॥

इति श्रीब्रह्मसूत्राणामणुभाष्यानुसारिवृत्तौ मरीचिकाख्यायां
चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥ ४ ॥

समाप्तोऽयं चतुर्थोऽध्यायः ॥
सम्पूर्णश्चायं ग्रन्थः

॥ श्रीहरिः ॥

अयि, श्रीश्रीवल्लभाचार्यशुद्धाद्वैतसम्प्रदायसिद्धान्तज्ञानरसिकाः सहृदयवराः !, इदं किलाभिज्ञायतां तत्रभवद्भिर्भवद्भिः ।

यदेषा श्रीभगवत्कृष्णद्वैपायनप्रणीतब्रह्मसूत्राणां विवृतिरणुभाष्यानुसारिणी मरीचिकाख्या श्रीव्रजनाथभट्टकृता सम्मुद्र्य प्रकाशिता वरीवर्ति ।

एनां च, 'नानामतध्वान्तविनाशनक्षमो वेदान्तसिद्धान्तविकासने पटुः । आविष्कृतोऽयं भुवि भाष्यभास्करो मुधा बुधा धावत नान्यवर्त्मसु' इत्यणुभाष्ये श्रीश्रीवल्लभाचार्यैः स्वभाष्यस्य भास्कररूपतया निरूपणाद् अणुभाष्यविभाकरानुगामिकिरणरूपेण व्यपदिशन् मरीचिकेति न्यरूपयद् ग्रन्थकारः ।

स च, शुद्धाद्वैतसम्प्रदायस्य सौलभ्येन बोधार्थमेनां सम्राट्श्रीजयसिंहाज्ञानुसारेण व्यरचयदिति, 'सम्राट्श्रीजयसिंहाज्ञां प्राप्य व्रजनाथभट्टेन । अणुभाष्यभास्करस्य मरीचिकेयं कृता जयताद्' इति प्रशस्तिलेखाज्ज्ञायते ।

तां चैनां नानाविधदर्शनप्रकाशाय प्रयतमानेन श्रीहरिदासगुप्ताभिधमहाशयेन प्रवर्तितो भाष्यादिभिः संशोध्य प्रकाशितवानस्मि ।

अग्रे च क्रमशः सप्रकाशाख्यव्याख्योऽणुभाष्यग्रन्थोऽपि प्रकाशयिष्यत इति शुद्धाद्वैतसम्प्रदायपुस्तकमभिलष्यद्भिः सुधीभिरवधेयमिति, प्रकाशयिता ।

रत्नगोपालभट्टः